त्वं तथा बृहतीब्रह्मशब्दयोरविशेषाभिधानत्वे युक्तं अन्यथा निर्देशाद्धि निर्विशेषयोरानर्थक्यापत्तेः पुनर्वाग्ग्रहणाच्चोभयत्र पौनरुक्त्यं ऋग्यजुःसामेत्यथवा
द्यानां च श्रुतिषु सर्वत्र समदर्शनात्॥ ॥एष उ एव साम कथमित्याह। वाग्वै साम यत्किंचिच्छब्दात्मकमभिधेयं सा वाक् सर्वशब्दाभिधेयवस्तुविषयो हि सर्वेना

म सा शब्दस्तथा अम एव प्राणः सर्वं पुंशब्दाभिधेयं पुंवस्तुविषयोऽमः शब्दः केन मे पौंस्नानि नामान्याप्नोषीति प्राणेनेति ब्रूयात्केन मे स्त्रीनामानीति वा
चेति श्रुत्यंतरात् वाक्प्राणाभिधानभूतौ सामशब्देन यथा प्राणनिर्वर्त्यस्वरादिसमुदायमात्रं गीतिः सामशब्देनाभिधीयतेऽतो न प्राणवाग्व्यतिरेकेण साम
नामास्ति किंचित्स्वरवर्णादि प्राणनिर्वर्त्यत्वात्प्राणतंत्रत्वाद्वा यत एव प्राणः साम यस्मात्सा सामसामेति वाक्प्राणात्मके सा चामश्चेति तस्मात्साम्नो गीतित्व
रूपस्य स्वरादिसमुदायस्य साम तत्तस्य गानं तु विशेष एव समस्तस्य सर्व एव कृत्स्नाः प्राणेन प्रकारेण तस्माद्वा सामैतत्प्राणेन संबंधो वा शब्दः सामशब्दस्य निमित्त
प्रकारांतरं निर्दिशन् सामशब्दलभ्यः केन पुनः प्रकारेण प्राणस्य तुल्यत्वमित्युच्यते । प्लुषिणा पुत्तिकाशरीरेण समो मशकेन मशकशरीरेण समो नागेन हस्ति
शरीरेण सम एभिस्त्रिभिर्लोकैस्त्रैलोक्यशरीरेण प्राजापत्येन समः अनेन जगद्रूपेण हैरण्यगर्भेण पुत्तिकादिशरीरेषु गोत्वादिवत्कार्त्स्न्येन परिसमाप्त
इति समत्वं प्राणस्य न पुनः शरीरमात्रपरिमाणेनैवामूर्त्तत्वात्सर्वगतत्वाच्च न घटप्रासादादिप्रदीपवत्संकोचविकाशितया शरीरेषु तावन्मात्रसमत्वं न
पुनः सर्व एव समाः सर्वेऽनंता इति श्रुतेः सर्वगतस्य तु शरीरेषु शरीरपरिमाणवृत्तिलाभो न विरुध्यते एवं समत्वात्सामाख्यं प्राणं वेद यः श्रुतिप्रकाशितम
हत्त्वं तस्यैतत्फलमश्नुते साम्नः प्राणस्य सायुज्यं सयुग्भावं समानदेहेन्द्रियाभिमानत्वं सालोक्यं समानलोकतां वा भावनाविशेषतो य एवमेतद्य
थोक्तं साम प्राणं वेद आ प्राणात्माभिमानाभिव्यक्तेरुपासनस्येत्यर्थः ॥ एष उ वा उद्गीथः उद्गीथो नाम सामावयवो भक्तिविशेषो नोद्गानं सामाधिकारात्तदिह प्र
द्गीथः प्राणः प्राणो वा उत् प्राणेन हि यस्मादिदं सर्वं जगदुत्तब्धं ऊर्ध्वं स्तब्धमुत्तंभितं विधृतमित्यर्थः । उत्तंभनार्थावद्योतकोऽयमुच्छब्दः प्राणगुणाभिधायकस्तस्मा
दुत्प्राणो वागेव गीथा शब्दविशेषत्वादुद्गीथाभिधेयक्रिया गीथा गायतेः शब्दार्थत्वात् न वागेव नह्युद्गीथस्कोः शब्दव्यतिरेकेण किंचिद्रूपमस्ति दृश्ये । तस्माद्युक्तम
च्चारणं वागेव गीथेत्युच्च प्राणो गीथा च वाक् प्राणमंतरेणावागिति उभयमेकेन शब्देनाभिधीयते स उद्गीथ इति ॥ ॥ उक्तार्थदार्ढ्यायाख्यायिकारभ्यते । तद्धापि त

वाम॰
१५

न्नैतेनास्मिन्नुक्तेऽर्थे ह अपि आख्यायिकापि श्रूयते ह स्म ब्रह्मदत्तो नाम नप्ता किं चिकितानस्यापत्यं चैकितानः तदपत्यं युवा चैकितानेयो राजानं यज्ञे सोमं भक्ष-
यन्नुवाच किमयं चमसस्थो मया भक्ष्यमाणो राजा अस्य त्यस्य मम मान्त्रनवादिनो मूर्द्धानं शिरो विपातयताद्विपातयतु विस्पष्टं पातयतु नो रयं नानृतादेशः आ-
शिषो वा हृदि पातयतादिति यद्यहमनृतवादी स्यामित्यर्थः। कथं पुनरनृतवादित्वं प्राप्ति इत्युच्यते। यदि इतोऽस्मात् प्रकृतात् प्राणात् मुख्यादयास्यादाङ्गि-
रसात्प्राणाभिधायकेनायास्यांगिरसशब्देनाभिधीयते विश्वसृजां पूर्वेषां सत्रे उद्गाता सोऽन्येन देवतान्तरेण वा कथाणद्युति शिक्षो नोद्गाय उद्गानं कृतवा-
न् ततोऽहमनृतवादी स्यां तस्य मम देवताविपरीतप्रतिपत्तुर्मूर्द्धानं विपातयत्वित्येवं शापार्थं चकारेति विज्ञाने प्रत्ययदार्ढ्यकर्त्तव्यतां दर्शयति तमिममाख्या-
यिकया निष्कृष्टमर्थं स्वेन वचसोपसंहरति श्रुतिः वाचा च प्राणेन च प्रधानया वाचा प्राणेन च स्वव्यापारभूतेन सोऽयास्य आङ्गिरसः उद्गाता उदगायदिति एषोऽर्थो नि-
र्द्धारितः शपथेन॥ ॥तस्य हैतस्य प्रकृतस्य प्राणस्य साम इति संव्यवहारे हि एतस्येति मुख्यं प्रदिश्यत्यभिनयेन साम्नः साम शब्दवाच्यस्य प्राणस्य यः स्वं धनं वेद
तस्य ह किं स्यात् इत्याह भवति हास्य स्वं फलेन प्रलोभ्याभिमुखीकृत्य शुश्रूषवे आह तस्य वै साम्नः स्वर एव स्वं इति कंठगतं माधुर्यं तदेवास्य स्वं विभूषणं तेन हि भूषित-
मृद्धिमल्लक्ष्यते उद्गानं यस्मादेवं तस्मादार्त्विज्यं ऋत्विक्कर्म उद्गानं करिष्यन् वाचि विषये वाचि वाच्ये स्वरमिच्छेत साम्नो धनवत्तां स्वरेण चिकीर्षुरुद्गाता तदुप्र-
संगिकं विधीयते साम्नः सौस्वर्येण स्वरवत्त्वप्रत्यये कर्त्तव्ये दुष्टात्मा त्रेण सौस्वर्यं न भवतीति दन्तधावनतैलपानादि सामर्थ्यात्कर्त्तव्यमित्यर्थः। तयैवं संस्कृत-
या वाचा स्वरसंपन्नयार्त्विज्यं कुर्यात् तस्मात्साम्नः स्वभूतेन स्वरेण स्वेन भूषितं साम मनो यज्ञे स्वरवन्तमुद्गातारं दिदृक्षन्त एव द्रष्टुमिच्छन्त एव धनिनमिव लोके किं का-
प्रसिद्धं हि लोके यो ह्यपि यस्य स्वं धनं भवति तं धनिनं दिदृक्षन्त इति सिद्धस्य गुणविज्ञानफलसंबंधस्योपसंहारः क्रियते भवति हास्य स्वं य एवमेतत्साम्न
[illegible] विधीयते साम्नः सो [illegible] पूर्ववत् कंठगतं माधुर्यं [illegible] लाक्षणिकं सुवर्णमाहुर्वाच्य तस्य

उत्कर्षज्ञानफलेन वर्तीत्यर्थः

तस्य हैतस्य साम्नो यः सुवर्णं वेद भवति हास्य सुवर्णं तस्य वै स्वर एव सुवर्णं भवति हास्य सुवर्णं य एवमेतत्
१५ साम्नः सुवर्णं वेदेति पूर्ववत्सर्वं तथा प्रतिष्ठागुणं विधित्सन्नाह तस्य हैतस्य साम्नो यः प्रतिष्ठां वेद प्रति ह तिष्ठत्यस्मिन्निति प्रतिष्ठा तां प्रतिष्ठां साम्नो गु
णं यो वेद सः प्रतितिष्ठति ह नं यथायथोपासनं तद्रूपतान्निश्चितेः तद्गुणत्वयुक्तं पूर्ववत्फलेन प्रतिष्ठितोऽभिनायकः प्रतिष्ठितिश्रुतेः पृष्ट आह तस्य वै साम्नो वा
गेव प्रतिष्ठेति जिह्वामूलीयादीनां स्थानानां तस्मात्स्थानेषु प्रतिष्ठा वाग्विशिष्टा जिह्वामूलीयादिषु यस्मात्प्रतिष्ठितः सन्नेष प्राण एतद्गानं गीयते । गीतिना
वमापद्यते तस्मात्साम्नः प्रतिष्ठा वा अन्ने प्रतिष्ठितो गीयत इत्युह एके त्वाहुः इह प्रतितिष्ठतीति त्वेषु क्रमनिर्दिष्टत्वाद्देहीयपक्षस्य विकल्पेन प्रतिष्ठा
गुणविज्ञानं कुर्यात्तद्वाग्वा प्रतिष्ठान्नं वेति ॥ ॥ एवं प्राणविज्ञानवतो जपकर्मविधित्सयाह यद्विज्ञानवतो जपकर्मण्यधिकारः तद्विज्ञानमुक्तं अथानं
तरं यस्मादेवं विदुषा प्रयुज्यमानं देवभावायाभ्यारोहफलं जपकर्म अतः तस्माद्विधीयत इह हि तस्यायोगो ह्यसंबन्धः सर्वत्र प्रस्तोता पवमानानामिति वच
नात्पवमानेषु त्रिष्वपि कर्तव्यतायां प्राप्तायां पुनः कालसंकोचं करोति स वै खलु प्रस्तोता साम प्रस्तौतीति स प्रस्तोता यत्र यस्मिन्काले साम प्रस्तुयात्प्रार
भेत तस्मिन्काल एतानि जपेत् अस्य च जपकर्मणः आख्याभ्यारोह इति आभिमुख्येनारोहत्यनेन जपकर्मणा एवं विद्वान्देवभावमित्यभ्यारोहः एतानीति
बहुवचनात् त्रीणि यजूंषि द्वितीयानिर्देशात् ब्राह्मणोत्पन्नत्वाच्च यथापठितान्येव स्वरः प्रयोक्तव्यो न मन्त्रः याजमानं जपकर्म एतानि तानि यजूंषि असतो मा स
द्गमय तमसो मा ज्योतिर्गमय मृत्योर्मामृतं गमयेति मन्त्राणामर्थस्तिरोहितो भवति स्वयमेव व्याचष्टे ब्राह्मणं मन्त्राणामर्थं स मन्त्रो यदाह यदुक्तवान्कोऽसावर्थ इ वा०भ० १५
त्युच्यते मृत्युर्वा असत्स्वाभाविककर्मविज्ञाने मृत्युरित्युच्यते । असत्सदत्यन्ताधोभावहेतुत्वात् सदमृतं शास्त्रीयकर्मविज्ञाने अमरणहेतुत्वात्तस्मात्
सतो माकर्मणोऽज्ञानाच्छास्त्रीयकर्मविज्ञाने गमय देवभावसाधनात्मभावमापादयेत्यर्थः तत्र वाक्यार्थमाह अमृतं मा कुर्वित्येवैतदाहेति तथा

मसो मा ज्योतिर्गमयेति मृत्युर्वै तमः सर्वं ह्यज्ञानमावरणात्मकत्वात्तमस्तदेव च मरणहेतुत्वान्मृत्युर्ज्योतिरमृतं पूर्वोक्तविपरीतं दैवं स्वरूपं प्रकाशात्मक
त्वाज्ज्ञानं ज्योतिस्तदेवामृतमविनाशात्मकत्वात्तस्मात्तमसो ज्योतिर्गमयेति पूर्ववन्मृत्योर्मामृतं गमयेत्यादिश्यामृतं मा कुर्वित्येवैतदाह दैवं प्राजापत्यं फ
लभावमापादयेत्यर्थः पूर्वो मंत्रोऽसाधनस्वभावात्साधनभावमापादयेति। द्वितीयस्तु साधनभावादज्ञानरूपात्साध्यभावमापादयेति मृत्योर्मामृ
तं गमयेति पूर्वयोरेव मंत्रयोः समुच्चितोऽर्थः तृतीयेन मंत्रेणोच्यत इति प्रसिद्धार्थतैव नात्र तृतीये मंत्रे तिरोहितमंतर्हितमिवार्थरूपं पूर्वयोरिव मंत्रयो
रस्ति यथाश्रुत एवार्थो याजमानमुद्गानं कृत्वा पवमानेषु त्रिषु यथामंत्रं यानीतराणि शिष्टानि स्तोत्राणि तेषा 'त्मनेऽन्नाद्यमागायेत्प्राणविदुद्गाता प्राण
भूतः प्राणवदेव यस्मात्स एष उद्गाता एवं प्राणं यथोक्तं वेत्त्यतः प्राणवदेव तं कामं साधयितुं समर्थः तस्माद्यजमानस्तेषु स्तोत्रेषु प्रयुज्यमानेषु वरं
वृणीत यं कामं कामयेत तं कामं वरं वृणीत प्रार्थयेत यस्मात्स एष एवंविदुद्गातेति तस्मात्स उद्गातागेव संबध्यते आत्मने वा यजमानाय वा यं कामं काम्य
तद्वस्तूद्गातात्मन आगानेन साधयत्येवं तावज्ज्ञानकर्मभ्यां प्राणात्मापत्तिर्विशुक्तं तत्र नास्त्याशंकासंभवो नः कर्मापाये प्राणापत्तिर्भवति वा न वेत्या
शंकमानदाशंकानिवृत्त्यर्थमाह तद्धैतल्लोकजिदेवेति तत्तद्धैतत्प्राणदर्शनं कर्मविमुक्तं केवलमपि लोकजिदेव लोकसाधनमेव न ह्येवालोक्यता
यै श्लोकार्हत्वायाशंसनं प्रार्थनं नैवास्ति न हि प्राणात्मन्युत्पन्नाभिमानस्य न त्वाशाबाधाशंसनं संभवति न हि यामस्य कदाचिदप्यात्मस्वरूपेप्यु
द्वाह्यालोऽसमतिशृष्ट विषयेहानात्मन्याशंसनं न तत्त्वात्मनि संभवति तस्मान्नाशाशास्ति कदाचित्प्राणात्मभावं न प्रतिपद्येयमिति कस्मेनयवमेनन्मा
मप्राणं यथोक्तं निर्द्धारितमहिमानं वेदाहमस्मि प्राणइंद्रियासंगेरासुरैः पाप्मभिरनवबद्धत्वाद्विशुद्धो वागादिपंचकं चमदाश्रयज्ञाद्याभोदन्याद्या
त्मानूपं स्वात्माविकल्पेनात्मेंद्रियासंगमनिनासुरपाप्मदोषविमुक्तं सर्वभूतेषु च महाश्रयान्नाद्योपयोगबंधनमात्माचाहं सर्वभूतानामंगरसत्वा

२६

ह्यमनुः सामेतोद्गीथभूतायाश्च वाच आत्मानन्द्याप्रेर्निर्वर्तकत्वाच्च ममामास्तोगीतिमा वमा पद्यमानस्य वाद्यंच मंभूषणं सोऽस्वर्यं तनि मायांनरतनं
सोऽवर्त्तेलाक्तणिकं सोऽस्वर्ययोगीति नावमापद्यमानस्य ममकं तादित्स्यानामिप्रनिष्टैवं गुणोऽहं पुत्रिकादिशरीरेषु कात्स्न्येन परिसमाप्तो मूर्त्तेत्वा
सर्वंगमनवाक्त्विति आएवममिमानानाप्रियत्कैर्वेदोपास्तइत्यर्थः॥ ॥इति बृहदारण्यकभाष्ये तृतीयं ब्राह्मणम्॥ ॥आत्मैवेदमग्र आसीत् ज्ञान
कर्मभ्यां समुच्चिताभ्यां प्रजापतित्वप्राप्तिर्व्याख्याता केवलप्राणदर्शनेन च न तु तज्ज्ञानं कस्मिंश्चिदेवेन्याद्विना प्रजापतेः फलभूतस्य सृष्टिस्थितिसंहा
रेषु जगतः स्वातंत्र्यादिविभूत्युपवर्णनेन ज्ञानकर्मणोर्वैदिकयोः फलोत्कर्षोपवर्णयितव्य इत्येवमर्थमारभ्यते नेनैनच कर्मकांडविहितज्ञानकर्म
स्तुतिः कृता भवेत्सामर्थ्यात् विवक्षितं त्वेतन्न सर्वमपेन ज्ञानकर्मफलं संसार एव भयारत्यादियुक्तत्वश्रवणात्कार्यकरणलक्षणत्वाच्च स्थूलव्य
क्तानित्यविषयत्वाच्चेति ब्रह्मविद्यायाः केवलायाः वक्ष्यमाणायाः मोक्षहेतुत्वमित्युत्तरार्थं चेति न हि संसारविषयात्साध्यसाधनादिभेदलक्षणात्
विरक्तस्यात्मैकत्वज्ञानविषये अधिकारो न्ह अविरक्तस्य पिपासेन स्मात् ज्ञानकर्मफलोत्कर्षोपवर्णनमुत्तरार्थं तथा च वक्ष्यति तदेतत्पदनीयमस्य तदे
तत्प्रेयः पुत्रादित्यादि आत्मैवात्मेति प्रजापतिः प्रथमजोऽण्डजः शरीर्यभिधीयते वैदिकज्ञानकर्मफलभूतः स एव किंरूपं शरीरभेदज्ञानेन प्रजा
पतिशरीरेणाधिमक्तमात्मैवासीदग्रे प्राक्शरीरांतरोत्पत्तेः स च पुरुषविधः पुरुषप्रकारः शिरःपाण्यादिलक्षणो विराडूपः स एव प्रथमः संभूतः अनुवी
क्ष्य आलोचनं कृत्वा कोऽहं किंलक्षणो वास्मीति नान्यद्वस्त्वंतरमात्मनः प्राणपिंडात्मकात्कार्यकरणरूपादपश्यत् नैव ददर्श केवलं चात्मानमेव सर्वात्मान राम०
मपश्यत् तथा पूर्वजन्मश्रौतविज्ञानसंस्कृतः सोऽहं प्रजापतिः सर्वात्माहमस्मीत्यग्रे व्याहरत् व्याहृतवांस्ततस्तस्मात्पूर्वज्ञानसंस्काराद्दात्मानमेवा २६
हमित्यभ्यधादयेन तस्मादहंनामाभवत् तस्योपनिषदहमिति हि श्रुतिप्रदर्शितमेवनामवक्ष्यति हि तस्माद्यस्मात्कारणे प्रजापतावेवं वृत्तं तस्मात्तत्का

यं भूतेषु प्राणिषु वेतर्ह्यस्मिन्नपि काले आमंत्रितः कस्त्वमित्युक्तः सन्नहमयमित्येवाग्र उक्त्वा कारणात्माभिधानेनात्मानमभिधायाग्रे पुनर्विशेषनाम
जिज्ञासवे ऽथानंतरं विशेषपिंडाभिधानं देवदत्तो यज्ञदत्त इति वा प्रब्रूते कथयति यन्नामास्य विशेषपिंडस्य मातापितृकृतं तन्न भवति। तत्कथयति स च प्रजाप
तिः पूर्वजन्मनि सम्यक्कर्मज्ञानभावनानुष्ठानैः साधकावस्थायां यद्यस्मात्कर्मज्ञानभावनानुष्ठानैः प्राजापत्यप्रतिपित्सूनां पूर्वः प्रथमः सन्नस्मात्प्रजा
पतित्वप्रतिपत्सुसमुदायात्सर्वस्मादौषददहत्। किमासंगज्ञानलक्षणान्सर्वान्पाप्मनः प्रजापतित्वप्रतिबंधकारणभूतान् यस्मादेवं तस्मात्पुरुषः पूर्वमौ
षदिति पुरुषः यथायं प्रजापतिरोषित्वा प्रतिबंधकान्पाप्मनः सर्वान्पुरुषः प्रजापतिरभवदेवमन्योपि ज्ञानकर्मभावनानुष्ठानवह्निना केवलज्ञानबलाद्वो
षति भस्मीकरोति ह वै स तं यः अस्माद्विदुषः पूर्वः प्रथमः प्रजापतित्वं बुभूषति भवितुमिच्छति तमित्यर्थः। तं दर्शयति य एवं वेदेति सामर्थ्याज्ज्ञानभा
वनाप्रकर्षवान्नन्वनर्थाय प्राजापत्यप्रतिपित्सोर्विदुषो दहनमिति नैष दोषः ज्ञानभावनोत्कर्षाभावात्प्रथमं प्रजापतित्वप्रतिपत्त्यभावमात्रत्वाद्दा
हस्योत्कृष्टसाधनः प्रथमं प्रजापतित्वं प्राप्नुवन्न्यूनसाधनो न प्राप्नोतीति स तं दहतीत्युच्यते न पुनः प्रत्यक्षमुत्कृष्टसाधनेनेतरो दह्यते यथा लोके आजिसृ
तां यः प्रथममाजिमुपसर्पति तेनेतरे दग्धा इवापहतसामर्थ्या भवंति तद्वत्॥ ॥यदिदं तुष्टूषितं कर्मकांडविहितज्ञानकर्मफलं प्राजापत्यलक्षणं नैव
तत्संसारविषयमत्यक्रामदितीममर्थं प्रदर्शयिष्यन्नाह सोबिभेदित्यादिः। प्रजापतिर्योयं प्रथमः शरीरी पुरुषविधो व्याख्यातः सोबिभेद्भीतवानस्मदादि
वदेवेत्याह यस्मादयं पुरुषविधः शरीरकरणवानात्मनाशविपरीतदर्शनवत्त्वादबिभेत्तस्मात्तत्सामान्यादद्यत्वेप्येकाकी बिभेति किं चास्मदादिवदेव भ
यहेतुविपरीतदर्शनापनोदकारणं यथाभूतात्मदर्शनं सोयं प्रजापतिरीक्षामीक्षणं चक्रे कृतवान्स्म ह। कथमित्याह। यद्यस्मान्मत्तोन्यदात्मव्यतिरेके
णवस्त्वंतरं प्रतिद्वंद्वीभूतं नास्ति तस्मिन्नात्मविनाशहेत्वभावात्कस्मान्नु बिभेमीति तत एव यथाभूतात्मदर्शनादस्य प्रजापतेर्भयं वीयाय विस्पष्टमप

गतत्वात्तस्य प्रज्ञापतेर्यद्भयं तत्केवलाविद्यानिमित्तमेव परमार्थदर्शनेनुपपन्नमित्याहुः ॥ कस्माद्वा भेदवत्किमित्यसौ भीतवान्परमार्थभिः प्रमाणायो भयमनु
पपन्नमेवेत्यपि प्रायः । यस्मात्तु द्वितीयाद्वस्त्वंतराद्वै भयं भवति द्वितीयं च वस्त्वंतरमविद्याप्रत्युपस्थापितमेव न ह्यदृश्यमानं द्वितीयं भयजन्मने हेतुस्तत्त्वेको मो
हः कः शोक एकत्वमनुपश्यत इति मंत्रवर्णाद्यैकत्वदर्शनेन भयमनुपपन्नो ह्यपनोदित्तं न युक्तं कस्माद्वितीयाद्वस्त्वंतराद्वै भयं भवति न देकत्वदर्शनेन द्वितीयद
र्शनमपनीतमिति नास्ति यतः । अत्र चोदयंत्यपि तु नः प्रजापतेरेकत्वदर्शनं ज्ञातं केनात्मोपदिष्टं शास्त्राद्यानुपदिष्टमेव प्रादुरभूत् तस्माद्दादेरपि तथाप्रसंगा
द्धजन्मांतरकृतसंस्कारहेतुकमेकत्वदर्शनानर्थक्यप्रसंगो यथा प्रजापतेरतिक्रांतजन्मावस्थस्यैकत्वदर्शनं विद्यमानमप्यविद्यासंबंधकारणमात्मापनिन्ये
नाविद्यासंयुक्त एवायं जातो विशेषेदं सर्वेषामेकत्वदर्शनानर्थक्यप्रसंगोन्यत्वमेव निवर्त्तकमिति चेन्न सर्ववस्तुतः प्रसंगेनानैकांत्यात् । तस्मादनर्थकमेवैक
त्वदर्शनमिति नैष दोषः उत्कृष्टहेतूद्भवत्वाल्लोकवद्यथा पुण्यकर्मोद्भवैर्विविक्तैः कार्यकरणैः संयुक्ते जन्मनि मतिप्रज्ञामेधास्मृतिवैशारद्यं दृष्टं तथा प्रजा
पतेर्धर्मज्ञानवैराग्यैश्वर्यविपरीतहेतुसर्वपाप्मदाहाद्विशुद्धैः कार्यकरणैः संयुक्तमुत्कृष्टं जन्म तदुद्भवं चानुपदिष्टमेव युक्तमेकत्वदर्शनं प्रजापतेस्तथा च स्मृ
तिः ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टयमिति सहसिद्धत्वे भयानुपपत्तिरिति चेद्ब्रह्मादित्येन सह तमस्तदेतिनान्यानुप
दिष्टार्थत्वात्सहसिद्धवाक्यस्य श्रुतानान्यर्थप्रतिपादनादीनामहेतुत्वमिति चेत्स्यान्मतं श्रद्धावांल्लभते ज्ञानं तत्परः संयतेंद्रियः न हि द्वितीयं प्रतिपत्तेत्येवमादी
नां श्रुतिस्मृतीनां ज्ञानहेतूनामहेतुत्वं प्रजापतेरिव जन्मांतरकृतकर्महेतुत्वे ज्ञानस्येति चेन्न निमित्तविकल्पसमुच्चयगुणवद्गुणवत्त्वभेदोपपत्तेर्लोके
हि नैमित्तिकानां कार्याणां निमित्तभेदोनेकधा विकल्प्यते तथा निमित्तसमुच्चयस्तेषां च विकल्पितानां समुच्चितानां च पुनर्गुणवद्गुणवत्त्वकृतो भेदो भवति राम०
तद्यथा रूपज्ञान एव तावत्तैमिरिककार्ये तमसि विधिना लोकेन वस्तुरूपसन्निकर्षेणक्षरणेन प्रज्ञाननिमित्तं भवति मनस एव केवलं रूपज्ञाननिमित्तं योगिना १७

स्वदेहेमितीनां तु सन्नि [illegible] कर्षादीनां कार्याणां सहतत्वादिन्द्रियवृत्त्यालोकोत्कर्षो हि दृष्टः स्वकुड्ये निमित्तभेदे दृष्टश्च नि कर्मोत्कर्षात्कालोकविशेष एव तद्गुणवत्त्वनभदं
रैरेव भवात्मैकत्वज्ञा नेपि कर्तृविज्ञानान्तरकृतं कर्मनिमित्तं न तु नि [illegible] दृष्टा स्वज्ञापकत्वेऽपि कर्तृविज्ञानं निमित्तं न प्रमातृस्यापि विज्ञानस्य विनिवृत्तिश्च नेः क्वचिदाचार्यवा
न्पुरुषो वेद श्रद्धावा न्लभते ज्ञानं न हि दृष्टिप्रतिपानेनाचार्याद्धैव इत्युच्यः श्रोतव्य इति श्रुतिस्मृतिभ्यः एकान्तज्ञानलाभनिमित्तत्वं श्रद्धाप्रभृतीनामधर्मादि
निमित्तवियोगहेतुत्वाद्दर्शनश्रवणमनननिदिध्यासनानां च साक्षाज्ज्ञानानुज्ञेयविषयत्वात्पापादिप्रतिबंधक्षये चात्ममनसोर्भूतात्मज्ञाननिमित्तत्वात्साध्यात्तस्मा
दहेतुत्वेन विज्ञानस्य प्रवृत्तिप्रतिपादनादीनामितीदन्त्वं संसारविषय एव प्रजापतित्वं। यतः सप्रजापतिः। वै नैव रेमे रतिं नान्वभवदरत्याविष्टोऽभूदित्यर्थः। अस्म
दादिवदेव यत इदानीमपि तस्मादेकाकित्वादिधर्मवत्त्वादेकाकी न रमते रतिं नानुभवति रतिर्नामेष्टार्थसंयोगजा क्रीडा तत्प्रसंगिन इष्टवियोगे मनस्या
कुलीभावोऽरतिरित्युच्यते स तस्या अरतेरपनोदनाय द्वितीयमरत्युपघातसमर्थं स्त्रीवस्त्वैच्छद्गृद्धिमकरोत्। तस्यैवं स्त्रीविषयं गृध्यतः स्त्रियापरिष्वक्त
स्यैवात्मनो भावो बभूव स तेनैतावान्। इह एतावानेतत्परिमाण आस बभूव ह किंपरिमाण इत्याह यथा लोके स्त्रीपुमांसावरत्यपनोदाय संपरिष्वक्तौ य
त्परिमाणौ स्यातां तथा तत्परिमाणो बभूवेत्यर्थः। स तथा तत्परिमाणमेवेममात्मानं द्वेधा द्विप्रकारमपातयत्पातितवानिममेवेत्यवधारणं मूलकारणाद्वि
राजो विशेषणार्थं न क्षीरस्य सर्वोपमर्देन दधिभावापत्तिवद्विराट् सर्वोपमर्देनैतावानास किं तर्ह्यात्मना व्यवस्थितस्यैव विराजः सत्यसंकल्पत्वादात्मव्यतिरिक्तं द्वि
तुं परिष्वक्तपरिमाणं शरीरान्तरं बभूव स एव च विराट् तथाभूतः स हैतावानासेति सामानाधिकरण्यात्। ततः तस्मात्पातनात्पतिश्च पत्नी चाभवतामिति दंपत्योर्नि
र्वचनं लौकिकयोरत एव तस्माद्यस्मादात्मन एवार्धः पृथग्भूता येयं स्त्री तस्मादिदं शरीरमात्मनोऽर्धबृगलं अर्धं च तद्बृगलं च विदलं अर्धबृगलं अर्धविदल
मिवेत्यर्थः। प्राक्स्त्र्युद्वहनात्कस्यार्धबृगलमित्युच्यते। स्व आत्मन इत्येवमाह स्मोक्तवान्किल याज्ञवल्क्यः। यज्ञस्य वल्को य ज्ञवल्कः तस्यापत्यं याज्ञव

का

न्द्रेणादेवतानिरित्यर्थः ब्रह्मणोवापत्यं यस्मादयं पुरुषाईश्चाकाशस्थाईश्रून्यः पुनरुद्धृहृनात्तस्मात्सूर्यमेस्फुरेद्येन पुनः संपुटीकरणेनेवविदलाईः॥ तांसब्रह्मा
१८ पतिर्मन्त्राध्यः ज्ञानरूपात्यामात्मनोदुहितरं पत्नीत्वेनकल्पितां समभवन्मैथुनमुपगतवांस्ततस्तस्मात्तदुपगमनात्मनुष्याश्रजायंतेत्यन्नाः॥ ज्ञानरूपाद्ब्रह्म
रूपं सेयंदुहितृगमनेस्मार्त्तंइतिपिधमनुस्मरंनीक्रौंचकेकथंचिद्विदमरूपंयन्मा मात्मनएवमनयित्वेत्याद्यसंनवनुपगछनियद्यथ्यंनिर्दिष्टेनः अहंहंतेदा
नांनिवेसानिडान्यंमरेणनिरस्कृतामवानीत्येवमीक्षित्वासागोरूमवदुत्पाद्यप्राणिकर्मभिश्चोद्यमानायाः पुनःपुनः सैवमतिः ज्ञानरूपायाः मनोश्चाभवत्
नश्चऋषभरूनरः तांसमेवाभवदित्यादिहृर्वविज्ञेनागावोजायंततथाश्ववेनरामवदृश्चृषरूनरस्तथागर्दभीनरागर्दभरूनरः नत्वघुडवाश्वहपादीनांसंग
मात्ततनएकशफंएकखुरमश्वाश्वतरगर्दभाख्यंत्रयमजायत नतथाजेनरामनवरूनरस्तथाविशिनरामेषरूनरः तांसमेवाभवत्तेनात्मिनिवीर्स्याना
मजातामविचेतिसममवदेवेत्यर्थः ननक्कनाश्वावयश्चाजावयोजायंते एवमेवयादिदं किंचयत्किंचेदं मिथुनंस्त्रीपुंलक्षणंहृदमापिपीलिकाभ्यःपिपीलिका
भिः सहानेनैवन्यायेनतत्सर्वमसृजततस्मृष्टवानुससप्रजापतिः सर्वमेवंजगत्सृष्ट्वाऽवेत्कथमहंवाव अहमेवसृष्टिः सृज्यजगत्तस्मृष्टंजगदुत्पानेस्मृष्टिरिति यन्मया
सृष्टंजगत्तन्मदभेदत्वादहमेवास्मि नमत्तोव्यतिरिच्यतेकुतएतदहंहियस्मादिदं सर्वंजगदसृक्षि सृष्टवानस्मि तस्मादित्यर्थः यस्मात्सृष्टिशब्देनात्मानमेवोक्तवा
न्प्रजापतिः तत्तस्मात्सृष्टिरभवत्सृष्टिनामाभवत्सृष्ट्यांजगतिहृअस्यप्रजापतेरेतस्यामेतस्मिन्जगतिसः प्रजापतिवत्स्रष्टाभवतिस्रष्टात्मनोनन्यभूतस्य
जगतोयएवंप्रजापतिवद्यथोक्तंस्वात्मनोनन्यभूतंजगत्साध्यात्माधिभूताधिदैवंजगदहमस्मीतिवेद॥ ॥एवंसप्रजापतिर्जगदिदं मिथुनात्मकंसृष्ट्वाब्राह्म
णादिवर्णनियंत्रीदेवताः सिसृक्षुरादावथेतिशब्दः हृयमभिनयप्रदर्शनार्थमनेनप्रकारेणमुखेहस्तौप्रक्षिप्याभ्यमंथदित्याभिमुख्येनमंथनमकरोत्समुखाद्धस्ता राम०
भ्यांमथित्वासमुखाद्योनेर्हस्ताभ्यांचयोनिभ्याम् अग्निंब्राह्मणजातेरनुग्रहकर्तारमसृजतसृष्टवान्यस्माद्द्वाभ्यांमुखहस्ताभ्यांयोनिरेतदुभयंहस्तौमुखंचतस्मादु १८

श्रौ २ नो १५

मयमध्येन दलोमकेलोमचर्मिणिनं किं सर्वमेवन श्रेनरनः । अर्मन्नर । स्त्रि हियोन्या सामान्यत्वम यस्यास्य कि मलोमका हियो निरं नरनः स्त्रीलिंगं तथा ब्राह्मणे
पि मुखादेव हृदि प्रजापतेस्तस्मादेकयोनित्वा छेनेयानुजोनुग्रहमेनिना ब्राह्मणः तस्माद्ब्राह्मणोनिर्दिष्ट वयोमुखवीर्यं श्लेति श्रुतिस्मृतिसिद्धं । तथा बलाश्रया
ष्यां बाहुभ्यां बलमिदादिकं क्षत्रियजातेर्नियंतारं क्षत्रियं च तस्मादिदं क्षत्रं बाहुवीर्यं चेति श्रुतौ स्मृतौ चावगंतव्यं तथोरुतन इहा चेष्टाश्रयाद्दूस्यादिलक्षणं विशेषोनि
र्यंतारं विशं च तस्मात्कृष्यादिपरो वैश्यस्यादिदेवस्य सृष्टेश्च यः तथा पूषणं पृथिवीदेवतां शूद्रं च पद्भ्यां परिचरणक्षममसृजतेति श्रुतिप्रसिद्धेः तत्र कृतादिदेवता सर्ग
मिहानुक्तोवक्ष्यमाणमनुक्तवतुपसंहरति सृष्टिमाकल्पान्तकीर्त्यथेयं श्रुतिर्यथैव स्थिता तथा प्रजापतिरेव सर्वदेवाद्युत्पत्तिनिमित्तिनोर्थः । स्तुवरतस्य ब्राह्मणां प्रजा
पतिनेव तु सृष्टत्वाद्देवानामर्थैव प्रकरणार्थं स्यैव स्थितेनेन कात्स्न्यमित्राद्येणाविहन्मंत्र नर निंदो पस्या सोमनिंदा निंदार्थे किंतु अन्यनिंदा स्तुनये नतु कर्मप्रक
रणे केवल याज्ञिकाः यागकाले यदिदं वक्ष्याद्युरमुमग्निं यज्ञामुमिंदुं यजेत्यादिनामस्तोत्रकर्मादिभिन्नत्वाद्भिन्नमेवान्यादिदेवमेकैकं मन्यमाना आहुरित्यभिप्रा
यस्तन्नतथाविधात् कस्मादेतस्यैव प्रजापतेः सा विसृष्टिर्देवभेदः सर्वः एष उ ह्येव प्रजापतिरेव प्राणः सर्वे देवा अत्र विज्ञतिपद्यते परस्यैव हिरण्यगर्भेद्व्रतोकैसंसारीत्य
परोपरस्यैव तु मंत्रवर्णादिदं मित्रं वरुणमग्निमाहुरिति निरुक्तिरिति विपश्चितेषवद्वहुश्च एव प्रजापतिरेते सर्वे देवा इति निरुक्ते स्मृतेश्च एनमेके वदंत्यग्निं मनुमन्ये प्रजापतिमित्यपि
सावर्ती ह्रियाया हः सूक्ष्मो ग्रन्थः सनातनः सर्वभूतमयोचिंत्यः स एव स्वयमुद्बभौ विनिर्हिं मार्येवना स्यात्सर्वोन्याख्यान अत्रो षड्निरुक्तेनेहस्तं मा शिलः स्या मृदाह प
संशोक्ति नयारनिसंयोगश्च बलाज्ञाघ्रयस्मात्तः सन्नुष्टनानस्तजेनेति हि तत्परामर्श पश्यतन्नायमानमिति वमंत्रवर्णा स्मृतेश्च कर्मविपाकप्रक्रियायां ब्रह्मा विश्वसृ
ज्ञाधर्मो महानव्यक्तमेव चातन्नमांसाद्विकामेनांगमिमाहुर्मनीषिणः । इत्यादौ विनिरूढार्थानुपपत्तेः ज्ञानमाण्यहानघानद्वितिचेन्न कल्पनांतरोपपत्तेरविरोधात्
वपाविविशेषसंबंधाद्धिकल्पनांतरमुपपद्यते आसीनो दूरं व्रजति शयानो याति सर्वतः कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हतीत्येवमादिश्रुतिस्मृतेषु पाधिवशात्संसा

रित्वं परमार्थतः स्वतोऽसंसार्येवमेकत्वं नानात्वं च हिरण्यगर्भस्य तथा सर्वजीवानां तत्त्वमसीति श्रुतेः हिरण्यगर्भस्तूपाधिशुद्ध्यतिशयापेक्षया प्रायशः
पर एवेति श्रुतिस्मृतिवादाः प्रवृत्ताः संसारित्वं तु क्वचिदेव दर्शयन्ति जीवानां तूपाधिगताशुद्धिबाहुल्यात्संसारित्वमेव प्रायशोऽभिलप्यते। व्यावृत्तकृत्स्नोपा
धिभेदापेक्षया तु सर्वः परत्वेनाभिधीयते श्रुतिस्मृतिवादैस्तार्किकैस्तु परित्यक्तागमबलैरस्ति नास्ति कर्ताऽकर्तेत्यादि विरुद्धं बहु तर्कयद्भिराकुलीकृतः
शास्त्रार्थस्तेनार्थनिश्चयो दुर्लभो ये तु केवलशास्त्रानुसारिणः शान्तदर्पास्तेषां प्रत्यक्षविषय इव निश्चितः शास्त्रार्थो देवतादिविषयः। तत्र प्रजापतेरेकस्य
देवस्यात्राद्यलक्षणो भेदो विवक्षित इति तत्राग्निरुक्तोऽत्ता सोम इदानीमन्नमुच्यते यत्किंचेदं लोके आर्द्रं द्रवात्मकं तद्रेतस आत्मनो बीजादसृजत रे
तस आप इति श्रुतेः द्रवात्मकश्च सोमः तस्माद्यदार्द्रं प्रजापतिना रेतसः सृष्टं तदु सोम एव एतावद्वै एतावदेव नातोऽधिकमिदं सर्वं किं तदन्नं चैव सोमोऽन्नमा
प्यायकमन्नादश्चाग्निरौष्ण्याद्रूक्षत्वाच्च तन्नैवमवध्रियते सोम एवान्नं यदद्यते तदेव सोम इत्यर्थो य एवात्ता स एवाग्निरर्थबलादवधारणमग्निरपि हि
हूयमानः सोमपक्षस्यैव सोमोऽपीज्यमानोऽग्निरेवात्तृत्वादेवमग्नीषोमात्मकं जगदात्मत्वेन पश्यन्न केनचिद्दोषेण लिप्यते प्रजापतिश्च भवति सैषा ब्रह्मणः
प्रजापतेरतिसृष्टिरात्मनोऽप्यतिशया कासेत्याह यच्छ्रेयसः प्रशस्यतरानात्मनः सकाशाद्यस्मादसृजत तद्देवानसृजत तस्मादेव सृष्टिरतिसृष्टिः कथं पुनरात्म
नोऽतिशया सृष्टिरित्यत आह यद्यस्मान्मर्त्यः सन्मरणधर्मा सन्नमरणधर्मिणो देवान्कर्मज्ञानवह्निना सर्वानात्मनः पाप्मन उषित्वासृजत तस्मादियमतिसृ
ष्टिरुत्कृष्टज्ञानस्य फलमित्यर्थः। तस्मादेतामतिसृष्टिं प्रजापतेरात्मभूतां यो वेद स एतस्यामतिसृष्ट्यां प्रजापतेर्भवति प्रजापतिवदेव॥ तद्धेदं तर्ह्यव्याकृत शाम०
मासीत्तर्हि चेति केचित्संसारबन्धं ज्ञानकर्मलक्षणं कर्त्राद्यनेककारकापेक्षं प्रजापतित्वफलावसानं साध्यमेतावदेव यदेतद्व्याकृतं जगत्संसारो यथैतस्यैव साध्य १९
साधनलक्षणस्य व्याकृतस्य जगतो व्याकरणात्प्रागवस्था बीजावस्था यां तां निर्दिदिक्षुरङ्कुरादिकार्यानुमितामिव वृक्षस्य कर्मबीजोऽविद्याक्षेत्रो ह्यसौ संसा

रइक्तः समूलमुद्धर्तुं यद्दूर्न्निनडुडूर लोहि पुरुषार्थपरिसमाप्तिस्तथा चोक्तं ऊर्द्धमूलोवाङ्शाख इति काठके गीतासु पुराणे च वृक्ष इत्युक्तः सनातन इति
नहैनदिति निवीजावस्थ्य जगत्सागुत्पत्तेर्महिन्मिन्नु कालेपरोक्षत्वात्सर्वनाम्नोऽपत्न्य हृत्वाभिधानेनाभिधीयते भूतकालसंबंधित्वाद्याख्यानमाविर्मोजगतः सुखयहृण
र्थे मेमिति प्रयोगो हृशाहूः एवं हृतदासीदित्युच्यमाने सुखेनां परोक्षमपि जगतोवस्थांप्रति पद्यते युधिष्ठिरो ह किल राजासीदित्युक्तेयद्वदिदमितियाख्यानं नामत्र
पान्मकं साध्यसाधनतत्रूपं यथावलिनमभिधीयतेनदिदं शाहृयोः परोक्षत्वप्रत्यक्षत्वस्य जगद्वाचकयोः सामानाधिकरण्यादेकत्वमेवपरोक्षत्वप्रत्यक्षत्वस्यस्य
डगनोवगम्यतेनदेवेदमिदमेव चेतद्याख्यानमासीदित्यत्रैवेसतितासतत्प्रत्यक्षत्वेसतो विनाशः कार्यस्यैवमवष्टंभत्वनिनदेवं भूतंजगदयाख्यानं सत्तामरूपा
न्यामेव नाम्नारूपेलोवच याक्रियनाह्याक्रियतेनिकर्मकर्तृप्रयोगान्स्वयमेवात्मैव याक्रियतेनिविधात्मक्रियतन्विस्पष्टंनामरूपविशेषावधारणमर्यादंद्यक्री
भावमापद्यतमामर्थ्यादाक्रियनियंतृकर्तृसाधनक्रियाभिभिन्नंश्च सोनामेतिसर्वनाम्नाविशेषाभिधानेननाममात्रंव्युपदिश्यतिदेवदत्तोयज्ञदत्तइतिवाना
साम्पत्यसौ नामाश्रयं नथदमितिशुक्लकृष्णादीनामविशेषद्रूढंशुक्लेदंकृष्णंवारूपमस्येतीदंरूपंज्ञ इदमव्याकृतंतदव्येन तर्ह्येतस्मिन्नपि कालेनामरूपाभ्या
मेव व्याक्रियतेसौनामायमिदंरूपमितियदर्थः सर्वशाखाग्रंमेय स्मिन्नविषया स्वामा विक्रियाकर्तृक्रियाफलाध्यारोपणात्कनायः कारणंसर्वस्यजगतो यदा
न्मकेनामरूपेसमिलादिवस्वच्छात्मतामिवफेनमव्याकृतेव्याक्रियेतेयस्तुनाम्नांनामरूपाभ्यांविनकृणः स्वतो भिन्न शुद्धबुद्धमुक्तस्वभावः सएषोऽव्याकृतेश्रा
त्मभूतेनामरूपेव्याकुर्वन्नब्रह्मादिस्तंबपर्यंतेषुदेहेषु प्रविष्टः कर्मफलाश्रयेषु शनायादिमत्सुबुद्धिषु इः नत्रव्याकृतंस्वयमेवव्याक्रियतेत्युक्तंकथमिदमिदानीमुम
तेपरएवब्रह्मात्माव्याकृतं व्याकुर्वन्निहप्रविष्टइतिनैषदोषः परस्यात्मनोऽव्याकृतजगदात्मत्वेन विवक्षितत्वादाक्षिप्तंनियंतृकर्तृक्रियानिमित्तंहिजगदव्याकृतं
तेव्याक्रियतेत्यवोचामेदंशब्दसामानाधिकरण्याच्चाव्याकृतशब्दस्य यथेदंजगन्नियंत्राद्यनेककारकनिमित्ताद्विविशेषवद्व्याकृतंतथापरिमिताकानमविशेष

१० वदेवात्मस्याज्ञातत्वात्कृत्स्नाया एकत्र मात्रं तु विशेषो द्रष्टव्यो लोके विवक्षातः शब्दप्रयोगो ग्रामस्य धान्यो ग्रामः स्यन्द इति कदाचिद्ग्रामशब्देन निवासमात्रवि
वक्षायां ग्रामः स्यन्द इति शब्दप्रयोगो भवति कदाचिन्निवासि जन विवक्षायां ग्रामस्य ग्रामस्तुष्ट इति कदाचित्तूभयविवक्षायामपि ग्रामस्य च कृत्स्न प्रयोगो भवति
ग्रामं च गच्छ विशेषो क्तिनि तथात्र ह दिह्रापि ज्ञानादिदं ध्याकृत्स्नमध्यात्मकं चेत्यभेदविवक्षायामात्मनात्मनो भवति व्यपदेशः तदेवं ज्ञानादुत्पत्तिं विना ज्ञानात्मकमि
ति केवलज्ञानव्यपदेशस्तथा महानजश्चात्मा त्यूलोनन्तुः स एष नेतिनेतीत्यादि केवलात्म व्यपदेशः॥ ॥ननु परेणाध्याकृत्स्नीध्याकृत्स्नं सर्वगताध्यात्मं सर्व
दा ज्ञानात्मकथमिह प्रविष्टः परिकल्प्यन्ते विशेषादिति दिशः परिच्छिन्नेन प्रवेष्टुं शक्यते यथा तु रूपेण ग्रामादिनां का नौ किं चिन्निमज्ञविश्वात्मा त्मानाम
पादिविद्र्भौमान्तरेणैति चेद्यथापि स्यान्नपरश्चात्मा स्वेनैव रूपेण प्रविश्य किं न हित तस्य एवं धर्मीनारेणापज्ञायनेनेन प्रविष्टरूपस्य परिचर्यनेयथा पापाणेस्म
हजोन्तस्थः सर्पैनाशिकेरेवानो यंनन्तः स्त्रष्टानदेवानुप्राविशदिति श्रुतेः यः सप्रसमभावांतरमनापन्न एव कार्यं सृष्टा पश्चात्प्राविशदिति हि श्रूयते ।य
थामुक्ताद्वती निमुक्तिममिक्रिययोः पूर्वापरकालयोरिनरेन रविच्छेदाविशिष्ट स्तकर्त्तान दृष्टि हापि स्यान्ननुतन्त्यस्यैव भावान्तरोपजननं तत्संभव
तिनत्वयानंतरेणविपुरुषस्यानांतरसंयोगलक्षणः प्रवेशोनिरवयवस्यापरिच्छिन्नस्य दृष्टः सावयव एव प्रवेशाश्रवणादिति चेन्न दिशोप्यमूर्त्तः सु
रूपोनिःकलनिः क्रियमित्यादिश्रुतिभ्यः सर्वव्यपदेश्यधर्मविशेषप्रतिषेधश्रुतिभ्यश्च प्रतिबिंबप्रवेशवदिति चेन्नवस्त्वन्तरेणविप्रकर्षानुपपत्तेः द्रव्ये
गुणप्रवेशवदितिचेन्नानाश्रित्वान्नित्यपरतंत्रस्यैवाश्रितस्य गुणस्य द्रव्ये प्रवेश उपचर्यते। न तु ब्रह्मणः स्वातंत्र्यश्रवणात् तथा प्रवेश उपपद्यते। फलेबीज शाम०
वदितिचेन्नसावयववद्धादृद्धयोत्पत्तिविनाशादिधर्मवद्बपसंगात्। नैवं धर्मवद्ब्रह्मणो ज्ञेऽन्तरस्यादिश्रुतिभ्या यविरोधादन्य एवं संसारी परिछिन्न इह १०
प्रविष्ट इति चेन्नसेयं देवनेता रभ्यनामरूपेव्याकरवाणीतिनस्यापव प्रवेशाध्याकरणकर्त्तृत्वश्रुतेर्न्यथा तत्सृष्टानदेवानुप्राविशत्स एतमेव सीमानं विदार्यै

छां०भा० २२

दकर्थं पुनः पश्यन्वेदेत्याह नेत्येव आत्मादृष्टि प्राणादीनि विशेषणानि यान्युक्तानि तानि यस्य स आत्मवन्नानेत्युच्यते मनत्थरूपस्य विशेषोपसंहारी समूह
त्वेनानवनिवक्षमात्ररूपेण हि प्राणाद्युपाधिविशेषक्रियाजनितानि विशेषणानि यानि तानि यावत्कृत्स्नं निश्चायनीव लेनायमीवेति तस्मादात्मेत्येवोपासीतेति नप
त्वेनात्मेत्येव स्वरूपेण [illegible] गृह्यमाणोऽसवति कस्मात् कृत्स्नत्वात् ह्यत्रात्मन्यात्मनि हि यस्मान्निरुपाधिके जलसूर्यप्रतिबिंबभेदादुवादित्ये प्रा
णाद्युपाधिकृता विशेषाः प्राणादिकर्मजनामाभिधेयाः यथोक्ता ह्येते एकमभिन्नं तामवं निशन्निपद्यन्ते [illegible] अनात्मेत्येवोपासीतेति नानाप्रर्थं विधिः पक्षे प्रा
पाद्यवस्था पादृपरोक्षद्वस्तुकतनमात्मेत्येवार्थं विज्ञानमयद्रूपेवमाद्यात्मप्रतिपादनपराणि श्रुतिनिमित्तात्मविषयं विज्ञानमुत्पादितं तदात्मस्वरूप विज्ञाने
नैवत हृषयात्मात्माभिमान बुद्धिः कारक क्रियाफलाध्यारोपणात्मिका विद्यानिवर्तिता तस्यानिवर्तिता घांकामादिदोषानुपपन्नेत्वात्मचिंतानुपप
त्तिः पाक्षिकोऽप्यादात्मचितैवततस्मात्तदुपासनमप्राप्तं केन विधानं यं यत्र ज्ञानिष्ठ तु नावत्यादिकाप्रोपासनप्राप्तिनित्यावेत्यपूर्वविधिः स्यात् ज्ञानोपासन
योरेकत्वेऽस्य पासनमात्रमविदंति विज्ञानं तत्स्यात्मेत्येवोपासीतेत्यभिधानाद्वेदोपासनशब्दयोरेकार्थता गम्यते नहि नसर्ववेदात्मानमेवावेदित्यादिश्रुतिभि
श्च विज्ञानमुपासनं तत्स्यावात्मत्वाद्विष्टहैवं नत्वतरूपात्वारव्याभेतु कपयहतिरूपपद्यते तस्मात् सर्वविधिरेवायं कर्मविधिसामान्याच्चयथायज्ञेतनजुहुयादित्या
दयः कर्मविधयो न तेऽस्यात्मेत्येवोपासीतात्मानाऽऽत्मारदृष्टव्य इत्यादयोऽऽत्मोपासनविधेर्विशेषो गम्यते मानसक्रियात्वाच्च विज्ञानस्य यथा यस्यै देवतायै हविर्गृही
तं स्यात्तां ध्यायेद्वषट्करिष्यन्नित्याद्या मानसीक्रिया विधीयते नत्यात्मेत्येवोपासीत मंतव्यो निदिध्यासितव्य इत्याद्याः क्रिया विधीयंते ज्ञानात्मिका तथावेदोपासना वे
दोपासनशब्दयोरेकार्थत्वमितिभावनाशब्दयोपपन्ने अयथाहियज्ञेनेत्यस्यां भावनायाः किं केन कथमिति निराकांक्षाकांक्षापनयकारणमेवात्रयमवगम्यते ना राम० २२
त्मोपासीतेत्यस्यामपि भावनायां विधीयमानायां किमुपासीत केनोपासीत कथमुपासीतेत्यस्यामाकांक्षायामात्मानमुपासीत मनसा त्यागब्रह्मचर्यशमदमोपर

वीरो

तथाहारापाद्यनसर्वाशिरूपालिविधिर्यत्नात्मानिहत्वाभिवदन्त्यदास्ते कुमार स्तन वाकुमारी वसीर्णोदंडेन वंचसि पुरश्चकेदृषं दृषमिति च मतंवर्णान्नपरा
दन्यस्य प्रवेशः प्रविष्टानामितरेतरभेदाभावात्के ऋतं मितिचेन्न कोदेवो बहुधा सन्निविष्टः एकः सन्बहुधा विचारयमेकोऽसि बहूननुप्रविष्ट एको देवः सर्वभूतेषु गूढ
ढः सर्वव्यापी सर्वभूतान्तरात्मेत्यादिश्रुतिभ्यः प्रवेश उपपद्यते नोपपद्यतइतिनिष्ठेनतु नावत्यविद्या तां संसारित्वान्नदनन्यत्वाच्च परस्य संसारित्वमितिचेन्नाशना
य यक्ष्याद्यत्ययेऽक्षतेः सुखित्वदुःखित्वाद्यदर्शनात् नेतिचेन्न लिप्यते लोकदुःखेन बाह्य इति श्रुतेः प्रत्यक्षादिविरोधादयुक्तमिति चेन्नोपाध्याश्रयजनितविशेषविषि
षयत्वात्प्रत्यक्षादेर्न दृष्टेर्द्रष्टारं पश्येर्विज्ञातारमरे केन विजानीयादविज्ञातं विज्ञात्रित्यादिश्रुतिभ्यो नात्मविषयं विज्ञानं किंतर्हि बुद्ध्याद्युपाध्यात्मप्रतिच्छायविष
यमेव सुखितोऽहं दुःखितोऽहमित्येवमादिप्रत्यक्षविज्ञानमयमहमितिविषयेण विषयिणः सामानाधिकरण्योपचारात् नान्योऽतोऽस्ति द्रष्टेत्यन्यात्मप्रतिषेधाच्च
देहावयवविशेष्यत्वाच्च सुखदुःखयोर्विषयधर्मत्वमात्मनस्तु कामाद्येत्यात्मार्थत्वश्रुतेरयुक्तमितिचेन्न यत्र वा अन्यदिव स्यादित्यविद्याविषयत्वात्मार्थवाभ्युपगमात्
त्मनः कं पश्येदित्यनानात्वे तत्र को मोहः कः शोक इत्यादि विद्याविषये तत्प्रतिषेधाच्च तान्मधर्मत्वं तार्किकसमयविरोधादयुक्तमिति चेन्नयुक्त्याप्यात्मनो दुः
खित्वानुपपत्तेर्नहि दुःखेन प्रत्यक्षविषयेणात्मनो विशेष्यत्वं प्रत्यक्षाविषयत्वादाकाशस्य शब्दगुणवत्वदात्मनो दुःखित्वमितिचेन्नैकप्रत्ययविषयत्वानुपपत्तेर्न
हि सुखग्राहकेण प्रत्यक्षविषयेण प्रत्ययेन नित्यानुमेयस्यात्मनो विषयीकरणमुपपद्यते तस्य च विषयीकरणे आत्मन एकत्वाद्विषय्यभावप्रसंगः एकस्यैव
विषयविषयित्वं दीपवदितिचेन्न युगपदसंभवादात्मन्यंशानुपपत्तेश्चैतेन विज्ञानस्य ग्राह्यग्राहकत्वं प्रत्युक्तं प्रत्यक्षानुमानविषययोश्च दुःखात्मनोर्गुणगुणि ३२
त्वेनानुमानं दुःखस्य नित्यमेव प्रत्यक्षविषयत्वाद्रूपादिसामानाधिकरण्याच्च संयोगजत्वेऽप्यात्मनि दुःखस्य सावयवत्वविक्रियावत्वानित्यत्वप्रसंगाद्दिविकल्पके
योगि द्रव्यं गुणः कश्चिदुपयन्नपयन्वाऽदृष्टः क्वचित् न च निरवयवं विक्रियमाणं दृष्टं क्वचिन्नित्यगुणाश्रयं वाऽनित्यं न चाकाशं आगमवादिभिर्नित्योऽभ्युपगम्यते न चा

२२

न्याहृष्टंतोनित्यत्वे त्वेवं क्रियमाणमपि नमस्त्वस्यानित्यत्वेर्भि त्यमेवेति चेन्न दृष्टस्यावयवान्यथात्वमनित्येकेन विक्रियानुपपत्तेः सावयवत्वे पि नित्यत्वमिति
चेन्न सावयवस्यावयवसंयोगपूर्वकत्वे सति विभागोपपत्तेश्च दृष्टःविवक्षीनात्रेनिर्वेद्यमनुमेयवान्संयोगपूर्वकत्वस्यतस्मात्मानोदुःखाद्यमित्यगुणाश्रयत्वोप
पत्तिः पम्यात्तुःखित्वेन्मस्य चदुःखितोमाभेतदुःखोपशमायशास्त्रारंभानर्थक्यमिति चेन्न मिथ्याध्यारोपितदुःखित्वभ्रमापोहार्थत्वादात्मनिष्प्रकृतसंख्याप्
थग्भ्रमापोहवत्स्यापि नतुःख्याम्यापगमायज्ञलसूर्यादिप्रतिबिंबवद्दात्मप्रवेशाप्रतिबिंबवद्व्यापकत्वेन कार्येषूपलम्भवं पांशुवत्तेरनुपलब्धत्वात्मापश्चा
त्कार्येव सृष्ट्वा कृत्वा बुद्ध्यंतरुपलभ्यमानः सूर्यादिप्रतिबिंबवज्जलादौ कार्यं सृष्ट्वा प्रविष्टइवलक्ष्मणानिर्दिश्यते।सएषइहप्रविष्टःनखाग्रेभ्यादेवानुप्रा
विश्यादेतमेव सीमानं विदार्येतयाद्वारा प्रापद्यत सेयंदेवनेकृतंहंतानुमिमास्तिसोदेवनाः अनेनजीवेनात्मनानुप्रविश्येपियेवमादिभिः नतुसर्वगतस्यानिर
वयवस्यच्छिद्रदेशकालांतरापक्रमणप्राप्तिलक्षणः प्रवेशः कदाचिदप्युपपद्यतेनचप्रदात्मनोन्यापाक्लिनात्पदत्तोक्लिष्टानात्पदत्तोक्लिश्यांतिपादिष्कृतेत्य
वाचामउपलब्धार्थत्वाच्चसृष्टिप्रवेशास्थित्यप्ययवाक्यानामुपलब्धेः पुरुषार्थश्रवणात्सामान्यमेवावेत्मात्रंसर्वमन्नवद्वक्षविदाप्नोतिपरंसयोहवैतत्य
रंब्रह्मवेदब्रह्मैवभवत्याचार्यवान्पुरुषोवेदतस्यतावदेवचिरमित्यादिश्रुतिभ्यस्तत्तोमांतत्वतोज्ञात्वाविशतेतदनंतरं तदभ्यसर्वधियानांप्राध्यतेश्रूमतत्
त्वात्विस्मृतिभ्यश्चभेददर्शनापवादभावाद्वस्त्यादिवाक्यानामात्मैकत्वप्रदर्शनार्थप्रवृत्तोपपत्तितस्मात्कार्यस्थस्योपलभ्यत्वमेवप्रवेशत्वमुपचर्यते
॥अत्रवत्वायंप्रवात्यामार्यादंशात्मनश्चेतन्यमुपलभ्यते।नत्वकथमिवप्रविष्टइत्याहयथालोकेक्षुरधानेक्षुरोधीयतेक्लिन्नक्लिन्नक्षुरधानेक्लिन्नापिनाप
स्काराधानेक्षुरेन्यथा यथोपलभ्यते।ऽवहिःप्रवेशितःस्यात्याद्यथावाविश्वंभरोग्निर्विश्वस्यभरणाद्विश्वंभरःकुलायेनीडेग्निःकाष्ठादावह्निःस्यादित्यनुवर्त राम० २२
तेऽवहिसमथ्यमानउपलभ्यतेयथावक्षुरःक्षुरधानेकदेशस्थितोयथाचाग्निःकाष्ठादौसर्वतोव्याप्यावस्थितःएवंसामान्यतोविशेषतश्चदेहंसंव्याप्यावस्थि

कुर९

तःआत्मानन्तहिसप्राणनादिक्रियावान्दर्शनादिक्रियावांश्चोपलभ्यतेतस्मात्तत्रैवंप्रविष्टंतमात्मानंप्राणनादिक्रियाविशिष्टंनपश्यंतिनोपलभंते।तद्दृष्टान्तमेव
निषेधोयंनतंपश्यंतीतिदर्शनस्यप्रकृतत्वान्नेत्येवदोषःस्यात्त्वादिवाक्यानामात्मैकत्वप्रतिपादकत्वान्तस्यप्रकृतमेवतस्यदर्शनंदेवंत्वंपश्चान्निरूपणवचनंतदस्यकृत्स्नत्व
मितकृष्णायेतिर्येत्वर्णनत्वप्राणनादिक्रियाविशिष्टस्यादर्शनेहेतुमाहाकृत्स्नोसमस्तोहियस्मात्सप्राणनादिक्रियाविशिष्टःकृतःत्वसरकृत्स्नत्वमित्युच्यते
प्राणन्नेवप्राणनक्रियामेवकुर्वन्प्राणोनामप्राणसमाख्यःप्राणोभिधानोभवतिप्राणनक्रियाकर्तृत्वाद्धिप्राणःप्राणितीत्युच्यते।नान्यांक्रियांकुर्वन्यथाला
वकःपावकइतिलावकःक्रियांतरविशिष्टस्यानुपसंहाराद्कृत्स्नोहिसःतथावदन्क्रियांकुर्वन्वक्तीतिवाक्यंपश्यंश्चक्षुःशृण्वन्श्रोत्रंमन्वानोमन इति श्रोत्रंप्रा
णाद्येवप्राणोवदन्वाक्पश्यंश्चक्षुरिति क्रियाशक्त्युद्भवःप्रदर्शितोनामरूपविषयत्वादिह ज्ञानशक्तेःश्रो
त्रवक्षुषीविज्ञानस्यसाधनेविज्ञानंतुनामरूपसावयवंनहिनामरूपव्यतिरिक्तंविज्ञेयमस्तितयोश्चोपलंभनेकारणंचक्षुःश्रोत्रेक्रियाचनामरूपसाध्याप्राणसम
वायिनीतस्याःप्राणाश्रयायाःअभिव्यक्तौवाक्करणंतथापाणिपादपायूपस्थाख्यानिसर्वाण्युपलक्षणार्थानिदेवहिसर्वंव्याकृतंत्रयंवाइदंनामरूपंकर्मेति
हिवक्ष्यतिमनुतेनेनेतिमन्तुमनइतिज्ञानशक्तिविकासानांसाधारणंकारणंमनःमनुतेनेनेतिपुरुषःकर्तामन्वानोमनइत्युक्तेनानेनानिप्राणादीन्यस्यात्मनः
कर्मनामानिकर्मजानिनामानिकर्मनामान्येवनतुवस्तुमात्रविषयाण्यतोनकृत्स्नात्मवस्त्ववद्योतकान्येवंसमस्तात्मप्राणनादिक्रियानक्रियान्यानि
नप्राणनादिनामरूपाण्येकैकक्रियमाणोवद्योत्यमानोविमर्शोतेनात्माप्राणनादिक्रियासमुदायादेकैकंप्राणंचक्षुरितिवाविशिष्टमनुपसंहृतेतरक्रियात्मकं
मनसायमानेनसुपासेविंतयतिनसवेदनसम्यग्जानातिवस्तकस्मादकृत्स्नोसमस्तोहियस्मादेषआत्मअस्मात्प्राणनादिसमुदायादतःप्रविभक्तएकैकेनवि
शेषणेनविशिष्टःइतरधर्मान्तरानुपसंहाराद्भवतियावदयमेवंवेदतावत्कृत्स्नमिश्रमात्मानमविज्ञातमितिवाक्यभावःतस्मादेवंविशिष्टंवेदनावदंजस्माकृत्स्नमात्मानंवे

बृ०भा० वाप्तत्वाद्वेदस्यात्मप्रतिपादकवाक्यश्रवणादात्मविषयं विज्ञानमुत्पद्यमानं तद्विषयं मिथ्याज्ञानं निवर्तयदेवोत्पद्यते। आत्मविषयमिथ्याज्ञाननिवृत्तौ च तत्प्र
भवाः स्मृतयो नश्यन्ति स्वाभाविक्योऽनात्मवस्तुभेदविषयाः। अनर्थवासना नष्टा आत्मावगतेर्हि तत्प्रामाण्यात्। अनर्थत्वेनावगम्यते ऽनित्यदुःखाशुद्ध्यादिबहुदोष
२३ वत्त्वादात्मवस्तुनश्च तद्विलक्षणत्वात्तस्मादनात्मविज्ञानस्मृतीनामात्मावगतेर्भावप्राप्तिः पारिशेष्यादात्मैकविज्ञानस्मृतिसंततेरर्थत एव प्राप्तत्वान्न विधेयत्वं
दि शोकमोहभयायासादिदुःखदोषनिवर्तकत्वाच्च तत्स्मृतेः विपरीतज्ञानप्रभवो हि शोकमोहादिदोषः तथा च तरति शोकमात्मविदिति विद्वान्न बिभेति कुतश्चनेत्यभयं वै जनक प्रा
प्तोऽसि भिद्यते हृदयग्रन्थिरित्यादिश्रुतयो निरोधस्तर्ह्यर्थान्तरमिति चेत् अथापि स्याच्चित्तवृत्तिनिरोधस्य वेदवाक्यजनितात्मविज्ञानादर्थान्तरत्वात्तन्त्रान्तरेषु च कर्तव्य
तयावगतत्वाद्विधेयत्वमिति चेन्न मोक्षसाधनत्वेनानवगमात्। नहि वेदान्तेषु ब्रह्मात्मविज्ञानादन्यत्परमपुरुषार्थसाधनत्वेनावगम्यते। आत्मानमेवावेत् तस्मात्तत्सर्वमभव
त् ब्रह्मविदाप्नोति परं स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं अभयं हि वै ब्रह्म भवति य एवं वेदेत्येवमादिश्रुतिशतेभ्यः। अनन्यसा
धनत्वाच्च निरोधस्य। नह्यात्मविज्ञानस्मृतिसंतानव्यतिरेकेण चित्तवृत्तिनिरोधस्य साधनमस्ति। अभ्युपगम्येदमुक्तं न तु ब्रह्मविज्ञानव्यतिरेकेणान्यन्मोक्षसाधनमवगम्य
ते। आकाङ्क्षाभावाच्च भावनाभावो। यदुक्तं यजेतेत्येवमादौ किं केन कथमिति भावनाकाङ्क्षायां फलसाधनेति [illegible]
[illegible] कर्तव्यताभिराकाङ्क्षापनयनं यथा न तु दिह्यात्मविज्ञाने विधानुपपद्यत इत्यनिष्टदृष्टेके मेवाद्वितीयं तत्त्वमसि नेति नेति अनन्तरमबाह्यमयमात्मा ब्रह्मेत्या
दिवाक्यार्थविज्ञानसमकालमेव सर्वाकाङ्क्षाविनिवृत्तेर्न च वाक्यार्थविज्ञाने विधिप्रयुक्तः प्रवर्तते विशेषतः प्रयुक्तश्चोपासनवत्स्याद्दोषभये वाप्रमनश्चैकमेवाद्वितीयमित्या
दिवाक्येषु विधिरवगम्यते आत्मस्वरूपाख्यानेनैवावसितत्वात् वस्तुस्वरूपाख्यानमात्रत्वादप्रामाण्यमिति चेत् अथापि स्याद्यथा सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रु राम०
द्रत्वमित्येवमादौ वस्तुस्वरूपाख्यानमात्रत्वादप्रामाण्यमेवमात्मार्थवाक्यानामपीति चेन्न विशेषाभावात् वस्तुस्वरूपाख्यानं क्रियाख्यानं वा प्रामाण्यकारणं २३

किं तर्हि निश्चितफलवद्विज्ञानोत्पादकत्वं तद्यत्रास्ति तत्प्रमाणं वाक्यं यत्र नास्ति तदप्रमाणं किं च भोः पृष्टो भवान्। आत्मस्वरूपाख्यानपरेषु वाक्येषु फलवन्नि
श्चितं च विज्ञानमुत्पद्यते चेत् कथमप्रामाण्यमिति। किं वा न पश्यस्यविद्याशोकमोहभयादिसंसारबीजदोषनिवृत्तिं विज्ञानफलं शृण्वंश्चेमानुपनिषद्वाक्यानि तत्को मोहः कः शो
कः एकत्वमनुपश्यतः मन्त्रविदेवास्मि नात्मविच्छोऽहं भगवन् शोचामि तं मा भगवाञ्छोकस्य पारं तारयत्वित्येवमाद्युपनिषद्वाक्यशतान्येवं विधाने किं सोऽरोदीदित्या
दिषु निश्चितं फलवद्विज्ञानं न चेद्दृश्यते ऽस्त्वप्रमाणं तदप्रामाण्ये फलवन्निश्चितविज्ञानोत्पादकस्य किमित्यप्रामाण्यं स्यात् तदप्रामाण्ये वा दर्शपूर्णमासादिवाक्ये
ष्वपि विश्रम्भः। अथ दर्शपूर्णमासादिवाक्यानां पुरुषप्रवृत्तिविज्ञानोत्पादकत्वात्प्रामाण्यं स्याद्विज्ञानवाक्येषु तन्नास्तीति सत्यमेव नैष दोषः प्रामाण्यकारणोपपत्तेः प्रामा
ण्यकारणं च यथोक्तमेव नान्यदलंकारश्चायं यत्सर्वपुरुषप्रवृत्तिनिरोधफलवद्विज्ञानोत्पादकत्वमात्मप्रतिपादकवाक्यानां नाप्रामाण्यकारणं यत्तूक्तं विज्ञाय प्रज्ञां कु
र्वीतेत्यादिवचनानां वाक्यार्थविज्ञानव्यतिरेकेणोपासनार्थत्वमिति सत्यमेतत् किं तु न प्राग्विध्यर्थतापत्तिः प्रागस्यप्रियमार्थतैवेति कथं पुनरुपासनस्य पक्षप्राप्तिर्याव
ता पारिशेष्यादात्मविज्ञानस्मृतिसंततिर्नित्यैवेत्यभिहितं बाढं यद्यप्येवं शरीरारम्भकस्य कर्मणो नियतफलत्वात्सम्यग्ज्ञानप्राप्तावपि अवश्यंभाविनी प्रवृत्तिर्वाङ्मनःका
यानां लब्धवृत्तेः कर्मणो बलीयस्त्वान्मुक्तेष्वादिप्रवृत्तिवत्तेन पक्षे प्राप्तं ज्ञानप्रवृत्तेर्दौर्बल्यं तस्मात्त्यागवैराग्यादिसाधनबलावलम्बनेनात्मविज्ञानस्मृतिसंततिर्नियन्तव्या
भवति न त्वपूर्वा कर्तव्या प्राप्तत्वादित्यवोचाम तस्मात्प्राप्तविज्ञानस्मृतिसंतानानियमविध्यर्थानि विज्ञाय प्रज्ञां कुर्वीतेत्यादिवाक्यान्यन्यार्थासंभवादिति नोपासनमिति श
ब्दप्रयोगात् अथापि स्यादात्मेत्येवोपासीतेत्यादौ न प्रियादिगुणत्वेनोपास्यः आत्मा किं तर्हि प्रियादिगुणत्यागात् वेपास्य इत्यत्र हाप्रीतिपद आत्मशब्दप्रयोगात् आत्मगुणवदना
त्मवस्तूपास्यमिति गम्यते। आत्मोपास्य इत्यवाक्यशेषे लक्षणाच्च परे लोकं वक्ष्यमाणमेव लोकमुपासीतेति। तत्र च वाक्ये आत्मैवोपास्यत्वेनाभिप्रेतो द्वितीयाश्रवणादा
त्मानमेवेति। इदं तु न द्वितीयाश्रवणेऽपि इति पर आत्मशब्दः आत्मेत्येवोपासीतेत्यत्र नात्मोपास्यः आत्मगुणश्चात्मा त्विति गम्यते नैवं वाक्यशेषे आत्मनश्चोपास्यत्वेनावगम

मा०१

वृ०भा० २४
तथैव वाक्यस्य शेषः आत्मेत्येवोपासीतेत्यत्रैवं गम्यते नेदं तत्स्पदनीयमस्पसर्वस्य यदयमात्मा यदनेन ह्येतत्सर्वं वेद इति अत्र स्पदत्वमनुपासत्वादनुपासत्व
मिति वेदनाधिकारेऽन्यत्र तत्क्रमस्यैव दर्शनेनार्थेनोनतत्र परत्वं नीति प्रकृतेनोपादानात्तत्रात्मनोऽनुपासत्वमिति चेन्नान्यक्रमस्य दर्शनेन निषेधो निषेध्यस्य दो
पासिद्धान्यात्मोपासत्वप्रतिषेधात्प्राणनादिक्रियाविशिष्टत्वेन विशेषणाद्दात्मनश्चेदुपास्यत्वमनिषेधेनेत्यादि नाद्येकैकक्रियाविशिष्टस्यात्मनोऽकृत्स्नत्वव
चनमनर्थकं स्यादकृत्स्नो ह्येषोऽत एकैकेन भवतीत्येकैकविशिष्टत्वात्मा कृत्स्नत्वादुपास्य एवेति सिद्धं यत्नात्मशब्दस्यैतिपरः प्रयोगः स आत्मशब्दप्रत्यया
त्मनस्तस्य परमार्थतो विषयत्वज्ञापनार्थमन्यथात्मानमुपासीतेत्येवं न घावार्थादात्मनि आत्मशब्दप्रत्यययावनुज्ञानौ स्यातां न ज्ञातिं नेतिनेति विज्ञाता
रमरे केन विजानीयादविज्ञातं विज्ञातृत्यतो वावेति न तत्ते पाद्यमनसा सह इत्यादिश्रुतिभ्यः यत्तात्मानमेव लोकमुपासीतेति तत्त्वात्मोपासनप्रसंगात्सिद्धि
परत्वात्तद्वाक्यानन्तरं निर्जातत्वमात्मान्यादात्माज्ञानं स्पोऽन्नात्मा वचनत्रकस्मादात्मोपासनं एवं यत्र आत्मीयेनात्मनेत्येवोपासीतेति नेति न रविज्ञानं तु त्स्यात्मेत्येनेदं
नदेवं प्रकृतं पुदनीयं गमनीयं नान्यदस्य सर्वस्येति निर्दिष्टारणार्थी पदछित्त्विन्नत्वं विभिन्नमर्थः यदयमात्मा यदनेनात्मनं वेदं किं न विज्ञानं यमेवान्यन्न किं न हि ज्ञान
मस्य वेत्ति पदंस्थं ज्ञानं नरमपेक्षतेऽत्रात्मज्ञानात्कस्मादनेनात्ममात्राज्ञानेन हि यस्मात् सर्वमनात्मज्ञानमन्यत्र तत्सर्वं समस्तं वेद ज्ञानानि नन्यपज्ञानेनान्यत्र मज्ञायते तु
त्त्यस्य परिहारं तु दुष्यादिग्रंथेनवक्ष्यामः कथं पुनरेतत्स्पदनीयमित्युच्यते यथा ह वै लोके पदेन गवादिखुरांकितेनादेशः पदमित्युच्यते तेन पदेन नष्टं विविक्तं प
देनान्विष्यमाणोऽनुविंदेल्लभेतैवमात्मनि लब्धे सर्वमनुलभतेत्यर्थः न न्वात्मनि ज्ञाने न्यत्तज्ञायत इति ज्ञाने प्रकृते न लाभोऽप्रकृतं कथं नदइति न ज्ञानलाभयोरेका
र्थत्वस्य विवक्षितत्वाद्यस्मादालाभो ह्यात्मनो ज्ञानमेव नत्स्माज्ज्ञानमेवान्यत्नाभो नानात्मलाभवदप्राप्तप्राप्तिलक्षणात्मलाभो लब्धलब्धयोर्भेदाभावाद्यत्रात्म राम० २४
नोऽनात्मालब्धत्वेन प्रतिनन्वात्मालब्धलब्धयोऽनात्मसंप्राप्तस्यात्क्रियया व्यवहितः कारकविशेषोपादानेन क्रियाविशेषमुत्पाद्यतत्त्वयः सम्प्राप्त

नि ज्ञानोपासनप्रकरणस्यात्मोपासनविधिर्दृष्टत्वेनैवोपयोगो नेति नेत्यस्य सूत्रस्य केयं द्वितीयमञ्चनाद्यावीनत्वेवमादिवाक्यानां मुपास्यात्मस्वरूपविशेष समर्पणेनोपयोगः २

मनितिनेत्यादीनि कर्तव्यता संयुक्तविधिः इत्यादिशास्त्रेणैव समर्थितेत्यत्राशयं यथा च कृत्स्नस्पदर्शपूर्णमासादिप्रकरणस्य दर्शपूर्णमासादिविध्युद्दे
शात्वेनोपयोगः फलं च मोक्षो विद्यानिवृत्तिर्वाक्यपरे वर्णायं तु पासने नात्मविषयं विशिष्टविज्ञानं नरं नावयेनेनात्माज्ञायतेऽविद्यानिवर्तकं च न देवनात्मवि
षयं वेदवाक्यजनितं विज्ञानमिति नन्वात्मवर्थं वचनान्यपि विज्ञाय प्रज्ञां कुर्वीत द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः सोऽन्वेष्टव्यः स विजिज्ञासितव्य इ
त्यादीनि नार्थान्तरभावात्तस्मात्तात्स्येत्येवोपासीतेति स्वरूपविधिः कस्मादात्मस्वरूपकथनानात्मप्रतिषेधवाक्यजनितविज्ञानव्यतिरेकेणार्थान्तरस्य कर्तव्य
स्यासनस्यवा ह्यस्य चाभावान्न वहिर्विधेः साफल्यं यत्र विधिवाक्यश्रवणमात्रजनितविज्ञानव्यतिरेकेण पुरुषप्रवृत्तिर्गम्यते यथा दर्शपूर्णमासाभ्यां स्वर्गका
मो यजेतेत्येवमादौ न हि दर्शपूर्णमासविधिवाक्यजनितविज्ञानमेव दर्शपूर्णमासानुष्ठानं तत्राधिकाराद्यपेक्षानुभाविनु नेति नेत्याद्यात्मप्रतिपादकवाक्यज
नितविज्ञानव्यतिरेकेण दर्शपूर्णमासादिवत्पुरुषव्यापारः संभवति सर्वव्यापारोपशमहेतुत्वात्तद्वाक्यजनितविज्ञानस्य न ह्युदासीनविज्ञानं प्रवृत्तिजनकं व म०
ह्मात्मविज्ञानं निवर्तकत्वादेकमेवाद्वितीयं तत्त्वमसीत्येवमादिवाक्यानां न वचनान्तरेणेश्वरनिरूपप्रयते विरोधाद्वाक्यजनितं न विज्ञानमात्रमात्मज्ञानात्मविज्ञान
निरन्तरमिति चेत्तत्त्वमसीतिनेत्यात्मवेदमेकमेवाद्वितीयं ब्रह्मवेदमभृतेनान्यदनेनास्ति द्रष्टत्यादेवं विद्वानित्यादिवाक्यानां न ह्यादि ब्रह्मेष्टव्यविधेर्विषयसम
र्पकत्वेन ज्ञानीतिचेन्नार्थान्तरभावादित्युक्तोत्तरत्वात्तदात्मवस्तुस्वरूपसमर्पकैरेव वाक्यैस्तत्त्वमसीत्यादिभिः श्रवणकाल एव तद्दर्शनस्य कृतत्वात् द्रष्टव्यविधेर्ना
नुष्ठानान्तरं कर्तव्यमित्युक्तोत्तरमेतदात्मस्वरूपाज्ञानव्याख्यानमात्रेणात्मविज्ञाने विधि समरेण न प्रवर्तनं इति चेज्ज्ञात्मवादिवाक्यश्रवणेनात्मविज्ञानस्य जनितत्वात्किं मो
हनस्यकरणं न श्रवणेऽपि न प्रवर्तनमिति चेन्नानवस्थाप्रसंगात्तथात्मवादिवाक्यार्थश्रवणेऽपि विधिमंतरेण न प्रवर्तते न तथा विधिवाक्यार्थश्रवणेऽपि विधिमंत
रेण न प्रवर्तिष्यत इति विध्यंतरापेक्षा न व्यार्थ श्रवणेऽपि नानवस्थाप्रसंगेन वाक्यजनितात्मज्ञानस्मृति संतते श्रवणज्ञानमात्रादर्थान्तरत्वमिति चेन्नार्थ

२५

मात्मानमेव प्रियमुपासीत स य आत्मानमेव प्रियमुपास्ते आत्मैव प्रियो नान्योऽस्तीति प्रतिपद्यतेऽन्यल्लौकिकं प्रियमप्यप्रियमेवेति निश्चित्योपास्ते चिंतयति न हास्यैवं
विदः प्रियं प्रमायुकं प्रमरणशीलं भवतीह नित्यानुवादमात्रमेतदात्मविदोऽन्यस्य प्रियस्याप्रियस्य चाभावादात्मप्रियग्रहणस्तुत्यर्थं वा गुणफलविधानार्थं वा मंदा
त्मदर्शिनः तच्छील्यस्य तथोपा यानात्॥ ॥सूत्रितं ब्रह्मविद्यात्मेत्येवोपासीतेति यदर्थोपनिषत्कृत्स्नापि तस्यैतस्य सूत्रस्य व्याचिख्यासुः प्रयोजनाभिधित्सयोपो
द्घातं करोति तदिति वक्ष्यमाणम नंतरवाक्येव द्योत्यं वक्ष्य आहुर्ब्राह्मणाः ब्रह्म विविदिषवो जन्मजरामरणप्रबंधचक्रभ्रमणकृतायासदुःखोदकापारमहोदधिप्लवभू
तं गुरुमासाद्य तत्तीरमुत्तितीर्षवो धर्माधर्मसाधनतत्फललक्षणात्साध्यसाधनरूपान्निर्विण्णास्तद्विलक्षणनित्यनिरतिशयश्रेयःप्रतिपित्सवः। किमाहुरित्याह
यद्ब्रह्मविद्यया ब्रह्म परमात्मा तद्यया वेद्यते सा ब्रह्मविद्या तया ब्रह्मविद्यया सर्वं निरवशेषं भविष्यंतो भविष्याम इत्येवं मनुष्या यन्मन्यंते मनुष्यग्रहणं विशेषतोऽधिकार
ज्ञापनार्थं मनुष्या एव हि विशेषतोऽभ्युदयनिःश्रेयससाधनेऽधिकृता इत्यभिप्रायो यथा कर्मविषये फलप्राप्तिं ध्रुवां कर्मभ्यो मन्यंते तथात्र ब्रह्मविद्यायाः सर्वात्मभावफ
लप्राप्तिं ध्रुवामेव मन्यंते वेदप्रामाण्यस्योभयत्राविशेषात् तत्र विप्रतिषिद्धं वस्तु लक्ष्यते। अतः पृच्छामः। किंतु तद्ब्रह्म यस्य विज्ञानात्सर्वं भविष्यंतो मनुष्या मन्यंते तत्कि
मवेद्यस्माद्विज्ञानात्तद्ब्रह्म सर्वमभवद्ब्रह्म च सर्वमिति श्रूयते। तच्चेदविज्ञाय किंचित्सर्वमभवत्तथान्येषामप्यस्तु किं ब्रह्मविद्यया। अथ विज्ञाय सर्वमभवद्विज्ञानसा
ध्यत्वात्कर्मफलेन तुल्यमेवेत्यनित्यत्वप्रसंगः सर्वभावस्य ब्रह्मविद्याफलस्यानवस्थादोषश्च तदप्यन्यद्विज्ञाय सर्वमभवत्ततः पूर्वमप्यन्यद्विज्ञायेति। न तावदवि
ज्ञाय सर्वमभवच्छास्त्रार्थवैरूप्यदोषात्फलानित्यत्वदोषप्रसक्तिः। नैकोऽपि दोषोऽर्थविशेषोपपत्तेर्यदि किमपि विज्ञायैव तद्ब्रह्म सर्वमभवत्पृच्छामः किमु तद्ब्रह्मावे
द्यस्मात्तत्सर्वमभवदिति॥ एवं चोदिते सर्वदोषानागंधितं प्रतिवचनमाह। ब्रह्मापरं सर्वभावस्य साध्यत्वोपपत्तेर्न हि परस्य ब्रह्मणः सर्वभावापत्तिर्विज्ञानसाध्या
विज्ञानसाध्यं च सर्वभावापत्तिमाह। तस्मात्तत्सर्वमभवदिति तस्माद्ब्रह्म वा इदमग्र आसीदित्यपरं ब्रह्मेह भवितुमर्हति मनुष्याधिकाराद्वा तद्भावी ब्राह्मणः स्या राम॰ २५

सर्वं भविष्यंतो मनुष्या मन्यंते ननु निर्दिष्टमनुष्याः प्रकृतास्तेषां चाभ्युदयनिःश्रेयससाधने विशेषतोऽधिकार इत्युक्तं न परस्य ब्रह्मणो नाप्यपरस्य प्रजापतेरतोऽद्वैतेक
त्वापरं ब्रह्म विद्यया कर्मसहितया परं ब्रह्मभावमुपसंपन्नोऽभ्युदयपक्षेऽन्तः सर्वं प्राप्तः कामकर्मबंधनः परब्रह्मभावी ब्रह्मविद्याहेतोर्देहेत्यभिधीयते इह लोके
पि भाविनीं वृत्तिमाश्रित्य शब्दप्रयोगो यथौदनं पचतीति यथा चैव परिव्राजकः सर्वभूताभयदक्षिणामित्यादि तथेह केचित् ब्रह्म ब्रह्मभावी पुरुषो ब्रह्मेति व्याच
क्षते। तन्न सर्वभावापत्तेरनित्यत्वदोषापत्तेः। न हि सोऽस्ति लोके परमार्थवस्तुतो निमित्तवशाद्भावांतरमापद्यते नित्यश्चेति तथा ब्रह्मविज्ञाननिमित्तकृता चेत्सर्वभावापत्तिर्नित्या चेति
विरुद्धं अनित्यत्वे च कर्मफलतुल्यतेत्युक्तो दोषोऽविद्याकृतासर्वत्वनिवृत्तिं चेत्सर्वभावापत्तिं ब्रह्मविद्याफलं मन्यसे ब्रह्मभाविपुरुषकल्पनानर्थिका प्राग्ब्रह्मविज्ञाना
दपि सर्वो जंतुर्ब्रह्मत्वान्नित्यमेव सर्वभावमापन्नः परमार्थतोऽविद्यया त्वब्रह्मत्वमसर्वत्वं चाध्यारोपितं यथा शुक्तिकायां रजतं व्योम्नि वा तलमलवत्त्वादि तथेह ब्रह्मण्यध्यारो
पितमविद्ययाऽब्रह्मत्वमसर्वत्वं च ब्रह्मविद्यया निवर्त्यत इति मन्यसे यदि तदा युक्तं यत्परमार्थत आसीत्परं ब्रह्म ब्रह्मशब्दस्य मुख्यार्थभूतं ब्रह्म वा इदमग्र आसीदित्यस्मि
न्वाक्ये तदनिवर्त्य यथाभूतार्थवादित्वाद्वेदस्य न त्वियं कल्पना युक्ता ब्रह्मशब्दार्थविपरीता ब्रह्मभाविपुरुषाश्रयत्वमनर्थिका श्रुतहान्यश्रुतकल्पनाया प्रयोज
नमाहुरितरे यद्यपि नित्यं सर्वत्वं विद्याकृतत्वातिरेकेण ब्रह्मत्वमसर्वत्वं च विद्यमानमेवेति चेन्नस्य ब्रह्मविद्ययापोहानुपपत्तेर्न हि क्वचित्साक्षाद्वस्तुधर्मस्यापोढा दृष्टा क
र्त्री वा ब्रह्मविद्याऽविद्यायास्तु सर्वत्रैव निवर्त्तिका दृष्टा तथेहाप्यब्रह्मत्वमसर्वत्वं चाविद्याकृतमेव निवर्त्यतां न तु पारमार्थिकं वस्तु कर्तुं निवर्त्तयितुं वार्ह
ति ब्रह्मविद्या तस्माद्व्यर्थैव श्रुतहान्यश्रुतकल्पना ब्रह्मण्यविद्यानुपपत्तिरिति चेन्न ब्रह्मणि विद्याविधानान्न हि शुक्तिकायां रजताध्यारोपणेऽसति शुक्तिकात्वं ज्ञाप्यते
चक्षुर्गोचरापन्नायामिदं शुक्तिका न रजतमिति। तथा सदेवेदं सर्वं ब्रह्मैवेदं सर्वमात्मैवेदं सर्वं नेदं द्वैतमस्त्यब्रह्मेत्यब्रह्मैकत्वविज्ञानं न विधातव्यं ब्रह्मण्यविद्याध्यारो
पणायामसत्यां न ब्रूमः शुक्तिकायामिव ब्रह्मण्यतद्धर्माध्यारोपणा नास्तीति किं तर्हि न ब्रह्म स्वात्मन्यतद्धर्माध्यारोपनिमित्तमविद्याकर्तृ चेति भवत्वेवं नाविद्याकर्तृ भ्रांतं च ब्र

पा॰
६

ह्रुदिं चेत्तेवाब्रह्मा विद्याकर्त्ता चेत्ततो ऽन्यो नान्यदतोऽस्ति विज्ञातृ न त्वमस्यात्मानमेवावेदहं ब्रह्मास्मीत्येतस्मात् सा वन्यो ऽहमस्मीति न स वेदेत्यादिश्रुतिभ्यः स्मृति
भ्यश्च समं सर्वेषु भूतेषु ब्रह्मणा मातृघ्नादिके शश्वपिचे वश्वपाके च यत्कामसर्वाणि भूतानि यस्मिन् सर्वाणि भूतानीति मंत्रवर्णाच्च ... ब्रह्मात्मोपदेशानर्थक्यमिति वाप्यमेव
मवगते स्त्वेवानर्थक्यमवगमानर्थक्यमपीति चेन्नानवगमनिवृत्तेर्दृष्टत्वात् तन्निवृत्तेरपि अनुपपत्तिरिति चेन्न दृष्टविरोधात् दृश्यते ह्येकत्वविज्ञानादेवानवगम
निवृत्तिर्दृश्यमानमप्यनुपपन्नमिति ब्रुवतो दृष्टविरोधः स्यान्न च विरोधः केनचिदप्युपगम्यते न च दृष्टेप्यनुपपन्नं नाम दृष्टत्वादेव दर्शनानुपपत्तिरिति चेन्नात्मैषैव युक्तिः
पुरुषार्थेषु स्वरूपेण कर्मणा मवगतिर्न विद्याकर्मणोः समन्वारभेत्ते मंनावोद्धा कर्त्ता विज्ञानात्मा पुरुष इत्येवमादिश्रुतिभ्यस्तिभ्यो ऽस्मात् परस्मात् हि लक्षणोऽन्यः संसारी च
गम्यते तद्विलक्षणश्च परः स एष नेति नेत्यशनायाद्यत्येति य आत्मा अपहतपाप्मा विजरो विमृत्युरेतस्य वा अक्षरस्य प्रशासन इत्यादिश्रुतिभ्यः कणादाक्षपादादितं
र्कशास्त्रेषु च संसारिविलक्षण ईश्वर उपपत्तितः साध्यते संसारदुःखापनयार्थिप्रवृत्तिदर्शनात् स्फुटमन्यत्वमीश्वरात् संसारिणो ऽवगम्यते श्रुतेः कर्मादिशब्दो नम
च्छात्मेत्यादिश्रुतिभ्यः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः तं विदित्वा न लिप्यते ब्रह्मविदाप्नोति परमेकधैवानुद्रष्टव्यमेतदेवं वा एतदक्षरं गार्गि विदित्वा नमेधावी
शो विज्ञाय प्रज्ञां कुर्वीत श्रुतेः संसारिणो ब्रह्मान्तरस्य मुच्यन्त इत्यादिकर्मकर्तृनिर्देशाच्च मुमुक्षोर्ब्रह्मगतिमार्गविशेषदेशोपदेशाच्च असति भेदे कस्य कुतो गतिः स्यात्तदभा
वे च दक्षिणोत्तरमार्गविशेषानुपपत्तिर्गत्यन्तरदेशानुपपत्तिश्च भिन्नस्य तु परस्मादात्मनः सर्वमेतदुपपन्नं कर्मज्ञानसाधनोपदेशाश्च भिन्नश्चेद्ब्रह्मणः संसारी स्याद्यु
क्ताः प्राप्त्युदयनिःश्रेयससाधनयोः कर्मज्ञानयोरुपदेशो नेश्वरस्याप्तकामत्वात्तस्मात् युक्तं ब्रह्मेति ब्रह्मभावी पुरुष उच्यत इति चेन्न ब्रह्मोपदेशानर्थक्यप्रसंगात् संसा
री चेद्ब्रह्मभाव्यब्रह्म सन्नविदित्वात्मानमेवाहं ब्रह्मास्मीति सर्वमभवत् तस्य संसार्यात्मविज्ञानादेव सर्वा ... भावस्य फलस्य ... सिद्धत्वात् परब्रह्मोपदेशस्य ध्रुव
मानर्थक्यं प्राप्तं तद्विज्ञानस्य क्वचित् पुरुषार्थसाधनेविनियोगात् संसारिण एवाहं ब्रह्मास्मीति ब्रह्मत्वसंपादनार्थ उपदेश इति चेत्तर्हि ज्ञाने ह्यविशेषस्यस्वरूपे किं संपादये

राम॰
२६

न्यत्वा ... आत्मवादेवतोऽन्याय्यक्रियायत्नहीनोऽजो नित्यम
प्राप्तिलक्षणो नित्यो ऽपि व्याख्यानजनितकामक्रियावस्त्ववद्यानस्य नेपुत्रादिनाम बद्धयतुनद्विपरीतस्यात्मा आत्मवादेव तो ऽन्यत्वाद्यक्रियायत्र हीनोऽजो नित्यम
ब्रह्मस्वरूपत्वेऽपि सत्यविद्यामात्रेण व्यवधानं यथा ग्रहमाण्यायाश्रपिशुक्तिकायाः विपर्ययेणरजतत्वाभासमप्याः अयहणं विपरीतज्ञानव्यवधानमात्रेन यथा ग्रहणं ज्ञा
नमात्रमेव विपरीतज्ञानव्यवधानापोहार्थं तदा तु ज्ञानस्यैव मिथ्या यत्नतोऽलाभेऽविद्यामात्रं व्यवधानं तस्मात् हि युयानदयोऽहनमात्रमेवलाभो नानान्यः कदाचि
दप्युपपद्यते तस्मादात्मलाभे ज्ञानादर्थान्तरस्य साधनस्यानर्थक्यं वक्ष्यामः तस्मान्निराशंकमेव ज्ञानलाभयोरेकार्थत्वे विवक्षुत्वाहज्ञाने प्रकृत्यानुविद्य
निर्दिदेवतीर्थार्थं ज्ञानानुगुणविज्ञानफलमिदमुच्यते यथायमात्मानामरूपानुप्रवेशेन ख्यातिं गतः आत्मेत्यादिनामरूपाभ्यां प्राणादिसंहतिं चलोकं प्राप्य
वानित्येवं यो वेद सकीर्तिं ख्यातिं श्लोकं च संघातं तद्धि यः सहवितंतेल भते ॥ ७ ॥ कुतश्चात्मतत्त्वमेवज्ञेयमनादृत्यान्यदित्याहतदेतदात्मतत्त्वं प्रेयः प्रियतरं पुत्रात् पु
त्राद्धि लोके प्रियः प्रसिद्धस्तस्मादपि प्रियतरमिति निरतिशयप्रियत्वं दर्शयति तथा वित्ताद्धिरण्यरत्नादेस्तथान्यस्मादपि यद्धि लोके प्रियत्वेन प्रसिद्धं तस्मात्स
र्वस्मादित्यर्थः तत्कस्मादात्मतत्त्वमेव प्रियतरं न प्राणादीत्युच्यते अंतरतरं बाह्यात्पुत्रवित्तादेः प्राणपिंडसमुदायो हि अंतरोऽभ्यंतरः संनिकृष्ट आत्मनस्तस्मादयं
तदात्मा तेन रतरं अयदयमात्मायदेनदात्मतत्त्वं यो हि लोके निरतिशयप्रियः स सर्वप्रयत्नेन लब्धव्यो भवति तथायमात्मा सर्वलौकिकप्रियेभ्यः प्रियतमस्तस्मात्तल्ला
भे महान्यत्न आस्थेयइत्यर्थः कर्तव्यताप्राप्तमप्यन्यप्रियलाभे यत्नमुत्सृज्य कस्मात्पुनरात्मानात्मप्रिययोरन्यतरप्रियहानेनेतरप्रियोपादानप्राप्तौ आत्म
प्रियोपादानेनेतरहानं क्रियते न विपर्ययः सयोऽन्यमप्रियमात्मनो विशेषं पुत्रादिकं प्रियं ब्रुवाणं ब्रूयात् ... प्रियवादी किं प्रियं नवाति
प्रियोपादानेनैवेतरहानं क्रियते न विपर्ययस्य कश्चिद्न्यमनात्मविशेषं पुत्रादिकं प्रियं नरमात्मनः सकाशात् ब्रुवाणं ब्रूयादात्मप्रियवादी किं प्रियं न वामि
त्येतं उच्यते पुत्रादिलक्षणं रोत्स्यत्यावरणं प्राणसंरोधं प्राप्स्यतीति विनङ्क्ष्यतीति समर्थकस्मादेवं ब्रवीति यस्मादीश्वरः समर्थः पर्याप्तोऽसावेवं वक्तुं ह्ययस्मात् तस्मात् तथै
वस्यात् यत्नेनोक्तं प्राणसंरोधं प्राप्स्यति यथाभूतवादी हि सः तस्मात्स ईश्वरो वक्तुमीश्वरः अतः क्षिप्रवादी निकेचिद्वेद यदि प्रसिद्धिः स्यात्तस्मात् ईश्वरात्मप्रिय

रत्नुबातं

वि

चिद्द्वारपरोक्षादगौणं नश्रोत्रब्रह्मादिवत्। किं तत् य आत्मा आत्मशब्देन प्रत्यगात्मोच्यते तत्रात्मशब्दस्य प्रसिद्धत्वात्सर्वस्याभ्यं
तरः सर्वान्तरो यः आत्मशब्दो प्रसिद्ध आत्मा ब्रह्मेति तमात्मानं मे मह्यं व्याचक्ष्वेति विस्पष्टं श्रृंगे गृहीत्वा यथा गां दर्शयति तथा स्व
८. सोयमित्येवं कथयस्वेत्यर्थः इति एवमुक्तः प्रत्याह याज्ञवल्क्यः एष ते तव आत्मा सर्वस्याभ्यंतरः सर्वांतरः सर्वविशेषणोपल ८.
क्षणार्थं सर्वांतरग्रहणं यत्साक्षादव्यवहितमपरोक्षादगौणं ब्रह्म बृहत्तममात्मा सर्वस्य सर्वस्याभ्यंतरः एतैर्गुणैः समस्तै
र्युक्तः एषः कोसौ तव आत्मा यो यं कार्यकरणसंघातस्तस्य स येनात्मना आत्मवान् स एष तवात्मा तव कार्यकरणसंघातस्येत्य
र्थः तत्र पिंडस्तस्याभ्यंतरे लिंगात्मा करणसंघातस्तृतीयो यश्च संदिह्यमानस्तेषु कतमो मम आत्मा सर्वांतरस्त्वया विवक्षि
त इत्युक्त इतर आह यः प्राणेन मुखनासिकासंचारिणा प्राणिति प्राणचेष्टां करोति येन प्राणः प्रणीयत इत्यर्थः। स ते तव आ

र्यकरणसंघातस्यात्मा विज्ञानमयः समानमन्य घोपानेनापानिति यो व्यानेन व्यानितीति छांदसं दैर्घ्यं सर्वः कार्यकरण
संघातगाः प्राणचेष्टा दारुयंत्रस्येव येन क्रियंते न हि चेतनावदनधिष्ठितस्य दारुयंत्रस्य प्राणनादिचेष्टा विद्यते तस्माद्वि
ज्ञानमयेनाधिष्ठितं विलक्षणेन दारुयंत्रवत्प्राणनादिचेष्टां प्रतिपद्यते तस्मात्सोस्ति कार्यकरणसंघातविलक्षणो यश्चे
ष्टयति॥ स होवाचोषस्तश्चाक्रायणः यथा कश्चिदन्यथा प्रतिज्ञाय पूर्वं पुनर्विप्रतिपन्नो ब्रूयादन्यथासौ गौरसावश्वो य
श्चलति धावतीति वा पूर्वं प्रत्यक्षं दर्शयामीति प्रतिज्ञाय पश्चाच्चलनादिलिंगैर्व्यपदिशत्येवमेवैतद्ब्रह्म प्राणनादिलिंगैर्व्यपदि
ष्टं भवति त्वया किं बहुनात्यक्त्वा गोत्वस्मानिमित्तं व्याजं यदेव साक्षाद्ब्रह्म य आत्मा सर्वांतरस्तं मे व्याचक्ष्वेतीतर आह। यथा म
या प्रथमं प्रतिज्ञातस्तव आत्मा एवंलक्षण इति तां प्रतिज्ञामनुवर्त्त एवातन्यथैव यथोक्तं मया यत्पुनरुक्तं तमात्मानं घटादिवद्विष
यीकुर्विति न तच्छक्यत्वात्क्रियते कस्मात्पुनस्तच्छक्यमित्याह। वस्तुस्वाभाव्यात् किं पुनस्तद्वस्तुस्वाभाव्यं दृष्टेर्द्रष्टारं।
दृष्टेर्द्रष्टा ह्यात्मा दृष्टिरिति द्विविधा भवति लौकिकी परमार्थिकी चेति तत्र लौकिकी चक्षुः संयुक्ता अंतःकरणवृत्तिः सा क्रियत इति जाय न
ते विनश्यति च। या त्वात्मनो दृष्टिरग्न्युष्णप्रकाशादिवत्सा च द्रष्टुः स्वरूपत्वान्न जायते न विनश्यति च सा क्रियमाणयोपाधिभू
तया संसृष्टेवेति व्यपदिश्यते द्रष्टेति भेदवच्च द्रष्टा दृष्टिरिति च यासौ लौकिकी दृष्टिश्चक्षुर्द्वाररूपोपरक्ता जायमानैव नित्यया आत्म

की

स्यजन्तुपादन्संसरतीत्युक्तं। पुण्यस्यचपरउत्कर्षो व्याख्यातो व्याकृतविषयः। समष्टिव्यष्टिरूपो द्वैतैकत्वात्मप्राप्तिर्
स्तुयद्प्राप्तिग्रहैर्यस्तः संसरति सोस्ति वा नास्त्यस्ति चेत्किंलक्षणः स एव त्वात्मन एव विवेकाधिगमायोपक्रान्त प्रश्न आरभ्य
ते तस्यैव निरूपाधिस्वरूपस्य क्रियाकारकविनिर्मुक्तस्य भावस्याधिगमाय योक्ताद्बंधनाद्विमुच्यते सप्रयोजकाद्व्यापिका
संबधस्तु प्रसिद्धः अथ हैनं प्रकृतं याज्ञवल्क्यमुषस्तो नाम तश्चक्रस्यापत्यं चाक्रायणः पप्रच्छ यद्ब्रह्म साक्षादव्यवहितं केन
चिद्द्वारपरोक्षाद्गौणं न श्रोत्रब्रह्मादिवत् किं तत् य आत्मा आत्मशब्देन प्रत्यगात्मोच्यते तत्रात्मशब्दस्य प्रसिद्धत्वात् सर्वस्याभ्यं
८. तरः सर्वान्तरो यश्चाब्दस्यां प्रसिद्ध आत्मा ब्रह्मेति तमात्मानं मे मह्यं व्याचक्ष्वेति विस्पष्टं शृंगे गृहीत्वा यथा गां दर्शयति तथा व्य ८.
सोयमित्येवं कथयस्वेत्यर्थः इति एवमुक्तः प्रत्याह याज्ञवल्क्यः एष ते तवात्मा सर्वस्याभ्यंतरः सर्वांतरः सर्वविशेषणोपल
क्षणार्थं सर्वांतरयद्ब्रह्मणं यत्साक्षादव्यवहितमपरोक्षाद्गौणं ब्रह्म बृहत्तममात्मा सर्वस्य सर्वस्याभ्यंतरः एतैर्गुणैः समस्तै
र्युक्तः एषः कोसौ तवात्मा योयं कार्यकरणसंघातस्तव स येनात्मनात्मवानस एतेषैव आत्मा तव कार्यकरणसंघातस्येत्य
र्थस्तत्र पिंडस्तस्याभ्यंतरे लिंगात्मा करणसंघातस्तृतीयो यश्च संदिह्यमानस्तेषु कतमो मम आत्मा सर्वांतरस्त्वया विवक्षि
त इत्युक्त इतर आह यः प्राणेन मुखनासिकासंचारिणा प्राणिति प्राणचेष्टां करोति येन प्राणः प्रणीयत इत्यर्थः। स ते तवा

र्यकरणसंघातस्यात्मा विज्ञानमयः समानमन्यद्योपानेनापानितियोव्यानेन व्यानितीतिछांदसं दैर्घ्यं सर्वः कार्यकरण
संघातगः प्राणचेष्टादारुयंत्रस्येव येन क्रियंते न हि चेतनावदनधिष्ठितस्य दारुयंत्रस्य प्राणनादिचेष्टा विद्यते तस्माद्वि
ज्ञानमयेनाधिष्ठितं विलक्षणेन दारुयंत्रवत्प्राणनादिचेष्टां प्रतिपद्यते तस्मात्सोस्ति कार्यकरणसंघातविलक्षणो यश्चे
ष्टयति॥ स होवाचोषस्तश्चाक्रायणः यथा कश्चिदन्यथाप्रतिज्ञाय पूर्वं पुनर्विप्रतिपन्नो ब्रूयादन्यथासौ गौरसावश्वोयः
श्चलति धावतीति वा पूर्वं प्रत्यक्षं दर्शयामीति प्रतिज्ञाय पश्चाच्चलनादिलिंगैर्व्यपदिशत्येवमेवैतद्ब्रह्म प्राणनादिलिंगैर्व्यपदि
ष्टं भवति त्वया किं बहुनात्यक्त्वा गौणत्वानिमित्तं व्याजं यदेव साक्षाद्ब्रह्म य आत्मा सर्वांतरस्तं मे व्याचक्ष्वेतीतर आह। यथाम
याप्रथमं प्रतिज्ञातस्तव आत्मा एवंलक्षण इति तां प्रतिज्ञामनुवर्त्तएवात नत्येव यथोक्तं मया यत्तु न रूक्तं तमात्मानं घटादिवद्विष
यीकुर्विति। न हि तत्कार्यत्वान्न क्रियते कस्मात्तु नत्तद्शक्यमित्याह। वस्तुस्वाभाव्यात् किं पुनस्तद्वस्तुस्वाभाव्यं दृष्ट्यादिद्रष्टृत्वं। न
दृष्टेर्द्रष्टा ह्यात्मा दृष्टिरिति द्विविधा भवति लौकिकी परमार्थिकी च तत्र लौकिकी चक्षुः संयुक्तान्तःकरणवृत्तिः सा क्रियत इति जाय
ते विनश्यति च। या त्वात्मनो दृष्टिरग्न्युष्णप्रकाशादिवत् सा च द्रष्टुः स्वरूपत्वान्न जायते न विनश्यति सा क्रियमाणयोपाधिभू
तया संसृष्टेवेति व्यपदिश्यते द्रष्टेति भेदवच्च द्रष्टा दृष्टिरिति च यासौ लौकिकी दृष्टिश्चक्षुर्द्वारा रूपोपरक्ता जायमानैव नित्यया आत्म

की

दृश्यासंसृष्टेवतत्प्रतिछायाततयाव्याप्तेवजायतेतथाविनश्यतीवतेनोपचर्यतेद्रष्टासदापश्यन्नपिपश्यतिनपश्यतीवचेति।
ननुपुनर्दृष्टेर्दृष्टेःकदाचिदप्यन्यथात्वंतर्यीवक्ष्यतिषष्ठेध्यायतीवलेलायतीवनहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतइतिच।तमिम
मर्थमाहलौकिक्यादृष्टेःकर्मभूतायाःद्रष्टारंस्वकीययानित्यादृष्ट्याव्याप्तारंनपश्येर्यासौलौकिकीदृष्टिःकर्मभूतासारूपो
परक्तारूपाभिव्यंजिकानात्मानंस्वात्मनाव्याप्तारंप्रत्यंचंव्याप्नोतितस्मात्तंप्रत्यगात्मानंदृष्टेर्द्रष्टारंनपश्येस्तथाश्रुतेःश्रो
तारंनशृणुयास्तथामतेर्मनोवृत्तेःकेवलयाव्याप्तारंनमन्वीथास्तथाविज्ञातेःकेवलायाबुद्धिवृत्तेर्व्याप्तारंनविजानीयाःएष
८१ वस्तुनःस्वभावैतोनैवदर्शयितुंशक्यते।गवादिवन्नदृष्टेर्द्रष्टारमित्यत्राक्षराण्यन्यथाव्याचक्षतेकेचित्दृष्टेर्द्रष्टारंदृष्टेःकर्तारंदृ ८१
ष्टिर्नेदमकृत्वादृष्टिमात्रस्यकर्तारंनपश्येरितिदृष्टेरितिकर्मणिषष्ठीसादृष्टिःक्रियमाणाघटवत्कर्मभवतिद्रष्टारमिति
तेजेनद्रष्टुर्दृष्टिकर्तृत्वमावेष्टेनासौदृष्टेर्द्रष्टादृष्टेःकर्तेतिव्याख्यातॄणामभिप्रायः।तत्रदृष्टेरितिद्वयंतेनदृष्टिग्रहणमन व
र्थकमितिदोषंनपश्यंतिपश्यंतोवापुनरुक्तमसारःप्रमादपाठइतिवानादरः।कथंपुनराधिक्यंतज्जंतेनैवदृष्टिकर्तृत्वस्यसि
द्धत्वाद्दृष्टेरितिनिरर्थकंनदाद्रष्टारंनपश्येरित्येतावदेववक्तव्यं।यस्माद्धातोःपरस्तृच्प्रयुज्यतेतद्धात्वर्थकर्तरिहितृच्स्मर्यतेमंतारंचे

तारंवानयेत्येतावानेवहिशब्दःप्रयुज्यतेनतुगंतेर्गंतारंछिदेश्छेत्तारमित्यसत्यर्थविशेषप्रयोक्तव्योनचार्थवादत्वेनहातव्यंत्याग स
तोनत्वप्रमादपाठःसर्वथाप्यविगीतत्वात्तस्माद्व्याख्यातॄणामेवबुद्धिदौर्बल्यंनाध्येतृप्रमादोयथात्वस्माभिर्व्याख्यातंलौकिकदृष्टेर्द्वि
विधनित्यदृष्टिविशिष्टआत्माप्रदर्शयितव्यस्तथाकर्मकर्तृविशेषणत्वेनदृष्टिशब्दस्यद्विःप्रयोगउपपद्यतेआत्मस्वरूपनिर्द्धार
णायनहिद्रष्टुर्दृष्टेरितिचप्रदेशांतरवाक्येनैकवाक्यतोपपन्नाभवति।तथाचक्षुंषिपश्यतिश्रोत्रमिदंश्रुतमितिश्रुत्यंतरेणैकवाक्य
तोपपन्नान्यायाच्चैवमेवह्यात्मनोनित्यत्वमुपपद्यतेविक्रियात्वावेविक्रियावच्चानित्यमितिचविप्रतिषिद्धंध्यायतीवलेलायतीवन
हिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतएषनित्योमहिमाब्राह्मणस्येतिचश्रुत्यक्षराण्यन्यथानगच्छंति।ननुद्रष्टाश्रोतामंताविज्ञातेत्येवमा
दीन्यप्यक्षराण्यात्मनोऽविक्रियत्वेनगच्छंतीति।नयथाप्राप्तलौकिकवाक्यानुवादित्वात्तेषांनत्वात्मतत्वनिर्द्धारणार्थानितानिनदृष्टे
र्द्रष्टारमित्येवमादीनामन्यार्थासंभवाद्यथोक्तार्थपरत्वमवगम्यतेतस्मादनवबोधादेवहिविशेषणंपरित्यक्तंदृष्टेरितिएषतेवआ त
त्मासर्वैरुक्तैर्विशेषणैर्विशिष्टोतएतस्मादात्मनःअन्यदार्त्तं।कार्यवाशरीरंकरणात्मकंवालिंगं।मेतदेवैकमनार्त्तमविनाशि
कूटस्थंततोहोषस्तश्चाक्रायणउपरराम॥ ॥पंचमस्यचतुर्थंब्राह्मणं॥।बंधनंसप्रयोजनमुक्तं।यश्चबद्धस्तस्याप्यस्तित्वमधिगतंव्य
तिरिक्तत्वंचतस्येदानींबंधमोक्षसाधनंससंन्यासमात्मज्ञानंवक्तव्यमितिकहोलप्रश्नआरभ्यते।अथहैनंकहोलोनामतः॥कुषी

तकस्यापत्यंकौषीतकेयः पप्रछ।याज्ञवल्क्येतिहोवाचेतिपूर्ववत्।यदेवसाक्षादपरोक्षाद्ब्रह्मयआत्मासर्वांतरः तन्मेव्याचक्ष्वेति
यंविदित्वाबंधनात्प्रमुच्यते।याज्ञवल्क्यआह।एषतेतवआत्मा।किमुषस्तकहोलाभ्यामेकआत्माप्रष्टः किंभिन्नावात्मानौतुल्यल
क्षणाविति।भिन्नावितियुक्तंप्रश्नयोरपुनरुक्तत्वोपपत्तेर्यदिह्येकआत्माउषस्तकहोलप्रश्नयोर्विवक्षितस्तत्रैकेनैवप्रश्नेनाधि
त गतत्वात्तद्विषयोद्वितीयः प्रश्नोनर्थकः स्यान्नचार्थवादरूपत्वंवाक्यस्यतस्माद्भिन्नावेतावात्मानौक्षेत्रज्ञपरमात्मानाविति केचिद्व्याच स्वा
क्षतेतन्नएवेतिप्रतिज्ञानादेषतआत्मेषतआत्मेतिहिप्रतिवचनेप्रतिज्ञानंनचैकस्यकार्यकरणसंघातस्यद्वावात्मानावुपपद्येते
८२ एकोहिकार्यकरणसंघातएकेनात्मनात्मवान्नचोषस्तस्यान्यः कहोलस्यान्योजातितोभिन्नआत्माभवति।द्वयोरगौणत्वात्म
त्वसर्वांतरत्वानुपपत्तेश्च।यद्येकमगौणंब्रह्मद्वयोरि [ ] तरेणावश्यंगौणेनभवितव्यंतथात्मत्वंसर्वांतरत्वंचविरुद्धत्वात्पदार्थाना
र्जितरेणा यद्येकंसर्वांतरंब्रह्मात्मामुख्यः इतरेणानात्मनामुख्येनावश्यंभवितव्यं।तस्मादेकस्यैवद्विःश्रवणंविशेषविवक्षयायत्तुपूर्वोक्तेनस
मानंद्वितीयप्रश्नोत्तरेउक्तंतावन्मात्रंपूर्वस्यैवानुवदंस्तस्यैवानुक्तः कश्चिद्विशेषोवक्तव्यइतिकः पुनरसौविशेषइत्युच्यतेपूर्वस्मिन्प्रश्ने
स्तिव्यति [ ] रिक्तआत्मायस्यायंसप्रयोजकोबंधउक्तइतिद्वितीयेतुतस्यैवात्मनोशनायादिसंसारधर्मातीतत्वंविशेषउच्यतेयद् त
द्विशेषपरिज्ञानात्संन्याससहितात्पूर्वोक्ताद्बंधनाद्विप्रमुच्यतेतस्मात्प्रश्नप्रतिवचनयोरेषतआत्मेत्येवमंत्रयोस्तुल्यार्थतैव ८२

ननुकथमेकस्यैवात्मनोशनायातीतत्वंतद्वत्त्वंचेतिविरुद्धधर्मसमवायित्वमितिनपरिहृतत्वान्नामरूपविकारकार्यकरणलक्ष
णसंघातोपाधिभेदसंपर्कजनितभ्रांतिमात्रंहिसंसारित्वमसकृदवोचामविरुद्धश्रुतिव्याख्यानप्रसंगेनयथारज्जुशुक्ति
कागगनादयः सर्परजतमलिनाभवंतिपराध्यारोपितधर्मविशिष्टाः स्वतः केवलाएवरज्जुशुक्तिकागगनादयः नचैवंविरु
द्धधर्मसमवायित्वेपदार्थानांकश्चनविरोधोनामरूपोपाध्यस्तित्वेएकमेवाद्वितीयंनेहनानास्तिकिंचनेतिश्रुतयोविरुध्ये
रन्नितिचेन्नसलिलफेनदृष्टांतेनपरिहृतत्वान्मृदादिदृष्टांतैश्चयदातुपरमार्थदृष्ट्यापरमात्मतत्त्वात्श्रुत्यनुसारिभिर
न्यत्वेन निरूप्यमाणेनामरूपेमृदादिविकारवद्वस्त्वंतरेतत्त्वतोनस्तः सलिलफेनघटादिविकारवदेवतदपेक्षयैकमेवाद्विती
यंनेहनानास्तिकिंचनेत्यादिपरमार्थदर्शनगोचरत्वंप्रतिपद्यतेयदातुस्वाभाविक्याविद्ययाब्रह्मस्वरूपंरज्जुशुक्तिकागगन
स्वरूपवदेवस्वेनरूपेणवर्त्तमानंकेनचिदस्पृष्टस्वभावमपिसन्नामरूपकृतकार्यकरणोपाधिभ्योविवेकेननावधार्यतेनाम
रूपोपाधिदृष्टिरेवचभवतिस्वाभाविकीतदासर्वोयंवस्त्वंतरास्तित्वव्यवहारोस्तिवायंभेदकृतोमिथ्याव्यवहारः।येषांब्रह्मतत्त्वा
दन्यत्वेनवस्तुविद्यतेयेषांचनास्तिपरमार्थवादिभिःश्रुत्यनुसारेणनिरूप्यमाणेवस्तुनिकिंतत्त्वतोस्तिवस्तुकिंवानास्तीति

ब्रह्मैकमेवाद्वितीयं सर्वसंव्यवहारशून्यमिति निर्द्धार्यते तेन न कश्चिद्विरोधः नहि परमार्थावधारणनिष्ठायां वस्त्वंतरास्तित्वं
प्रतिपद्यामहे एकमेवाद्वितीयम् अनन्तरमबाह्यमिति श्रुतेः न च नामरूपव्यवहारकाले त्वविवेकिनां क्रियाकारकफलादिसंव्यव
हारो नास्तीति प्रतिषिध्यते तस्मात् ज्ञानाज्ञाने अपेक्ष्य सर्वसंव्यवहारः शास्त्रीयो लौकिकश्च अतो न काचन विरोधा शंका सर्ववा
दिनामप्यपरिहार्यः परमार्थसंव्यवहार्यः परमार्थसंव्यवहारकृतो व्यवहारस्तत्र परमार्थात्मस्वरूपमपेक्ष्य प्रश्नः पुनः कतमो या
ज्ञवल्क्य सर्वांतर इति प्रत्याहेतरो योऽशनायापिपासे अत्येति अशितुमिच्छा अशनाया पातुमिच्छा पिपासा ते अशनायापिपासे योऽत्ये
८३ तीति विवक्ष्यमाणेन संबंधः अविवेकिभिस्तलमलवद्विगगनं गम्यमानमेव तलमलेनात्येति परमार्थतस्ताभ्यामसंस्पृष्टस्वरू
पत्वात् तथा मूढैरशनायापिपासादिमद्ब्रह्म गम्यमानमपि क्षुधितोऽहं पिपासितोऽहमिति तैरत्येव परमार्थतस्ताभ्यामसंस्पृ ८३
ष्टस्वभावत्वात् न लिप्यते लोकदुःखेन बाह्य इति श्रुतेः अविद्वल्लोकाध्यारोपितदुःखेनेत्यर्थः प्राणैकधर्मत्वात् समासकरणं
अशनायापिपासयोः शोकमोहं शोक इति कामः इष्टं वस्तूद्दिश्य चिंतयतो यदरमणं तत्तृष्णाभिभूतस्य कामबीजं तेन हि
कामो दीप्यते मोहस्तु विपरीतप्रत्ययप्रभवोऽविवेको भ्रमः स चाविद्या सर्वस्यानर्थस्य प्रसवबीजं भिन्नकार्यत्वात्तयोः शोकमो
हयोरसमासकरणं तौ मनोऽधिकरणौ तथा शरीराधिकरणौ जरामृत्यू बात्येति जरेति कार्यकरणसंघातविपरिणामो वली पलि

श्रे२कं१

तादिलिंगो मृत्युरिति तद्विच्छेदो विपरिणामावसानः तौ जरामृत्यू शरीराधिकरणौ अत्येति ये ते अशनायाद्यः प्राणमनःशरी
राधिकरणाः प्राणिष्वनवरतं वर्तमाना अहोरात्रादिवत्समुद्रोर्मिवच्च प्राणिषु संसार इत्युच्यते यः सोऽदृष्टेत्यादिलक्षणः साक्षा ईश
दव्यवहितोऽपरोक्षाद् गौणः सर्वांतर आत्मा ब्रह्मादिस्तंबपर्यंतानां भूतानां अशनायापिपासादिभिः संसारधर्मैः सदा न स्पृ
श्यते। आकाश इव घनादिमलैः एतं वै आत्मानं स्वं तत्वं विदित्वा ज्ञात्वा अयमहमस्मि परं ब्रह्म सदा सर्वसंसारविनिर्मुक्तं नित्य
तृप्तमिति। ब्राह्मणा ब्राह्मणानामेवाधिकारो व्युत्थानेतो ब्राह्मणग्रहणं व्युत्थाय वैपरीत्येनोत्थानं कृत्वा कुत इत्याह पुत्रैषणा
ये याः पुत्रार्था एषणा पुत्रैषणा पुत्रेणेमं लोकं जयमिति। लोकजयसाधनं पुत्रं प्रतीच्छा एषणा दारसंग्रहो हि मकृत्वेत्यर्थः। वि दारसंग्रह
त्तैषणायाश्च कर्मसाधनस्य गवादेरुपादानमनेन कर्म कृत्वा पितृलोकं जेष्यामीति विद्यासंयुक्तेन वा देवलोकं केवलया
वा हिरण्यगर्भविद्यया दैवेन वित्तेन देवलोकं दैवाद्वित्तात् व्युत्थानमेव नास्तीति केचित् यस्मात्तद्बलेन हि किल व्युत्थानमि
ति तदसदेतावान्वै काम इति पठितत्वादेषणामध्ये दैवस्य वित्तस्य हिरण्यगर्भादिदेवताविषयैव विद्या विद्यैत्तु च्यते देवलोक
हेतुत्वान्न हि निरुपाधिकप्रज्ञानघनविषया ब्रह्मविद्या देवलोकप्राप्तिहेतुस्तस्मात्तत्र सर्वमेव भवदात्माद्येषां स जनवतीति श्रुतेस्तद्ध

तेनहिव्युत्थान मेतंवैतमात्मानंविदित्वेतिविशेषवचनात्तस्मात्त्रिभ्योप्येतेभ्योनात्मलोकप्राप्तिसाधनेभ्यएष
णाविषयेभ्योव्युत्थायएषणाकामः एतावान्वैकामइतिश्रुतेरेतस्मिन्त्रिविधेनात्मलोकप्राप्तिसाधनेतृष्णामकृत्वेत्यर्थः।स
र्वहिसाधनेच्छाफलेच्छैवातोव्याचष्टेश्रुतिरेकैवैषणेतिकथंह्येवपुत्रैषणाः दृष्टफलसाधनत्वतुल्यत्वात्तयावित्तैषणाकर्म
न्तूतासालोकैषणाफलार्थैवसासर्वःफलार्थप्रयुक्तएवहिसर्वसाधनमुपादत्तेअतएकैवैषणालोकैषणासासाधनमन्तरे
णासंपादयितुंनशक्यतइतिसाध्यसाधनभेदेनोभेहियस्मादेतेएषणेएवभवतः।तस्माद्ब्रह्मविदोनास्तिकर्मकर्मसाधनं
८४ वातोयेतिक्रान्ताःब्राह्मणाःसर्वकर्मकर्मसाधनंचसर्वंदेवपितृमानुषनिमित्तंयज्ञोपवितादितेनहिदैवंपित्र्यंमानुषंच ८४
कर्मक्रियतेनिवीतंमनुष्याणामित्यादिश्रुतेः॥तस्मात्पूर्वेब्राह्मणाब्रह्मविदोव्युत्थायकर्मभ्यःकर्मसाधनेभ्यश्चयज्ञोपवी
तादिभ्यःपरमहंसपरिव्राज्यंप्रतिपद्यभिक्षाचर्यंचरंतित्यक्त्वास्मार्त्तंलिंगंकेवलाश्रममात्रशरणानांजीवनसाधनंपरिव्रा
ज्यंव्यंजकंविद्वान्लिंगवर्जितःतस्मादलिंगोधर्मज्ञोव्यक्तलिंगोव्यक्ताचारइत्यादिश्रुतिभ्यः।अथपरिव्राड्विवर्णवासामु
ण्डोपरिग्रहइत्यादिश्रुतेः।सशिखान्केशान्निकृत्यविसृज्ययज्ञोपवीतमितिनचव्युत्थायाथभिक्षाचर्यंचरन्तीतिवर्त्तमा
नापदेशादर्थवादोयंनविधायकःप्रत्ययःकश्चिच्छ्रूयतेलिङ्लोट्तव्यानामन्यतमोपि।तस्मादर्थवादमात्रेणश्रुतिस्मृतिविहि

संन्य २

तानांयज्ञोपवीतादीनांसाधनानांनशक्यतेपरित्यागःकारयितुंयज्ञोपवीत्येवाधीयीतयाजयेद्यजेतवापारिव्राज्येतावदध्यय
नंविहितंवेदसंनाच्छूद्रुंतस्माद्वेदंनसन्यसेदितिस्वाध्यायएवोत्सृजमानोवाचमितिचापस्तंबःब्रह्मोज्झंवेदनिंदाचकूटसाक्ष्य
सुहृद्वधः।गर्हितान्नाद्ययोर्जग्धिःसुरापानसमानिषडितिवेदपरित्यागे।दोषश्रवणाद्गुरूपासनेगुरूणांवृद्धानामतिथीनां
होमेजपकर्म्मणिभोजनेआचमनेस्वाध्यायेचयज्ञोपवीतीस्यादितिपरिव्राजकधर्मेषुचगुरूपासनस्वाध्यायभोजनाचम
नादीनांकर्मणांश्रुतिस्मृतिषुकर्त्तव्यतयाचोदितत्वाद्गुर्वाद्युपासनाङ्गत्वेनयज्ञोपवीतस्यविहितत्वात्परित्यागोनैवावगंतुंश
क्यते।यद्यप्येषणाभ्योव्युत्थानंविधीयतएवतथापिपुत्राद्येषणाभ्यएवव्युत्थानंनतुसर्वस्मात्कर्मतःकर्मसाधना
च्चव्युत्थानं।सर्वपरित्यागेचाश्रुतंकृतंस्यात्।श्रुतंचयज्ञोपवितादिहापितंस्यात्ततश्चमहाननपराधोविहिताकरणप्रतिषिद्धाच
रणनिमित्तःकृतःस्यात्तस्माद्यज्ञोपवीतादिलिंगपरित्यागोऽधपरंपरैव।नयज्ञोपवीतंवेदांश्चसर्वंतद्वर्जयेद्यतिरितिस्मृतेः।अपिचा
त्मज्ञानपरत्वात्सर्वस्याउपनिषदःआत्माद्रष्टव्यःश्रोतव्योमंतव्यइतिप्रस्तुतंसर्वात्मैवंसाक्षादपरोक्षात्सर्वान्तरोशनायादिसंसा
रधर्मवर्जितइत्येवंविज्ञेयइतितावत्प्रसिद्धं।सर्वाहीयमुपनिषदेवंपरेतिविध्यंतरशेषत्वंतावन्नास्त्यतोनार्थवादःआत्मज्ञानस्यकर्त्त
व्यत्वात्ततश्चानाशनायादिधर्मवान्भवतीतिसाधनफलविलक्षणोज्ञातव्यः॥अतोव्यतिरेके णात्मनोज्ञानमविद्याअन्योऽहमस्मी

त्तिनसवेदमृत्योस्समृत्युमाप्नोतियइहनानेवपश्यत्येकधैवानुद्रष्टव्यमेकमेवाद्वितीयंतत्वमसीत्यादिश्रुतिभ्यः।क्रियाफलसाधनंचा
शनायादिसंसारधर्मातीतादात्मनोन्यदविद्याविषयंयत्रहिद्वैतमिवभवत्यन्योसावन्योहमस्मीतिनसवेदान्यथातोविदुरि
त्यादिवाक्यशतेभ्यो।नचविद्याविद्येएकस्यपुरुषस्यसहभवतोविरोधात्तमःप्रकाशाविव।तस्मादात्मविदामविद्याविषयो
धिकारोनद्रष्टव्यः।क्रियाकारकफलभेदरूपोमृत्योःसमृत्युमाप्नोतीत्यादिनिंदितत्वात्सर्वक्रियासाधनफलानांचाविद्याविष
याणांतद्विपरीतात्मविद्ययाहातव्यत्वेनेष्टत्वात्।यज्ञोपवीतादिसाधनानांचतद्विषयत्वात्।तस्मादसाधनफलस्वभावादात्म
नोन्यविषयाविलक्षणाएषणाउभेह्येतेसाधनफलेएषणेएवंवतोयज्ञोपवीतादितत्साध्यकर्मणांचसाधनत्वादुभेह्येतेए
८५ षणएवेतिहेतुवचनेनावधारणात्यज्ञोपवीतादिसाधनात्तत्साध्येभ्यश्चकर्मभ्योविद्याविषयत्वादेषणारूपत्वाच्चजिहासितरू
पत्वाच्चव्युत्थानंविधित्सितमेवनतूपनिषदःआत्मज्ञानपरत्वाद्व्युत्थानश्रुतिस्तत्स्तुत्यर्थानविधित्सितविज्ञानेनसमानकर्तृत्व ८५
श्रवणाच्चकर्त्तव्येनकर्त्तव्यस्यसमानकर्तृकत्वेनवेदेकस्यचिदपिश्रवणंसंभवति।कर्त्तव्यानामेवह्यभिषवहोमभक्षाणां
यथाश्रवणमभिषुत्यहुत्वाभक्षयंतीति।तद्वदात्मज्ञानेषणाव्युत्थानभिक्षाचर्याणांकर्त्तव्यानामेवसमानकर्तृत्वश्रवणंन
वेदविद्याविषयत्वादेषणात्वाच्चार्थप्राप्तआत्मज्ञानविधिनैवयज्ञोपवीतादिपरित्यागोनविधातव्यइतिचेन्नसुतरामात्मज्ञानविधि

येष

नैवविहितस्यसमानकर्तृत्वश्रवणेनदार्ढ्योत्पत्तिस्तथाभिक्षाचर्यस्यचयत्पुनरुक्तंवर्त्तमानापदेशादर्थवादमात्रमितिनउदुंब
रयूपादिविधिसमानत्वाददोषः।व्युत्थायभिक्षाचर्यंचरंतीत्यनेनपारिव्राज्यंविधीयते।पारिव्राज्याश्रमेचयज्ञोपवीतादिसाधनानि
विहितानिलिंगंचश्रुतिभिःस्मृतिभिश्चातस्तद्वर्जयित्वान्यस्माद्व्युत्थानमेषणात्वेपीतिचेन्नविज्ञानसमानकर्तृकात्पारिव्राज्यादेषणा
व्युत्थानलक्षणात्पारिव्राज्यांतरोपपत्तेर्यद्धितदेषणाभ्योव्युत्थानलक्षणंपारिव्राज्यंतदात्मज्ञानांगमात्मज्ञानविरोध्येषणापरित्या
गरूपत्वादविद्याविषयत्वाच्चैषणायास्तद्व्यतिरेकेणचास्त्याश्रमरूपंपारिव्राज्यंब्रह्मलोकादिफलप्राप्तिसाधनंयद्विषयंयज्ञोपवीता
दिसाधनविधानंलिंगविधानंच।नचैषणारूपसाधनोपादानस्याश्रमधर्ममात्रेपारिव्राज्यांतरेविषयेसंभवतिसर्वोपनिषद्विहित
स्यात्मज्ञानस्यबाधनंयुक्तं।यज्ञोपवीताद्यविद्याविषैषणारूपसाधनोपादित्सायांचावश्यमसाधनफलरूपस्याशनायादिसंसार
धर्मवर्जितस्याहंब्रह्मास्मीतिविज्ञानंबाध्यतेनचतद्बाधनंयुक्तंसर्वोपनिषदांतदर्थपरत्वात्भिक्षाचर्यंचरंतीत्येषणाग्राहयंतीश्रुतिःस्व
यमेवबाधनमितिचेत्[illegible]पिएषणाभ्योव्युत्थानंविधायपुनरेषणैकदेशांभिक्षाचर्यांग्राहयंतितत्तस्वद्वदन्यदपिग्राहयतीतिचेन्न
हुत्वोत्तरकालभक्षणवत्।शेषप्रतिपत्तिकर्मत्वादप्रयोजकंहितत्।असंस्कारकत्वाच्च।भक्षणंपुरुषसंस्कारकमपिस्यान्नतुभिक्षाच
र्यंनियमादृष्टस्यापिब्रह्मविदोनिष्टत्वात्।नियमादृष्टस्यानिष्टत्वेकिंभिक्षाचर्येणेतिचेन्नान्यसाधनात्व्युत्थानस्यविहितत्वाद्यापि

कृ३ भिक्षाचर्यस्याप्रयोजकत्वात्

किन्नेनेतिवेदाहिस्याद्धमन्त्युपगम्यतेहितत्प्राणिपारिव्राज्येतिहितानिवनानियज्ञोपवीत्येवाधीयीतेत्यादीनितान्यविद्वत्पारिव्रज्य द्वा
मात्रविषयाणीतिपरिहृतानीतरथात्मज्ञानबाधास्यादितिह्युक्तं निराशिषमनारंभंनिर्नमस्कारमस्तुतिंअक्षीणंक्षीणकर्मा
णंतंदेवाब्राह्मणंविदुरितिसर्वकर्माभावंदर्शयतिस्मृतिर्विदुषो। विद्वान्लिंगवर्जितस्तस्मादलिंगोधर्मज्ञइतिच। तस्मात्परम
वु हंसपारिव्राज्यमेवव्युत्थानलक्षणंप्रतिपद्येतात्मवित्सर्वकर्मसाधनपरित्यागरूपमिति। यस्मात्पूर्वेब्राह्मणाएतमात्मानमसाध
नफलस्वभावंविदित्वासर्वस्मात्साधनफलस्वरूपादेषणालक्षणाद्व्युत्थायभिक्षाचर्यंचरंतिस्म। दृष्टादृष्टार्थंकर्मतत्साधनंचहि
त्वातस्मादद्यत्वेपिब्रह्मविद्ब्राह्मणः पांडित्यंपंडितभावमेतदात्मविज्ञानंपांडित्यंतन्निर्विद्यनिःशेषंविदित्वात्मज्ञानंनिरवशेषंकृत्वेत्यर्थः
८५ आचार्यतआगमतश्चकर्तव्यमेषणाभ्योव्युत्थायएषणाव्युत्थानावसानमेवहितत्पांडित्यमेषणातिरस्कारोद्भवत्वादेषणाविरुद्ध
त्वादेषणामतिरस्कृत्यनविषयस्यपांडित्यस्योद्भवइत्यात्मज्ञानेनैवविहितमेषणाव्युत्थानमात्मज्ञानसमानकर्तृकप्रत्यये
पादानलिंगश्रुत्यादृढीकृतं॥ तस्मादेषणाभ्योव्युत्थायज्ञानबलभावेनबाल्येनतिष्ठासेत्स्थातुमिच्छेत्। साधनफलाश्रयणंहि
बलमितरेषामनात्मविदांतद्बलंहित्वाविद्वान्साधनफलस्वरूपात्मविज्ञानमेवबलं। तद्भावमेवकेवलमाश्रयेत्तदाश्रयणेहिक
रणान्येषणाविषयेएनंहृत्वास्थापयितुंनोत्सहंते ज्ञानबलहीनंहिमूढंदृष्टादृष्टविषयायामेषणायामेवैनंकरणानियोज ८६

प्रत्याहगौतमः। योवायः कश्चित्प्राकृतइदंयत्त्वयोक्तंब्रूयात्कथंवेदवेदेत्यात्मानंश्लाघयंकिंतेनगर्जितेनकार्यंदर्शयययावेत्थ
तथाब्रूहीति॥ ॥सहोवाचयाज्ञवल्क्योब्रह्मलोकायस्मिन्नोताश्चप्रोताश्चवर्त्तमानेकालेयथाप्स्वितत्सूत्रमागम्यमितिवक्तव्यमि
तेतदर्थंप्रश्नान्तरमुत्थाप्याहवायुर्वैगौतमतत्सूत्रंनान्यद्वायुरितिसूक्ष्ममाकाशवद्विष्टंभकंपृथिव्यादीनांयदात्मकंसप्तदशविधं
लिंगंकर्मवासनानांसमवायिप्राणिनांयत्तत्समष्टिव्यष्ट्यात्मकंयस्यवाह्याभेदाःसप्तसप्तमरुद्गणाःसमुद्रस्येवोर्मयस्तदेतद्वा
य्वाख्यंतत्त्वंसूत्रमित्यभिधीयते॥ वायुनावैगौतमसूत्रेणायंचलोकःपरश्चलोकःसर्वाणिभूतानिसंदृब्धानिभवन्तिसंग्रथितानिभवं
तीतिप्रसिद्धमेवतदस्तिलोकेप्रसिद्धिःकथंयस्माद्वायुःसूत्रंवायुनाविधृतंसर्वंतस्माद्वैगौतमपुरुषंप्रेतमुद्दिश्याहुःकथयंतिव्यस्रंसि
षतविस्रस्तान्यस्यपुरुषस्यांगानीतिसूत्रापगमेहिमण्यादीनांप्रोतानामवस्रंसनंदृष्टमेवंवायुःसूत्रंतस्मिन्मणिवत्प्रोतानियद्य
स्यांगास्युस्ततोयुक्तमेतद्वाय्वपगमेवस्रंसनमंगानामतोवायुनाहिगौतमसूत्रेणासंदृब्धानिभवन्तीतिनिगमयतिएवमेवतद्याज्ञव
ल्क्यसम्यगुक्तंसूत्रंतदंतर्गतंत्वंविदानीतस्यैवसूत्रस्यनियन्तारं मन्तर्यामिणंब्रूहीत्युक्तआह॥ ॥यःपृथिव्यांतिष्ठन्भवतिसो
त यामीसर्वपृथिव्यांतिष्ठतीतिसर्वत्रप्रसंगोमाभूदितिविशिनष्टिपृथिव्यांतरोभ्यन्तरस्तत्रैतत्स्यात्पृथिवीदेवतेवांतर्या
मीत्यतआहयमंतर्यामिणंपृथिवीदेवतापिनवेदमय्यन्यःकश्चिद्वर्त्ततइतियस्यपृथिवीशरीरंयस्यपृथिव्येवशरीरंनान्यत्पृथिवीदे

वतायायच्छरीरंतद्देवताशरीरंयस्याशरीरग्रहणंचोपलक्षणार्थंकरणंचपृथिव्यास्तस्यस्वकर्मप्रयुक्तंहिकार्यंकरणंचपृथिवीदेवताया
स्तदस्यस्वकर्मानिवादन्तर्यामिणोनित्यमुक्तत्वात्परार्थकर्त्तव्यतास्वभावत्वात्परस्यंयत्कार्यंकरणंचतदेवास्यनस्वतस्तदाद्यस्य
पृथिवीशरीरमितिदेवताकार्यकरणस्येश्वरसाक्षिमात्रसानिध्येनहियमेनप्रवृत्तिनिवृत्तीस्यातांयईदृशःईश्वरोनारायणाख्यःपृथिवीं
पृथिवी देवतांयमयतिनियमयतिस्वव्यापारेतरोन्तरस्तिष्ठन्नेषतआत्मातेतवममस्वसर्वभूतानामित्युपलक्षणार्थमेतदंतर्यामीयस्त्वयापृष्टोमृ
तःसर्वसंसारधर्मवर्जितइत्येततस्मानमन्यद्योप्सुतिष्ठन्नग्नावन्तरिक्षेवायोदिव्यादित्येदिक्षुचंद्रतारकआकाशेघस्तमसिआवरणात्म
केवाह्यतमसितेजसितद्विपरीतेप्रकाशसामान्यइत्येवमधिदेवमन्तर्यामिविषयंदर्शनंदेवतासुअथाधिभूतंभूतेषुब्रह्मादिस्तम्बपर्यन्तेष्व
८९ न्तर्यामिदर्शनमधिभूतमथाध्यात्मंयःप्राणोप्राणवायुसहितेघ्राणेयोवाचिचक्षुषिश्रोत्रेमनसित्वचिविज्ञानेबुद्धौरेतसिप्रजनने॥ ॥ ८
कस्मात्पुनःकारणात्पृथिव्यादिदेवतामहाभागाःसत्योमनुष्यादिवन्नआत्मनितिष्ठंतमात्मनोनियंतारमंतर्यामिणंनविदुरित्यतआहाऽ ब्रि
दृष्टोनदृष्टोनविषयीभूतश्चक्षुर्दर्शनस्यकस्यचित्स्वयंतुचक्षुषिसंन्निहितत्वाद्दृशिस्वरूपइतिद्रष्टातथाश्रुतःश्रोत्रगोचरमनापन्नः
कस्यचित्स्वयंत्वलुप्तश्रवणशक्तिःसर्वश्रोत्रेषुसंनिहितत्वात्श्रोता।तथाऽमतोमनःसंकल्पविषयमनापन्नःदृष्टश्रुतएवहिसर्वःसर्व
संकल्पयत्यदृष्टत्वादश्रुतत्वाच्चामतोलुप्तमननशक्तित्वात्सर्वमनःसुसन्निहितत्वाच्चमंतातथाऽविज्ञातोनिश्चयगोचरमनापन्नोरूप

केषुब्रह्मलोकाब्रह्मांडारंभकाणिभूतानिसर्वत्रहिसूक्ष्मतारतम्यक्रमेणप्राण्युपभोगाश्रयाकारपरिणतानितान्येवपंचेतिव
ऊक्तवचनंशांतिःकस्मिन्नुखलुब्रह्मलोकाओताश्चप्रोताश्चेतिसहोवाचयाज्ञवल्क्योहेगार्गिमातिप्राक्षीः॥स्वंप्रश्नन्यायप्रकारमतीत्या
गमेनप्रष्टव्यांदेवतामनुमानेनमाप्राक्षीरित्यर्थःप्रच्छंत्याश्चमातेतवमूर्द्धाशिरव्यपतद्विस्पष्टंपतेद्देवतायाःस्वःप्रश्नःआगमविषयस्तं
म प्रश्नविषयमतिक्रांतोगार्ग्याःप्रश्नआनुमानिकत्वात्सयस्याःप्रश्नदेवतायाःसातिप्रश्न्यानअतिप्रश्न्यास्वप्रश्नविषयेवकेवलागम ग
म्येत्यर्थः।तामनतिप्रश्न्यांवैदेवतामतिपृच्छस्यतोगार्गिमातिप्राक्षीर्मर्त्तुंचेन्नेच्छसि।ततोहगार्गीवाचक्नव्युपरराम॥पंचमस्यषष्ठं
ब्राह्मणं॥ ॥इदानीब्रह्मलोकानामंतरतमंसूत्रंवक्तव्यमितितदर्थआरंभःआगमेनैवप्रष्टव्यमितीतिहासेनागमोपन्यासःक्रि
पत्यमा यते।अथहैनमुद्दालकोनामतोआरुणस्यारुणिःपप्रच्छयाज्ञवल्क्येतिहोवाचमद्रेषुदेशेष्ववसामोवितवंतःपतंचलस्यपतंचलोना
मतस्तस्यैवकपिगोत्रस्यकाप्यस्यगृहेषुयज्ञमधीयानाःयज्ञशास्त्राध्ययनंकुर्वाणास्तस्यासीद्भार्यागंधर्वगृहीतातमपृच्छामको ५
सीतिसोब्रवीत्कबंधोनामतोथर्वणापत्यमाथर्वणइतिसोब्रवीगंधर्वःपतंचलंकाप्यंयाज्ञिकांश्चतच्छिष्यानवेत्थनुत्वंहेका
प्यजानीषेतत्सूत्रंकिंतद्येनसूत्रेणायंचलोकइदंचजन्मपरश्चलोकःपरंचप्रतिपत्तव्यंजन्मसर्वाणिचभूतानिब्रह्मादीनिस्तम्बपर्यंता
निसंदृब्धानि।संग्रथितानिस्रगिवसूत्रेणविष्टब्धानिभवंतियेनतत्किंसूत्रंवेत्थसोब्रवीदवंपृष्टःकाप्योनाहंतद्भगवन्वेदेतितम

त्वंनाहं तानेहं जगवंत्निति संपूज्यं न्नाह। सोब्रवीत्पुनर्गंधर्वंतपाध्यायमस्मांश्च वेत्थनुत्वंकाप्यतमंतर्यामिणमंतर्यामी विशेषयेते
यइमंचलोकंपरंचलोकंसर्वाणिचभूतानियोंतरोयमयतिनियमयतिदानुयंत्रमिकत्रमयतियःस्वंस्वमुचितंव्यापा
रंकार्यतीतिसोब्रवीदेवमुक्तःपतंचलःकाप्योनाहंतंजागवन्वेदेतिसोब्रवीत्पुनःगंधर्वःसूत्रतदंत गोअंतर्यामिणोर्विज्ञानंस्तू
यतेयःकश्चिद्वैतत्सूत्रंहेकाप्यविद्याद्विजानीयात्तंवांतर्यामिणंसूत्रांतर्गतंतस्यैवसूत्रस्यनियंतारंविद्याद्यःइतिएवमुक्तेनप्रका
रेणसहिब्रह्मवित्सआत्मवि त्सलोकांश्च तरादीनंतर्यामिणानियम्यमानांल्लोकान्वेत्तिसदेवांश्चाग्न्यादीन्लोकिनोजाना
८८ तिवेदांश्चसर्वप्रमाणभूतान्वेत्तिभूतानिचब्रह्मादीनिसूत्रेणध्रियमाणानितदंतर्गतेनांतर्यामिणानियम्यमानानिवेत्तिसआत्मा
त नंचकर्तृत्वभोक्तृत्वविशिष्टंतेनैवांतर्यामिणानियम्यमानंवेत्तिसर्वंचजगत्तथाभूतंवेत्तिपवंस्तूतेसूत्रा तर्यामिविज्ञानेप्रलुब्धः
काप्योभिमुखीभूतोवयंचतेच्छिष्यास्मभ्यमभिमुखीभूते त्याब्रवीद्गंधर्वःसूत्रमंतर्यामिणंचतदहंसूत्रांतर्यामिविज्ञानंवेदगंध
र्वाल्लब्धागमःसंनद्धेतल्लंयाज्ञवल्क्यसूत्रंतंवांतर्यामिणमविद्वांश्चेद्ब्रह्मवित्सन्यदिब्रह्मगविरुदजासेब्रह्मविदांस्वभूतांगाउद
जसेउन्नयसित्वमन्यायेनततोमच्छापदग्धस्यमूर्द्धाशिरस्तेतवव्यपतिष्यतिविस्पष्टंपतितिएवमुक्तोयाज्ञवल्क्यआह।वेदहंनाम्यहं
गोतमइतिगोत्रतःतत्सूत्रंयस्त्वंगंधर्वस्तून्यमुक्तवानुयंचांतर्यामिणंगंधर्वाद्धिदितवंतोयूयंतंचांतर्यामिणंवेदाहमित्येवमुक्ते ८८
ष्यते।२

ना
ना४
यंति।वल्कंनामात्मविद्यायाःसर्वान्यविषयतिरस्करणमतस्तद्भावेनवाल्येनतिष्ठासेत्तद्यात्मनाविन्दंतेवीर्यमितिश्रुत्यंतरातन्नाय
मात्माबलहीनेनलभ्यइतिच।वाल्यंचपांडित्यंचनिर्विद्यनिःशेषंकृत्वाथमननान्मुनिर्योगीत्वत्पेतावद्धिब्राह्मणेनकर्त्त
व्यंयदुत्तसर्वात्मप्रत्ययतिरस्कार।एतत्कृत्वाकृतकृत्योयोगीभवतिअमौनंमौनंचात्मविज्ञानानात्मप्रत्ययतिरस्कारौपांडि
त्यवाल्यसंज्ञकौनिः शेषंकृत्वामौनंनामात्मप्रत्ययतिरस्करणस्यपर्यवसानंफलंतच्चनिर्विद्याथब्राह्मणःकृतकृत्योभवतिब्र
ह्मैवसर्वमितिप्रत्ययउपजायते।सब्राह्मणःकृतकृत्योअतोब्राह्मणोनिरस्यचरितंहितदातस्यब्राह्मण्यंप्राप्तमतआहसब्राह्मणः
केनस्यात्।केनचरणेनभवेद् येनस्यात्।येनचरणेनभवेत्तेनेदृशएवांयेनकेनचिच्चरणेनस्यात्तेनेदृश एवउक्तलक्षणए
वब्राह्मणोभवति।येनकेनचि च्चरणेनेतिस्तुत्यर्थंयंब्रह्मण्यावस्थाइयंस्तूयते।नतुचरणेऽनादरोतएतस्माद्ब्राह्मण्या
वस्थानादन्यानायद्यतीतात्मस्वरूपान्नित्यत्वमात्प्रादन्यदविद्याविषयमेषणालक्षणंवस्त्वंतरमार्त्तंविनाश्यार्त्तिपरिगृहीतं
स्वप्नमायामरीच्युदकसममसारमात्मैवेकःकेवलोनित्यमुक्तइतिततोहकहोलःकौषीतकेयउपरराम॥ ॥पंचमस्यपं
चमंब्राह्मणं॥ ॥यत्साक्षादपरोक्षाद्ब्रह्मसर्वांतरआत्मेयुक्तं।तस्यसर्वांतरस्यस्वरूपाधिगमायान्नाकल्यब्राह्मणाद्भं
थआरभ्यते।पृथिव्यादीनिद्याकाशांतानिस्थूलान्यंतर्वहिर्भावेनव्यवस्थितानि।तेषांयद्यद्यंवाह्यमधिगम्याधिगम्यनिराकु
यं६

र्वद्रष्टृःसाक्षात्सर्वांतरोगौणःआत्मासर्वसंसारधर्मविनिर्मुक्तोवक्तव्यइत्यारंभः। अथहैनंगार्गीनामतोवाचक्नवीव
क्नोर्दुहितापप्रच्छयाज्ञवल्क्येतिहोवाच। यदिदंसर्वंपार्थिवंधातुजातमप्सूदकउतंचप्रोतंच। उतंदीर्घपटतंतुवत्प्रोतंतिर्यक्तंतु
वद्विपरीतंवा॥ अद्भिः सर्वतो न्तर्बहिर्भूताभिर्व्याप्तमित्यर्थः। अन्यथातत्सक्तुमुष्टिवद्विशीर्येत। इदंतावदनुमानमुपन्यस्तं
यत्कार्यंपरिच्छिन्नंस्थूलंकारणेनसूक्ष्मेणव्याप्तमितिदृष्टंयथापृथिव्यद्भिः। तथापूर्वमुत्तरेणोत्तरेणव्याप्तेनभवितव्यमित्येषआसर्वां
तरादात्मनःप्रश्नार्थः। तत्रभूतानिपंचसंहतान्येवोत्तरमुत्तरंसूक्ष्मभावेनव्यापकेनकारणेनरूपेताव्यवतिष्ठंतेनचपरमा
त्मनोर्वाक्तद्व्यतिरेकेणवस्त्वंतरमस्तिसत्यस्यसत्यमितिश्रुतेःसत्यंवाभूत पंचकंसत्यस्यसत्यंचापरआत्मा। कस्मिन्नुखल्वापः
२१ ओताश्चप्रोताश्चेति। तासामपिकार्यत्वात्स्थूलत्वात्परिच्छिन्नत्वाच्चक्वचिदोतप्रोतभावेनभवितव्यं। क्वतासामोतप्रोतभावइत्ये
वमुत्तरोत्तरप्रश्नप्रसंगोयोजयितव्यः। वायौगार्गीतिनचाग्नाविति वक्तव्यं। नैषदोषोग्नेःपार्थिवंवाआप्यंवाधातुमनाश्रित्येत २१
रभूतवत्स्वातंत्र्येणात्मलाभोनास्तीतितस्मिन्नोतप्रोतभावोनोपदिश्यते। कस्मिन्नुखलुवायुरोतश्चप्रोतश्चेत्यंतरिक्षलोके
षुगार्गीति। तान्यपिभूतानिसंहतान्यंतरिक्षलोकास्तान्यपिगंधर्वलोकेषुगंधर्वलोकाआदित्यलोकेषुआदित्यलोकाश्चंद्रलोकेषुचं
द्रलोकानक्षत्रलोकेषु। नक्षत्रलोकादेवलोकेषुदेवलोकाइंद्रलोकेंद्रलोकाविराट्शरीरारंभकेषुप्रजापतिलोकेषुप्रजापतिलोकाब्रह्मलो

केषुइंद्रलो

मान्योऽतोनास्तिद्रष्टाश्रोतामंताविज्ञातायोऽदृष्टोद्रष्टाऽश्रुतःश्रोताऽमतोमंताऽविज्ञातोविज्ञाताऽ२

पादिवन्नचक्षुरादिवद्वा। स्वयंतुलुप्तविज्ञानत्वात्किंचित्तथासन्निधानाच्चविज्ञाता। तत्रयंपृथिवीन वेदयंसर्वाणिभूतानिनविदुरितिवाक्ये
नियंतव्याविज्ञातारोन्योनियंतांतर्यामीतिप्राप्तंतदन्यत्वाशंकानिवृत्त्यर्थमुच्यतेनान्योऽतोना न्यः अतोस्मादंतर्यामिणोनान्योद्रष्टाश्रोतामं नोऽस्ति तथा
ताविज्ञातायोऽदृष्टोद्रष्टाऽश्रुतःश्रोताऽमतोमंताऽविज्ञातोविज्ञाताऽमृतःसर्वसंसारधर्मवर्जितःसर्वसंसारिणांकर्मफलविभागकर्तैषत नान्योऽस्ति
त आत्माऽन्तर्याम्यमृतोऽतोस्मादीश्वरादात्मनोऽन्यदार्तंततोहोद्दालकआरुणिरुपररामपंचमस्यसप्तमंब्राह्मणं॥ ॥अतःपरमशनायादि
विनिर्मुक्तंनिरुपाधिकंसाक्षादपरोक्षात्सर्वांतरंब्रह्मवक्तव्यमित्यतआरंभः॥ अथहवाचक्नव्युवाच। पूर्वंयाज्ञवल्क्येननिषिद्धामू
र्धपातभयादुपरतासतीपुनःप्रष्टुंब्राह्मणानुज्ञांप्रार्थयते। हेब्राह्मणाभगवंतःपूजावंतःशृणुतममवचोहंतअहमिमंयाज्ञव
ल्क्यंपुनर्द्वौप्रश्नौप्रक्ष्यामि। यद्यनुमतिर्भवतामस्तितौप्रश्नौचेद्यदिवक्ष्यतिकथयिष्यतिकथंचिन्नवैजातुकदाचिद्युष्माकंम
ध्येइमंयाज्ञवल्क्यंकश्चिद्ब्रह्मोद्यंब्रह्मवदनंप्रतिजेतानैवंकश्चिद्भवेदित्येवमुक्ताब्राह्मणाअनुज्ञांप्रददुःपृच्छगार्गीतिलब्धानु
ज्ञाहायाज्ञवल्क्यंसाहोवाचाहंवैत्वायाज्ञवल्क्ययथालोकेकाश्यःकाशिषुभवःकाश्यःप्रसिद्धंशौर्येकाश्योवैदेहोवाविदेहानांराजा
उग्रपुत्रःशूरान्वयइत्यर्थः। उज्ज्यमवतारितज्याकंधनुःपुनरधिज्यमारोपितज्याकंकृत्वाद्वौबाणवंतौबाणशब्देनशराग्रेयोवंशखंडः
संधीयते। तंविनापिशरोभवतीत्यतोविशिनष्टिबाणवंताविति। द्वौबाणवंतौचशरौसपत्नातिव्याधिनौशत्रोः

धींङ्गाकरा वतिशयेन। हस्ते कृत्वा उपेत्तिष्ठेत्समीपत आत्मानं दर्शयिदेवमेवाहं त्वाशरस्थानीयाभ्यां प्रश्नाभ्यां द्वाभ्यामुपोदस्थामु
पस्थितवत्यस्मि त्वत्समीपेतौ मे ब्रूहीति ब्रह्मविद्वदाहेतरः पृच्छ गार्गीति। साहोवाचायदूर्ध्वमुपरि दिवोऽंडकपालाद्यच्चावागधः
पृथिव्या अधोंऽडकपाला द्यच्चांतरामध्ये द्यावापृथिवी द्यावापृथिव्योरंडकपालयोरिमे यद्यावापृथिवी यद्भूतंचा तीतं यच्च वर्त्तमा
नं स्वव्यापारस्थं भविष्यच्च वर्त्तमाना दूर्ध्वं कालचाविलिंगगम्यं यत्सेमेतदाचक्षते। कथयंत्यागमतः सूत्रसर्वं द्वैतजातं यस्मिन्नेकल
वतीत्यर्थः स्तत्सूत्रसंज्ञं पूर्वोक्तं कस्मिन्नोतंच प्रोतंच पृथिवी धातुरिवाप्सु सहोवाचेतरो हे गार्गीयस्त्वयोक्तं मूर्द्धन्दिवइत्यादितत्सर्वं
यत्सूत्रमाचक्षते तत्सूत्रमाकाशोतदोतंच प्रोतंच यदेतद्व्याकृतं सूत्रात्मकं जगद्व्याकृताकाशेप्स्विवपृथिवीधातुस्त्रिष्वपिकालेषुव
८० र्त्तते। उक्तार्थोस्थितोलयेच पुनः साहोवाच नमस्तेस्त्वित्यादि प्रश्नस्य दुर्वचस्त्वप्रदर्शनार्थ यो मे ममएतं प्रश्नं व्यवोचो विशेषेणाया
कृतवानस्यो। तदस्य दुर्वचस्त्वे कारणं सूत्रमेव तावदितरैर्दुर्वाच्यं किमुत यस्मिन्नोतंच प्रोतं चेत्यतो नमो स्तुते तुभ्यमपरस्मै द्विती
यायप्रश्नायधारयस्वदृढीकुर्वात्मानमित्यर्थः। पृच्छ गार्गीतीतर आह। व्याख्यातमन्यत् साहोवाच यदूर्ध्वं याज्ञवल्क्ये त्यादिप्र
श्नप्रतिवचनं चोक्तस्यैवार्थस्यावधारणार्थं पुनरुच्यते। नकिंचिदपूर्वमर्थांतरमुच्यते। सर्वयथोक्तं गार्ग्या प्रत्युच्चार्यतमेव पूर्वोक्त ८०
मर्थमवधारितवानाकाश एवेति सा होवाच। कस्मिन्नु खल्वाकाशऽ तश्च प्रोतश्चेति आकाशमेव तावत्कालत्रयातीत त्वाद्दु

र्वाच्यां ततोपि कष्टतरमक्षरं यस्मिन्नाकाश ओतं प्रोतं वातो वाच्यमिति कृत्वा न प्रतिपद्यते। साः प्रतिपत्तिर्नाम निग्रहस्थानं
तार्किकसमये ऽथावाच्यमपि वक्ष्यति तथापि विप्रतिपत्तिर्नाम निग्रहस्थानं विरुद्धा प्रतिपत्तिर्हि सायदवाच्यस्य वदनमतोदु
र्वचं प्रश्नं मन्यते गार्गीतितद्दोष द्वयमपि परिजिहीर्षन्नाह। सहोवाच याज्ञवल्क्यः एतद्वै तद्यत्पृष्टवत्यसि कस्मिन्नु खल्वाकाश
ओतश्च प्रोतश्चेति किं तदक्षरं। तेन्नक्षीयते नक्षरतीति वादेक्षरं। तदक्षरं हे गार्गि ब्राह्मणा ब्रह्मविदोभि वदंति। ब्राह्मणाभिवदनक
थनेन नाहमवाच्यं वक्ष्यामि न च न प्रतिपद्ये यमित्येवं दोषद्वयं परिहरत्येवमपाकृते प्रश्ने पुनर्गार्ग्याः प्रतिवचनं द्रष्टव्यं ब्रूहि किं तदक्षरं
यद्ब्राह्मणा अभिवदंतीत्युक्तआह। अस्थूलं तत स्थूलादन्यदेवं तर्हि अणु अणु अस्तु तर्हि ह्रस्वमह्रस्वमेवं तर्हि दीर्घमदीर्घमेवमेतैश्च
तुर्भिः परिमाणप्रतिषेधैर्द्रव्यधर्मप्रतिषिद्धो न द्रव्यं तदक्षरमित्यर्थः। अस्तु तर्हि लोहितोगुणस्ततोप्यन्यदलोहितमाग्नेयोगुणोलो
हित एव तु तर्ह्यपां स्नेहनं न अस्नेहमस्तु तर्हि छाया सर्वथाप्यनिर्देश्यत्वाच्छायाया अप्यन्यदच्छायमस्तु तर्हि तमः तमोऽस्तु वायु
र्नवायुः एवं तर्ह्याकाशमनाकाशं एवं तु तर्हि संगात्मकं जतुवदसंगं रसोस्तु तर्ह्यरसं तथा अगंधमस्तु तर्हि चक्षुष्कं अचक्षुष्कं नहि च
क्षुरस्य करणं विद्यते अतोचक्षुष्कं पश्यत्यचक्षुरिति मंत्रवर्णात्तथा श्रोत्रं स प्रणोत्यकर्ण इति एवं तु तर्हि वागवाक्तथा अमनः। तथा
अतेजस्कं न हि तेजो स्यादि प्रकाशावदस्य विद्यते प्राणमाध्यात्मिको वायुः प्रतिषिध्यते ऽप्राणमिति मुखं तर्हि द्वारं तदमुखममात्रं।

१अविद्यमाने तेजोस्यातदतेजस्कं१

मीयते येन तेन्मात्रं मनात्रं मात्रारूपं तन्न भवति न तेन किंचिन्मीयते अस्तु तर्हि छिद्रवदंतरवदनंतरं नास्यांतरंस्तीत्येतर्हि बहि स
स्तस्यावाह्यमस्तु तर्हि भक्षयितृ तत् न तदश्नाति किंचन भवेत्तर्हि भक्ष्यं कस्यचित् न तदश्नाति कश्चन सर्वविशेषणरहितमित्यर्थः।
एकमेवाद्वितीयं हि तत् केन किं विशिष्येत अनेकविशेषणप्रतिषेधप्रयासादस्तित्वं तावदक्षरस्योपगमितं श्रुत्या। तथापि लोकबु
द्धिमपेक्ष्याशंक्यते यतोऽतोऽस्तित्वयानुमानं प्रमाणमुपन्यस्यत्येतस्य वा अक्षरस्य यदेतदधिगतमक्षरं सर्वांतरं साक्षादपरोक्षा
द्ब्रह्म य आत्माशनायादिधर्मातीतः। एतस्य वै अक्षरस्य प्रशासने यथा राज्ञः प्रशासने राज्यमस्फुटितं वर्तते। एवमेतस्याक्षरस्य
प्रशासने हे गार्गि सूर्याचंद्रमसौ सूर्यश्च चंद्रमाश्च सूर्याचंद्रमसौ अहोरात्रयोर्लोकप्रदीपौ तादर्थ्येन प्रशासित्रा नि
९१ र्वर्तमानलोकप्रयोजनविज्ञानवता निर्मितौ विधृतौ च स्यातां साधारणसर्वप्राणिप्रकाशोपकारकत्वाल्लौकिकप्रदीप ९१
वत्तस्मादस्ति तद्येन विधृतावीश्वरेश्च तं तत्र संतौ निर्मितौ तिष्ठतो नियतदेशकालनिमित्तोदयास्तमयवृद्धिक्षयाभ्यां च वर्तेते।। तद
स्त्येवं तयोः प्रशासित्रक्षरं प्रदीपकर्तृविधारयितृवदेतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ द्यौश्च पृथिवी च सावयव
त्वात्स्फुटनस्वभावेऽपि सत्यौ गुरुत्वात्पतनस्वभावे संयुक्तत्वाद्वियोगस्वभावे चेतनावदभिमानिदेवताधिष्ठितत्वात्स्वतंत्रे
अप्येतस्याक्षरस्य प्रशासने वर्तेते विधृते तिष्ठतः। एतद्ध्यक्षरं सर्वव्यवस्थासेतुः सर्वमर्यादाविधरणमतो नास्याक्षरस्य प्र

शासनं द्यावापृथिव्यावतिक्रामतः। तस्मात्सिद्धमस्यास्तित्वमक्षरस्याव्यभिचारि ह्येतल्लिंगं यद्द्यावापृथिवी नियते वर्तेते चेत ते
नावतं प्रशासितारमसंसारिणमंतरेण नेतद्युक्तं येन द्यौरुग्रा पृथिवी च दृढेति मंत्रवर्णात्। एतस्य वा अक्षरस्य निमेषा मुहूर्ता
इत्येते कालावयवाः सर्वस्यातीतानागतवर्तमानस्य जनिमतः कलयितारो। यथा लोके प्रभुणा नियतो गणकः सर्वमायं व्ययं वा
प्रमत्तो गणयति। तथा प्रभुस्थानीय एषां कालावयवानां नियंता तथा प्राच्यः प्रागंचनाः पूर्वदिग्गमना नद्यः स्यंदंते स्रवंते स्रवंति
श्वेतेभ्यो हिमवदादिभ्यः पर्वतेभ्यो गंगाद्या नद्यस्ताश्च यथा प्रवर्तिता एव नियताः प्रवर्तंते अन्यथापि प्रवर्तितुमुत्सहंत्यस्तदेतल्लि
गं प्रशास्तुः प्रतीच्योऽन्याः प्रतीचीं दिशमं वंति सिंध्वाद्या नद्यः अन्याश्च यां यां दिशमनुप्रवृत्तास्तां तां न व्यभिचरंति। तच्च लिंगं किं
च ददतो हिरण्यादीन्प्रयच्छतः। आत्मपीडां कुर्वतोऽपि प्रमाणज्ञा अपि मनुष्याः प्रशंसंति तत्र यच्च दीयते ये च ददति ये च प्रतिगृह्ण
ति तेषामिहैव समागमो विलयश्चानंतरं दृश्यते दृष्टस्तु परः समागमः। तथापि मनुष्या ददतो दानफलेन संयोगं पश्यंतः प्रमाण
ज्ञतया प्रशंसंति तच्च कर्मफलेन संयोजयितरि कर्तुः कर्मफलविभागज्ञे प्रशास्तर्यसति न स्याद्दानक्रियायाः प्रत्यक्षविनाशि
त्वात् तस्मादस्ति दानकर्तृणां फलेन संयोजयिता। अपूर्वमिति चेन्न तत्सद्भावे प्रमाणानुपपत्तेः प्रशास्तुरपीति चेन्नागमतात्प
र्यस्य सिद्धत्वादवोचाम ह्यागमस्य वस्तुपरत्वं किंचान्यदपूर्वकल्पनायां चार्थापत्तेः क्षयोऽन्यथाप्युपपत्तेः सेवाफलस्य सेव्यात्प्रा

प्तिदर्शनात्सेवायाश्च क्रियात्वात्तत्सामान्याच्च यागदानहोमादीनांसेव्यादीश्वरादेः फलप्राप्तिरुपपद्यते। दृष्टक्रियाधर्मसाम
र्थ्यमपरित्यज्यैव फलप्राप्तिकल्पनोपपत्तौ दृष्टक्रियाधर्मसामर्थ्यपरित्यागोऽन्याय्यः कल्पनाधिक्याच्च। ईश्वरः कल्प्योऽपू
र्वं वा। तत्र क्रियायाश्च स्वभावः सेव्यात्फलप्राप्तिर्दृष्टा न त्वपूर्वात्। न चापूर्वं दृष्टं तत्रापूर्वमदृष्टं कल्पयितव्यं। तस्य च फलदातृत्वे सा
मर्थ्यसामर्थ्ये च सति दानं चाप्यधिकमिति। इह त्वीश्वरस्य सेव्यस्य सद्भावमात्रं कल्प्यं न तु फलदानसामर्थ्यं दातृत्वं च सेव्यात्फ
लप्राप्ति दर्शनादनुमानं दर्शितं द्यावापृथिव्यौ विधृते तिष्ठत इत्यादि। तथा च यजमानं देवा ईश्वराः संतो जीवनार्थेऽन्वायत्ताः
अनुगताश्चरुपुरोडाशाद्युपजीवनप्रयोजनेनान्यथापि जीवितुमुत्सहंतः कृपणां दीनां वृत्तिमास्थिताः स्तत्प्रशासनात्स्यात्। यथा
९३ पितरोऽपि दर्वीहोममन्वायत्ता अनुगता इत्यर्थः। समानं सर्वमन्यत् इतश्चास्ति तदक्षरं यस्मात्तदज्ञानेनि यतासंसारोपपत्ति
वितव्यं तु तेन यद्विज्ञानात्तद्विच्छेदोऽन्यथोपपत्तेः ननु क्रियात एव तद्विच्छित्तिः स्यादिति चेन्न यो वा एतदक्षरं हे गार्ग्यविदित्वाऽविज्ञा
यास्मिन्लोके जुहोति यजते तपस्तप्यते। यद्यपि बहूनि वर्षसहस्राण्यंतवदेवास्य तत्फलं भवति। तत्फलोपभोगात्क्षीयंत एवा ९२
स्य कर्माणि। अपि च यद्विज्ञानात्कार्पण्यात्ययः संसारविच्छेदो यद्विज्ञानाभावाच्च कर्मकृत्कृपणः कृतफलस्यैवोपभोक्ता जननमर

णप्रबंधारूढः संसरति तदस्त्यक्षरं प्रशासितृ तदेतदुच्यते यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपणः। पणक्री
तइव दासादिः अथ य एतदक्षरं गार्गि विदित्वास्माल्लोकात्प्रैति स ब्राह्मणः॥ अग्नेरिंधनप्रकाशकत्ववत्स्वाभाविकमस्य प्र
शास्तृत्वमचेतनस्यैवेत्यत आह। तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृ न केनचिद्दृष्टमविषयत्वात्स्वयं तु द्रष्टृ दृष्टिस्वरूपत्वात्तथाऽश्रुतं श्रोतृ
अविषयत्वात्स्वयं श्रोतृ श्रुतिस्वरूपत्वात्तथाऽमतं मन्तृ मनसोऽविषयत्वात्स्वयं मंतृ मतिस्वरूपत्वात्। तथाविज्ञातं बुद्धेरविषयत्वात्स्वयं वि
ज्ञातृ विज्ञानस्वरूपत्वात्। किंच नान्यदतोऽस्मादक्षरादस्ति नास्ति किंचित् द्रष्टृ दर्शनक्रियाकर्तृ एतदेवाक्षरं दर्शनक्रियाकर्तृ सर्वत्र। तथा
नान्यदतोऽस्ति श्रोतृ तदेवाक्षरं श्रोतृ सर्वत्र नान्यदतोऽस्ति मंतृ सर्वमनोद्वारेण नान्यदतोऽस्ति विज्ञातृ विज्ञानक्रियाकर्तृ तदेवाक्षरं सर्व
बुद्धिद्वारेण विज्ञानक्रियाकर्तृ नाचेतनं प्रधानमन्यद्वा एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति यदेव साक्षादपरोक्षाद्ब्रह्म। य आ
त्मा सर्वांतरोऽशनायादिसंसारधर्मातीतो। यस्मिन्नाकाश ओतश्च प्रोतश्चैषा परा काष्ठैषा परा गतिरेतत्परं ब्रह्मैतत्पृथिव्यादेराकाशा
न्तस्य सत्यस्य सत्यं सा होवाच ब्राह्मणा भगवंतः शृणुत मदीयं वचः तदेव बहु मन्येध्वं मन्यध्वं। किं तत्। यदस्माद्याज्ञवल्क्यान्नम
स्कारेण मुच्येध्वमस्मै नमस्कारं कृत्वा तदेव बहु मन्यध्वमित्यर्थः। जयस्त्वस्य मनसापि नाशंसनीयः किमुत कार्यतः कस्मान्न वै
युष्माकं मध्ये जातु कदाचिदपीमं याज्ञवल्क्यं ब्रह्मोद्यं प्रति जेता प्रश्नो चेन्मह्यं वक्ष्यति न वै जेता न भवितेति पूर्वमेव मया प्रतिज्ञातमद्या

पिमनमायमेव निश्चयो। ब्रह्मोद्यं प्रत्येतत्तुल्यो न कश्चिद्विद्यत इति। ततो ह वाचक्नव्युपरराम॥ ॥अत्रांतर्यामिब्राह्मणे एतदु
क्तं यं पृथिवी न वेद यं सर्वाणि भूतानि न विदुरिति वियमंतर्यामिणं न विदुर्ये च न विदुर्यश्च तद्दर्शनादिक्रियाकर्तृत्वेन सर्वेषां
चेतनाधातुरित्युक्तं कस्तेषां विशेषः किं वा सामान्यमिति तत्र केचिदाचक्षते परस्य महासमुद्रस्थानीयस्य ब्रह्मणोऽक्षरस्याप्रचलि
तस्वरूपस्येषत्प्रचलितावस्थान्तर्यामित्वं अत्यंतप्रचलितावस्था क्षेत्रज्ञो यस्तं न वेदांतर्यामिणं तथान्याः पंचावस्थाः परिकल्पयं
ति तथाष्टावस्था ब्रह्मणो भवंतीति वदंतोऽन्येऽक्षरस्य शक्तय एता इति वदंत्यनंतशक्तिमदक्षरमिति वान्ये त्वक्षरस्य विकारा इ
ति वदंत्यवस्थाशक्ती त्वेतावन्नोपपद्येते। अक्षरस्याशनायादिसंसारधर्मातीतत्वश्रुतेर्न ह्यशनायाद्यतीतत्वमशनायादि
८३ धर्मवदवस्थावत्त्वं चैकस्य युगपदुपपद्यते। तथा शक्तिमत्त्वं च विकारावयवत्वे दोषाः प्रदर्शिताश्चतुर्थे। तस्मादेता असत्याः सर्वाः
कल्पनाः कस्तर्हि भेद एषामुपाधिकृत इति ब्रूमो न स्वत एषां भेदो भेदो वा सैंधवघनवत्प्रज्ञानघनैकरसस्वाभाव्यादपूर्वम ८३
नपरमनंतरमबाह्यमयमात्मा ब्रह्मेति च श्रुतेः सबाह्याभ्यंतरो ह्यज इति चाथर्वणे। तस्मान्निरुपाधिकस्यात्मनो निरूपाख्यत्वा
न्निर्विशेषत्वादेकत्वाच्च नेति नेतीति व्यपदेशो भवति। अविद्याकामकर्मविशिष्टकार्यकरणोपाधिरात्मा संसारी जीव उच्यते नि
त्यनिरतिशयज्ञानशक्त्युपाधिरात्मांतर्यामीश्वर उच्यते स एव निरुपाधिः केवलः शुद्धः स्वेन स्वभावेनाक्षरं परं उच्यते तथा हिरण्यगर्भा

व्याकृतदेवताजातिपिंडमनुष्य[illegible]तिर्यक्प्रेतादिकार्यकरणोपाधिविशिष्टस्तदाख्यस्तद्रूपो भवति त[illegible]यात
द्गतीति तन्नेजतीति व्याख्यातं तथैष त आत्मा[illegible]मेष सर्वभूतांतरात्मैष सर्वभूतेषु गूढस्तत्त्वमस्यहमेवेदं स
र्वं आत्मैवेदं सर्वं नान्योऽतोऽस्ति द्रष्टा नान्यदतोऽस्ति द्रष्टित्यादिश्रुतयो न विरुध्यंते कल्पनांतरेष्वेताः श्रुतयो न गच्छंतीति तस्मा
दुपाधिभेदेनैवैषां भेदो नान्यथैकमेवाद्वितीयमित्यवधारणात्सर्वोपनिषत्सु॥ ॥अथ हैनं विदग्धः शाकल्यः पप्रच्छ पृ
थिव्यादीनां सूक्ष्मतारतम्यक्रमेण पूर्वस्य पूर्वस्योत्तरोत्तरस्मिन्नोतप्रोतत्वं कथयन्सर्वांतरं ब्रह्म प्रकाशितवांस्तस्यैव
ब्रह्मणो व्याकृतविषये सत्त्वभेदेषु नियंतृत्व[illegible]मुक्तं। व्याकृतविषये च व्यक्ततरं लिंगमिति तस्यैव ब्रह्मणः साक्षादपरोक्ष
त्वेन नियंतव्यदेवताभेदसंकोचद्वारेणाधिगंतव्य इति तदर्थं शाकल्यब्राह्मणमारभ्यते। अथ हैनं विदग्ध इति नामतः शाकलस्य
अपत्यं शाकल्यः पप्रच्छ याज्ञवल्क्येति होवाचेति संख्यका देवा हे याज्ञवल्क्येति स याज्ञवल्क्यो ह। किलैतयैव वक्ष्यमा
णया निविदा प्रतिपेदे संख्यां यां संख्यां पृष्टवान् शाकल्यो यावंतो यावत्संख्याका वै [illegible] वैश्वदेवस्य शस्त्रस्य निविदि निविन्ना
म देवतासंख्यावाचकानि मंत्रपदानि कानि चिद्वैश्वदेवे शस्त्रे शस्यंते तानि निविल्संज्ञकानि तस्यां निविदि यावंतो देवाः श्रूयं
ते तावंतो देवा इति ब्राह्मणः सा निविदितितानि निविल्पदानि प्रदर्श्यंते त्रयश्च त्री च शता त्रयश्च देवा देवानां त्रीणि च शता त्रता

त्विममायमेवनिश्चयो। ब्रह्मोद्यंप्रत्येतत्तुल्योनकश्चिद्द्वितीयइति। ततोहवाचक्नव्युपरराम॥ ॥अत्रांतर्यामिब्राह्मणएतदु
क्तंयंपृथिवीनवेदयंसर्वाणिभूतानिनविदुरितिवयमंतर्यामिणंनविदुर्यंचनविदुर्यच्चतद्दर्शनादिक्रियाकर्तृत्वेनसर्वेषां
वेत्ताधातुरित्युक्तंकस्तेषांविशेषः किंवासामान्यमितितत्रकेचिदाचक्षतेपरस्यमहासमुद्रस्थानीयस्यब्रह्मणोऽक्षरस्याप्रचलि
तस्वरूपस्येषत्प्रचलितावस्थांतर्यामीत्यंतप्रचलितावस्थाक्षेत्रज्ञोयस्तंनवेदांतर्यामिणंतथान्याःपंचावस्थाःपरिकल्पयं
तितथाष्टावस्थाब्रह्मणोभवंतीतिवदंतोऽन्येऽक्षरस्यशक्तयःएताइतिवदंत्यनंतशक्तिमदक्षरमितिचान्येत्वक्षरस्यविकाराइ
तिवदंत्यवस्थाशक्तीतावन्नोपपद्येते। अक्षरस्याशनायादिसंसारधर्मातीतत्वश्रुतेर्नह्यशनायाद्यतीतत्वमशनायादि
९३ धर्मवदवस्थावत्त्वंचैकस्ययुगपदुपपद्यते। तथाशक्तिमत्त्वंचविकारावयवत्वेदोषाःप्रदर्शिताश्चतुर्थे। तस्मादेताअसत्याःसर्वाः ९३
कल्पनाःकस्तर्हिभेदएषामुपाधिकृतइतिब्रूमःनस्वतएषांभेदोऽभेदोवासैंधवघनवत्प्रज्ञानघनैकरसस्वाभाव्यादपूर्वम
नपरमनंतरमबाह्यमयमात्माब्रह्मेतिचश्रुतेःसबाह्याभ्यंतरोह्यजइतिचाथर्वणेतस्मान्निरुपाधिकस्यात्मनोनिरुपाख्यत्वा
न्निर्विशेषत्वादेकत्वाच्चनेतिनेतीतिव्यपदेशोभवत्यविद्याकामकर्मविशिष्टकार्यकरणोपाधिरात्मासंसारीजीवउच्यतेनि
त्यनिरतिशयज्ञानशक्त्युपाधिरात्मांतर्यामीश्वरउच्यतेसएवनिरुपाधिःकेवलःशुद्धःस्वेनस्वभावेनाक्षरंपरंउच्यतेतथाहिरण्यगर्भा

अंतरब्राह्मणत्रयं

व्याकृतदेवताजातिपिंडमनुष्य[illegible]तिर्यक्प्रेतादिकार्यकरणोपाधिभिर्विशिष्टस्तदाख्यस्तद्रूपोभवतित[illegible]यात
देजतितन्नेजतीतिव्याख्यातंतदेषत[illegible]त्मैषसर्वभूतांतरात्मैषसर्वभूतेषुगूढस्तत्त्वमस्यहमेवेदंस
र्वंआत्मैवेदंसर्वंनान्योतोऽस्तिद्रष्टानान्यदतोऽस्तिद्रष्ट्रित्यादिश्रुतयोनविरुध्यंतेकल्पनांतरेष्वेताःश्रुतयोनगच्छंतीतितस्मा
दुपाधिभेदेनैवैषांभेदोनान्यथैकमेवाद्वितीयमित्यवधारणात्सर्वोपनिषत्सु॥ ॥अथहैनंविदग्धःशाकल्यःप्रपच्छपृ
थिव्यादीनांसूक्ष्मतारतम्यक्रमेणपूर्वस्यपूर्वस्योत्तरोत्तरस्मिन्नोतप्रोतत्वंकथयंसर्वांतरंब्रह्मप्रकाशितवांस्तस्यच
ब्रह्मणोव्याकृतविषयेसूत्रेदेवेषुनियंतृत्व[illegible]मुक्तं। व्याकृतविषयेवव्यक्ततरंलिंगमितितस्यैवब्रह्मणःसाक्षादपरोक्ष
त्वेनियंतव्यदेवताभेदसंकोचद्वारेणाधिगंतव्यइतितदर्थंशाकल्यब्राह्मणमारभ्यतेअथहैनंविदग्धइतिनामतःशाकलस्य
अपत्यंशाकल्यःपप्रच्छयाज्ञवल्क्येतिहोवाचकतिसंख्याकादेवाहेयाज्ञवल्क्येतिसयाज्ञवल्क्योह। किलएतयैववक्ष्यमा
णयानिविदाप्रतिपेदेसंख्यांयांसंख्यांपृष्टवान्शाकल्योयावंतोयावत्संख्याकावै[illegible]श्वदेवस्यशस्त्रस्यनिविदिकीर्त्यंतेना
मदेवतासंख्यावाचकानिमंत्रपदानिकानिचिद्वैश्वदेवेशस्त्रेशस्यंतेतानिनिविल्संज्ञकानितस्यांनिविदियावंतोदेवाःश्रूयं
तेतावंतोदेवाइतिहप्रत्युवाचःसानिविदितितानिनिविदानिप्रदर्श्यंतेत्रयश्चत्रीचशतात्रयश्चदेवादेवानांत्रीणिचशतानात्राता

देवा

न

निपुनरप्येवं त्रयश्च त्री च सहस्रा सहस्राण्येतावंतो देवा इति शाकल्योप्योमिति होवाच एवमेषा मध्यमा संख्या सम्यक् ज्ञाता
मनस्तेषामेव देवानां संकोचविषयां संख्यां पृच्छति कत्येव देवा याज्ञवल्क्येति त्रयस्त्रिंशदित्यादि यावदध्यर्द्ध एक इति देवतासंकोच
विकाशविषयां संख्यां पृष्ट्वा पुनः संख्येयस्वरूपं पृच्छति कतमे ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति। स होवाचेत्यमहिमा
नो विभूतयः एषां त्रयस्त्रिंशतां देवानां मेते त्रयश्च त्री च शतेत्यादयः परमार्थतस्तु त्रयस्त्रिंशत्त्वेव देवा इति कतमे ते त्रयः त्रिंश
दित्युच्यते अष्टौ वसव एकादश रुद्रा द्वादशादित्याः त एकत्रिंशदिंद्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति त्रयस्त्रिंशतां पुरणौ तेमे वस
२४ व इति तेषां स्वरूपं प्रत्येकं पृच्छति अग्निश्च पृथिवी चेता द्या नक्षत्रां ता एते वसवः प्राणिनां कर्मफलाश्रयत्वेन कार्यकरणसंघातरूपे घा
ण तन्निवासत्वेन च विपरिणमंतो जगदिदं सर्वं वासयंति वसंति च ते यस्माद्वासयंति तस्माद्वसव इति कतमे रुद्रा इति दशेमे पुरुषे
कर्मबुद्धींद्रियाणि प्राणाः आत्मा मन एकादश एकादशानां पूरणं त एते प्राणाः यदा अस्माच्छरीरान्मर्त्यात्प्राणिनां कर्म्मफलो द्रा
पभोगक्षये उत्क्रामंत्यथ तदा रोदयंति तत्तत्र यस्माद्रोदयंति ते संबंधिनस्तस्माद्रुद्रा इति कतम २४
आदित्या इति द्वादश वै मासाः संवत्सरस्य कालस्यावयवाः प्रसिद्धा एत आदित्याः कथमेते हि स्मात्पुनः पुनः परिवर्त्तमानाः प्राणि
नामायूंषि कर्म्मफलं चाददानाः गृह्णंतः उपाददतो यंति गच्छंति हि ते यद्यस्मादेवमिदं सर्वमाददाना यंति यस्मादेवं तस्मादादित्या

त्या इति कतम इंद्रः कतमः प्रजापतिरिति स्तनयित्नुरेवेंद्रो यज्ञः प्रजापतिरिति कतमस्स्तनयित्नुरित्यशनिरिति अशनिर्वज्रं वीर्यं बलं य
त्प्राणिनः प्रमापयति। स इंद्रः इंद्रस्य हि तत्कर्म कतमो यज्ञ इति पशव इति यज्ञस्य हि साधनानि पशवो यज्ञस्या रूपत्वात्पशुसाधनाश्र
यत्वाच्च पशव इत्युच्यते। कतमे षडिति त एवाग्न्यादयो वसुत्वेन पठिताश्चंद्रमसं नक्षत्राणि च वर्जयित्वा षड् भवंति षट्संख्याविशिष्टा एते
हि यस्मात्त्रयस्त्रिंशदादि यदुक्तमिदं सर्वमेत एव षड् भवंति सर्वो हि वस्वादिविस्तरः एतेष्वेव षट्सु अंतर्भवतीत्यर्थः अथ कथमेते त्रयो देवा
इति इमे एव त्रयो लोका इति पृथिवीमग्निं चैकीकृत्यैको देवोंतरिक्षं वायुं चैकीकृत्य द्वितीयो दिव मादित्यं चैकीकृत्य तृ
तीयस्त एव त्रयो देवा इति एषु हि यस्मात्त्रिषु देवेषु सर्वे देवा अंतर्भवंतीति तेनैत एव देवास्त्रय इत्येष नैरुक्तानां केषांचित्पक्षः कतमौ
तौ द्वौ देवावित्यन्नं चैव प्राणश्चैतौ द्वौ देवावन्नयोः सर्वेषामुक्तानामंतर्भावः कतमोऽध्यर्द्ध इति योयं पवते वायुस्तत्राहुश्चोदयंतिय
नैन दयं वायुरेक पवते अथ कथमध्यर्द्ध इति यदस्मिन्निदं सर्वमध्यार्द्धोत्तस्मिन्वायावसति दं सर्वमधिबाद्ध्नोदधिवृद्धिं प्राप्नोतिति तेनाध्य प्रा
र्द्ध इति कतम एको देव इति प्राण इति स प्राणो ब्रह्म सर्वदेवात्मत्वान्महद्ब्रह्म तेन स ब्रह्म त्यदित्याचक्षते परोक्षाभिधायकेन त्यच्छब्देन दे
वानामेतदेकत्वं नानात्वमनंतानां निविदि संख्याविशिष्टेष्वंतर्भावस्तेषामपि त्रयस्त्रिंशदादिषूत्तरोत्तरेषु यावदेकस्मिन्प्राणे प्राणस्य

वृ
२

वचैकस्यसर्वानंतसंख्याकोविस्तरः एवमेकस्यानंतस्य अवांतरसंख्याविशिष्टस्य प्राणएवतत्त्वदेवस्यैकस्यनामरूपकर्म
गुणशक्तिभेदोधिकारभेदादिदानींतस्यैवप्राणस्यब्रह्मणः पुनरष्टधाभेदउपदिश्यते पृथिवीएवयस्यदेवस्यायतनमाश्र
य अग्निर्लोको यस्यलोकयत्यनेनेतिलोकः पश्यतीत्यग्निनापश्यतीत्यर्थः मनोज्योतिर्मनसाज्योतिषासंकल्पविकल्पादि
कार्यंकरोतियःसोयंमनोज्योतिः पृथिवीशरीरोग्निदर्शनोमनसासंकल्पयिता पृथिव्यभिमानीकार्यकरणवान्देवइत्य
र्थः यएवंविशिष्टंवैतंपुरुषंयोविद्याद्विजानीयात्सर्वस्यात्मनःअध्यात्मिकस्यकार्यकरणसंघातस्यात्मनःपरमयनंपरआ
श्रयस्तंपरायणं मातृजेनत्वङ्मांसरुधिररूपेणक्षेत्रस्थानीयेनबीजस्थानीयस्यपितृजस्यास्थिमज्जाशुक्रस्यपरमयनंक
९५ रणात्मनश्चसवैवेदितास्याद्यएवंवेत्तिसवैवेदितापंडितःस्यादित्यभिप्रायः। ९५
याज्ञवल्क्यत्वंतमज्ञानन्नेवपंडिताभिमानीत्यभिप्रायोयदितद्विज्ञानेनपांडित्यंलभ्यतेवेदवाअहंतंपुरुषंसर्वस्यात्म
नःपरायणंयमात्थयंकथयसितमहंवेद तत्रशाकल्यवचनंद्रष्टव्यंयदित्वंवेत्थतंपुरुषंब्रूहिकिंविशेषणोसौशृणुयद्विशेषणः
सयएवायंशारीरःपार्थिवेंशोशारीरे वः शारीरकोमातृजकोशत्रयरूपइत्यर्थः। सएषदेवोयस्त्वयापृष्टोहेशाकल्यकि

मस्तितत्रवक्तव्यंविशेषणांतरंतद्देवपृच्छेवेत्यर्थः हेशाकल्यसएवंप्रक्षोभितोऽमर्षवशाग आहतोत्रार्दितइवगजस्तस्य
देवस्यशारीरस्यकादेवतायस्मान्निष्पद्यतेयःसतस्यदेवतेत्यस्मिन्प्रकरणेविवक्षितः अमृतमितिहोवाचामृतमितियो
भुक्तस्यान्नस्यरसोमातृजस्यलोहितस्यनिष्पत्तिहेतुः तस्माद्ध्यन्नरसाल्लोहितंनिष्पद्यतेस्त्रियाश्रितंतस्माच्चलोहितमयं
शारीरंबीजाश्रयंसमानमन्यत्कामएवयस्यायतनंस्त्रीव्यतिकराभिलाषःकामः कामशरीरइत्यर्थः। हृदयंलोकोहृदयेन
बुद्ध्यापश्यतियएवायंकाममयःपुरुषोध्यात्ममपिकाममयएवतस्यकादेवतेतिस्त्रियइतिहोवाचस्त्रीतोहिकामस्यदी
प्तिर्जायतेरूपाण्येवयस्यायतनंरूपाणिशुक्लकृष्णादीनियएवासावादित्येपुरुषःसर्वेषांहिरूपाणांविशिष्टंकार्यमादि
त्येपुरुषस्तस्यकादेवतेतिसत्यमितिहोवाच।सत्यमितिचक्षुरुच्यतेचक्षुषोध्यात्मतआदित्यस्याधिदैवतस्यनिष्पत्तिः आका
शएवयस्यायतनंयएवायंश्रोत्रेजवःश्रोत्रःतत्रापिप्रतिश्रवणवेलायांविशेषतोभवतीतिप्रातिश्रुत्कस्तस्यकादेवतेतिदिश
इतिहोवाचदिग्भ्योह्यसावाध्यात्मिकोनिष्पद्यतेतमएवयस्यायतनंतमइतिसार्वराद्यंधकारःपरिगृह्यतेअध्यात्मं छायामयो
ह्यज्ञानमयःपुरुषःतस्यकादेवतेतिमृत्युरितिहोवाचमृत्युरधिदैवतंतस्यनिष्पत्तिकारणंरूपाण्येवयस्यायतनंपूर्वंसाधारणानिरूपा
ण्युक्तानीहतुप्रकाशकानिविशिष्टानिरूपाणिगृह्यंते।रूपायतनस्यदेवस्यविशेषायतनंप्रतिबिंबाधारमादर्शादिसुरितिहो

स्व श्चि

वायतस्य प्रतिबिंबाख्यस्य पुरुषस्य निष्पत्तिरसोः प्राणादा परवयस्यायतनं साधारणाः सर्वो व्याप आयतनं वापीतडागा
द्याश्रयास्सु विशेषावस्थानं तस्य का देवतेति वरुण इति वरुणात्संहातकस्ये ध्यात्ममाप एव वाप्याद्यपां निष्पत्तिकारणं रेत एव
यस्यायतनं य एवायं पुत्रमयो विशेषायतनं चेत आयतनस्य पुत्रमय इति वास्थिमज्जाशुक्राणि पितुर्जातानि तस्य का देवतेति प्र
जापतिरिति होवाच प्रजापतिः पितोच्यते पितृतो हि पुत्रस्योत्पत्तिरेधा लोकदेवपुरुषभेदेन त्रिधा त्रिधात्मानं प्रविभज्यावस्थितः
एकैको देवः प्राणभेद एवोपासनार्थं व्यपदिष्टो ऽधुना दिग्विभागेन पंचधा प्रविभक्तस्यात्मन्युपसंहारार्थमाह। तूष्णींभूते शाकल्ये
याज्ञवल्क्यो ग्रहेणेवावेशायन्नाह। शाकल्येति होवाच याज्ञवल्क्यस्त्वांक्षितिवितर्केइ मेन्नं ब्राह्मणाः अंगारावक्षयण
२६ मंगारा अवक्षीयंते यस्मिन्संदंशादौ तदंगारावक्षयणं तन्नूनं त्वां कृतवंतो ब्राह्मणाः त्वं तु तन्न बुध्यसे आत्मानं मया दह्यमानमि २६
त्यभिप्रायः याज्ञवल्क्येति ह प्रत्युवाच शाकल्यो यदिदं कुरुपंचालानां ब्राह्मणानत्यवादीरत्युक्तवानसि स्वयं भीतः स्त्वामंगारा
वक्षयणं कृतवंत इति किं ब्रह्म विद्वान्सन्नेवमधिक्षिपसि ब्राह्मणान्। याज्ञवल्क्य आह। ब्रह्मविज्ञानं तावदिदं मम किं तद्दिशो वे
द दिग्विषयं ज्ञानं ज्ञाने तत्र न केवलं सदेवा देवैः सह दिगधिष्ठातृभिः। किं च सप्रतिष्ठाः प्रतिष्ठाभिश्च सह यद्यद्दिशो वेत्थ सदेवाः
सप्रतिष्ठा प्रतिष्ठाभिश्च सह इतर आह सफलं यदि विज्ञानं त्वया प्रतिज्ञातं किंदेवतास्य तव दिग्भूतस्यासौ हि याज्ञवल्क्यो हृदयमात्मा

दिशा एव २ दैवत: का २

नं दिक्षु पंचधा विभक्तं दिगात्मभूतं तद्द्वारेण सर्वं जगदात्मत्वेनोपगम्याहमस्मि दिगात्मेति व्यवस्थितः पूर्वाभिमुखः सप्रतिष्ठाश्च
नाहम् याज्ञवल्क्यस्य प्रतिज्ञा तथैव पृच्छति। किंदेवतस्त्वमस्यां दिश्यसीति सर्वत्र हि वेदे यां यां देवतामुपास्त इह दैवतभूतस्तां प्रति
पद्यत इति। तथा च वक्ष्यति देवो भूत्वा देवानप्येतीत्यस्यां प्राच्यां का देवता दिगात्मनस्तवाधिष्ठात्री कया देवतया त्वं प्राचीदिग्रूपेण सं
पन्न इत्यर्थः। इतर आहादित्यदेवत इति प्राच्यां दिशि ममादित्यो देवता सोऽहमादित्यदेवतः सदेवा इत्येतदुक्तं सप्रतिष्ठा इति तु वक्तव्यमि
त्याह स आदित्यः कस्मिन्प्रतिष्ठित इति चक्षुषीति अध्यात्मं चक्षुष आदित्यो निष्पन्न इति हि मंत्रब्राह्मणवादः चंद्रमा मनसो जा
तश्चक्षोः सूर्योऽजायत चक्षुष आदित्य इत्यादयः कार्यं हि कारणे प्रतिष्ठितं भवति कस्मिन्नु चक्षुः प्रतिष्ठितमिति रूपेष्विति रूपग्रह
णाय हि रूपात्मकं चक्षू रूपेण प्रयुक्तं यैर्हि रूपैः प्रयुक्तं तेरात्मनो ग्रहणायारब्धं चक्षुः तस्मात्सहादित्येन चक्षुः सह प्राच्या दिशा
सह तत्स्थैः सर्वैः रूपेषु प्रतिष्ठितं चक्षुषा सह प्राची दिक् सर्वा रूपभूता। तानि च कस्मिन्नु रूपाणि प्रतिष्ठितानि हृदय इति हो
वाच। हृदयारब्धानि रूपाणि रूपाकारेण हि हृदयं परिणतं। यस्माद्धृदयेन हि रूपाणि सर्वो लोको जानाति हृदयमिति तु बुद्धि बु
मनसी एकीकृत्य निर्देशस्तस्माद्धृदये ह्येव रूपाणि प्रतिष्ठितानि हृदयेन हि स्मरणं भवति रूपाणां वासनात्मना। तस्माद्धृ हृ
दये रूपाणि प्रतिष्ठितानीत्यर्थः। एवमेवैतद्याज्ञवल्क्य किंदेवतोऽस्यां दक्षिणायां दिश्यसीति पूर्ववद्दक्षिणायां दिशि का देवतात

वयमदेवतइतियमोदेवताममदक्षिणादिशःसतस्यसयमःकस्मिन्प्रतिष्ठितइतियज्ञइतियज्ञेकारणेप्रतिष्ठितोयमःसहदिशा
कथंपुनर्यज्ञस्यकार्ययमइत्युच्यते।ऋत्विग्भिर्निष्पादितोयज्ञोदक्षिणयायजमानस्तेभ्योयज्ञंनिःक्रीणीतेतेनयज्ञेनदक्षिणांदिशं
सहयमेनाभिजयतितेनयज्ञेयमःकार्यत्वात्प्रतिष्ठितःसहदक्षिणयादिशाकस्मिन्नुयज्ञःप्रतिष्ठितइतिदक्षिणायामितिदक्षिण
यासनिष्क्रीयते।तेनदक्षिणाकार्ययज्ञःकस्मिन्नुदक्षिणाप्रतिष्ठितेतिश्रद्धायामितिश्रद्धानामदित्सुत्वमास्तिक्यबुद्धिर्भक्तिसहि
२७ ताकथंतस्यांप्रतिष्ठितादक्षिणायस्माद्यदाह्येवश्रद्धत्तेऽथदक्षिणांददातिनाश्रद्दधद्दक्षिणांददाति।तस्माच्छ्रद्धायांह्येवदक्षिणा
प्रतिष्ठितेतिकस्मिन्नुश्रद्धाप्रतिष्ठितेति।हृदयइतिहोवाच।हृदयस्यहिवृत्तिःश्रद्धायस्माद्धृदयेनहिश्रद्धांजानाति।हृदयवृ
त्तिमतिप्रतिष्ठिताभवति।तस्माद्धृदयेह्येवश्रद्धाप्रतिष्ठिताभवतीत्येवमेवैतद्याज्ञवल्क्यः।किंदेवतोऽस्यांप्रतीच्यांदिश्यसीतितस्यां
वरुणोधिदेवताममसवरुणःकस्मिन्प्रतिष्ठितइत्यप्स्वितिअपांहिवरुणःकार्यंश्रद्धावाआपःश्रद्धातोवरुणःसृजतेतिश्रुतेःकस्मिन्न्वापः
प्रतिष्ठिताइतिरेतसीतिरेतसोह्यापःसृष्टाइतिश्रुतेः।कस्मिन्नुरेतःप्रतिष्ठितमितिहृदयइतियस्माद्धृदयस्यकार्यंरेतःकामोहृदय
स्यवृत्तिःकामिनोहिहृदयाद्रेतोधिस्कंदति।तस्मादपिप्रतिरूपमनुरूपंपुत्रंजातमाहुर्लौकिकाःअस्यपितुर्हृदयादिवायंपुत्रोविनिः २७
सृतोहृदयादेवनिर्मितोयथासुवर्णेननिर्मितःकुंडलस्तस्माद्धृदयेह्येवरेतःप्रतिष्ठितंभवतीत्येवमेवैतद्याज्ञवल्क्य।किंदेवतोऽस्यामु

दीच्यांदिश्यसीतिसोमदेवतइतिसोमइतिलतासोमंदेवतांदीक्षाकृत्यनिर्देशः।ससोमःकस्मिन्प्रतिष्ठितइतिदीक्षायामितिदीक्षितो
हियजमानःसोमंक्रीणातिक्रीतेनसोमेनेष्ट्वाज्ञानवानुत्तरांदिशंप्रतिपद्यतेसोमदेवताधिष्ठितांसौम्यांकस्मिन्नुदीक्षाप्रतिष्ठितेतिसत्य
इतिकथंयस्मात्सत्येप्रतिष्ठितातस्मादपिदीक्षितमाहुःसत्यंवदेतिकारणंह्येष कार्यंह्येषोमाभूदितिसत्येह्येवदीक्षाप्रतिष्ठि
तेतिकस्मिन्नुसत्यंप्रतिष्ठितमिति।हृदयइतिहोवाच।हृदयेनहिसत्यंजानातितस्माद्धृदयेह्येवसत्यंप्रतिष्ठितंभवतीत्येवमेवैतद्या
ज्ञवल्क्य।किंदेवतोऽस्यांध्रुवायांदिश्यसीतिमेरोःसमंततोवसतामव्यभिचारादूर्ध्वादिग्ध्रुवेत्युच्यतेअग्निदेवतइत्यूर्ध्वायांहिप्रका
शभूयस्त्वंप्रकाशश्चाग्निःसोग्निःकस्मिन्प्रतिष्ठितइति।वाचीतिकस्मिन्नुवाक्प्रतिष्ठितेतिहृदयइति।तत्रयाज्ञवल्क्यःसर्वा
सुदिक्षुविप्रसृतेनहृदयेनसर्वादिशआत्मत्वेनाभिसंपन्नःसदेवाःसप्रतिष्ठाः दिशआत्मभूतास्तस्यनामरूपकर्मात्मभूत
स्ययाज्ञवल्क्यस्ययद्रूपंतत्प्राच्यादिशासहहृदयभूतंयाज्ञवल्क्यस्ययच्चकेवलंकर्मपुत्रोत्पादलक्षणंचज्ञानसहितंचसहफले
नाधिष्ठात्रीभिश्चदेवताभिर्दक्षिणाप्रतीच्युदीच्यःकर्मफला त्मिकाहृदयमेवापन्नास्तस्यध्रुवयादिशासहनामसर्वंवाकू
द्वारेणहृदयमेवापन्नमेतावद्धीदंसर्वंयदुतरूपंवाकर्मवानामवेतितत्सर्वंहृदयमेवतत्सर्वात्मकंहृदयंपृच्छ्यतेकस्मिन्नुहृदयंप्रति
ष्ठितमितिअहल्लिकेतिहोवाचयाज्ञवल्क्योनामांतरेणसंबोधनंकृतवानन्यत्रयस्मिन्कालेएतद्धृदयमात्मास्यशरीरस्यान्यत्रक्वचि

वृ

देहांतरेऽस्मत्तोन्यत्र वर्त्तत इति मन्यासे मन्यसे यद्धि यदि ह्येतद्धृदयमन्यत्रास्मात्स्याद्भवेत्। श्वानो वा एतच्छरीरं तदद्युर्वयांसि वा पक्षि-
णो एतद्विमथ्नीरन् विलोडयेयुर्विकर्षेरन्निति। तस्मान्मयि शरीरे हृदयं प्रतिष्ठितमित्यर्थः। शरीरस्यापि नामरूपकर्म्मात्मकत्वात्तद्धृ-
दये प्रतिष्ठितं। हृदयशरीरयोरेवमन्योन्यप्रतिष्ठोक्ता कार्यकरणयोः। अतस्त्वां पृच्छामि कस्मिन्नु त्वं च शरीरमात्मा च तव हृदयं प्रति-
ष्ठितौ स्थ प्राण इति देहात्मानौ प्राणे प्रतिष्ठितौ स्यातां प्राणवृत्तौ कस्मिन्नु प्राणः प्रतिष्ठित इत्यपान इति सापि प्राणवृत्तिः प्रागे-
व प्रेयादपानवृत्त्या चेन्न निगृह्यते कस्मिन्न्वपान प्रतिष्ठित इति व्यान इति सापि अपानवृत्तिरधएव यायात् प्राणवृत्तिश्च प्रागेव म-
ध्यस्थया चेद्व्यानवृत्त्या न निगृह्यते कस्मिन्नु व्यानः प्रतिष्ठित इत्युदान इति सर्वास्तिस्रोपि वृत्तयः उदाने कीलस्थानीये चेन्न निब-
द्धाः वि ष्वगेवेयुः कस्मिन्नूदानः प्रतिष्ठित इति समान इति समानप्रतिष्ठा ह्येताः सर्वा वृत्तयः। एतदुक्तं भवति शरीरहृदयवायवोन्यो-
८८ न्यप्रतिष्ठाः संघातेन नियता वर्त्तन्ते विज्ञानमयार्थप्रयुक्ताः इति सर्वमेतद्येन नियतं यस्मिन्प्रतिष्ठितमाकाशान्तमोतं च प्रोतं च तस्य ९८
निरुपाधिकस्य साक्षादपरोक्षाद्ब्रह्मणो निर्द्देशः कर्त्तव्य इत्ययमारंभः स एषः स यो नेति नेती निर्दिष्टो मधुकांड एव सः आत्मा
ह ऽगृह्यो न गृह्यते कथं यस्मात्सर्वकार्यधर्मातीतः तस्मादगृह्यः। कु त यस्मान्न हि गृह्यते यद्धि करणगोचरं व्याकृतं वस्तु तद्ग्र-
हणगोचरमिदं तु तद्विपरीतमात्मतत्त्वं तथाशीर्यो यद्धि मूर्त्तं संहतं तच्छरीरादि तच्छीर्यते अयं तु तद्विपरीतोऽतो न हि शीर्यते ऽसंगो मूर्त्तो

हिं

मूर्त्तांतरेण संबध्यमानः सज्यते ऽयं तु तद्विपरीतो न हि सज्यते। तथाऽसितः अबद्धो यद्धि मूर्त्तं तद्बध्यते इदं तु तद्विपरीतत्वादबद्धत्वा-
न्न व्यथते ऽतो न रिष्यति। ग्रहणशरणसंगबंधकार्यधर्म्मरहितत्वान्न रिष्यति। नैसामापद्यते न विनश्यतीत्यर्थः। क्रममतिक्र-
म्योपनिषदस्यैव पुरुषस्याख्यायिकातोपसृत्याभ्युत्थानस्वेन रूपेण त्वरया निर्द्देशः कृतः। ततः पुनराख्यायिकामेवाश्रित्याह। एता-
न्यष्टावायतनानि पृथिव्येव यस्यायतनमित्येवमादीन्यष्टौ लोका अष्टौ देवा अमृतमिति होवाचेत्येवमाद-
योष्टौ पुरुषाः शारीरपुरुष इत्यादयः स यः कश्चित्तान्पुरुषाञ्छारीरप्रभृतीन्निरूह्य निश्चयेन गमयित्वाष्टचतुष्कभेदेन लोकस्थि-
तिमुपपाद्य पुनः प्राचीदिगादिद्वारेण प्रत्यूह्य स्वात्मनि हृदये प्रत्यक्रामदतिक्रांतवान्। उपाधिधर्म्मं हृदयाद्यात्मकं स्वेनैवात्मना व्यव-
स्थितो य उपनिषदः पुरुषोऽशनायादिवर्जितः। उपनिषत्स्वेव विज्ञेयो नान्यप्रमाणगम्यस्तं त्वा विद्याभिमानिनं पुरुषं पृच्छामि तं चेद्य-
दि मे न वि वक्ष्यसि विस्पष्टं न कथयिष्यसि मूर्द्धा ते विपतिष्यतीति तं चौपनिषदं पुरुषं शाकल्यो न मेने ह न विज्ञातवान् किल तस्य न४
ह मूर्द्धा विपपात विपतितः। समाप्ताख्यायिका श्रुतेर्वचनं तदु हैनमेन इत्यादि किं चापि हास्य परिमोषिणस्तस्कराः अस्थीन्यपि
संस्कारार्थं शिष्यैर्नीयमानानि गृहान्प्रत्याहृतवंतः किंनिमि त्तमन्यद्धनं नीयमानं मन्यमानाः पूर्ववृत्ताख्यायिके हस्तविता-
ध्यायां किल शाकल्येन याज्ञवल्क्यस्य समानांत एव किल संवादो निर्वृत्तस्तत्र याज्ञवल्क्येन शापो दत्तः पुरेऽतिथ्ये मरिष्य-

बृ नेध

सिनतेस्थीति च नगृहान्प्राप्स्यंतीति तस्मान्नोपवादी स्यादुत देवं क्रियरोऽभवति सेषाख्यायिका ऽचारार्थं सूचिता विद्यास्तु
तयेवेह यस्मिन्नेतिस्त्यन्यप्रतिषेधद्वारेण ब्रह्मणो निर्देशः कृतस्तस्य विधिमु [illegible] खेन कथं निर्देशः कर्त्तव्य इति पु
नराख्यायिकामेवाश्रित्याह। मूलं च जगतो वक्तव्यमिति आख्यायिकासंबंधस्तु ब्रह्मविदो ब्राह्मणान्जित्वा गोधनं हर्त्त
व्यमिति न्यायं महत्वा। अथ होवाच अथानंतरं तूष्णीं भूतेषु ब्राह्मणेषु ह उवाच। हे ब्राह्मणा भगवंत इत्येवं [illegible] संबोध्य यो वो
युष्माकं मध्ये कामयते इच्छति याज्ञवल्क्यं पृच्छामीति। स मामा मागत्य पृच्छतु। सर्वे वा मा पृच्छत सर्वे वा यूयं मां पृच्छत यो वः
या ९९ कामयतेऽहं वक्ष्यो मां पृच्छत्विति तं वः पृच्छामि। सर्वान्वा युष्मानहं पृच्छामि ते ह ब्राह्मणा न दधृषुः। ते ब्राह्मणा एवमुक्ता अ
पि न प्रगल्भाः संवृत्ताः किंचिदपि प्रत्युत्तरं वक्तुं तेषु प्रगल्भ्य भूतेषु ब्राह्मणेषु तान्हैतैर्वक्ष्यमाणैः श्लोकैः पप्रच्छ पृष्टवान्। यथा
लोके वृक्षो वनस्पतिर्वृक्षस्य विशेषणं वनस्पतिरिति तथैव पुरुषोऽमृषा अमृषा सत्यमेतत्तस्य लोमानि तस्य पुरुषस्य लोमा ९९
नीतरस्य वनस्पतेः पर्णानि। त्वगस्योत्पाटिका बहिः त्वक् पुरुषस्येतरस्योत्पाटिका वनस्पतेः त्वच एव सकाशादस्य पुरुष
स्य रुधिरं प्रस्यंदि त्वच उत्पटः त्वच एवोत्स्फुटति यस्मादेवं सर्वसमानमेव वनस्पतेः पुरुषस्य च तस्मात्तदातृण्णाद्धिंसितात्प्रै
ति तद्रुधिरं निर्गच्छति वृक्षादिवाहतात्छिन्नाद्रसइव मांसानि पुरुषस्य वनस्पतेस्तानि शकलानि शकराणीत्यर्थः किनाटं

या

वृक्षस्य किनाटं नाम शकलं त्वगोऽभ्यंतरं वल्कलरूपं काष्ठसंलग्नं तत्स्नाव पुरुषस्य च तत्स्थिरं तद्धि किनाटं स्नाववदृढं हित
त। अस्थीनि पुरुषस्य स्नाव्नोऽभ्यंतरतोऽस्थीनि भवंति तथा किनाटस्याभ्यंतरदारूणि काष्ठानि मज्जा मज्जैव वनस्पतेः पुरुषस्य च म
ज्जा यमाकृता मज्जोपमा मज्जोपमानान्यो विशेषोऽस्तीत्यर्थः यथा च वनस्पतेर्मज्जा तथा पुरुषस्य यथा पुरुषस्य तथा वनस्पतेर्
यदि वृक्षो वृक्णः छिन्नो रोहति प्रादुर्भवति मूलात्पुनः पुनर्नवतरः पूर्वस्माद्भिनवतरो यदेतस्माद्विशेषणात् प्राग्वनस्पतेः पुरु
षस्य सर्वसामान्यमवगतमयं तु वनस्पतौ विशेषो दृश्यते। यच्छिन्नस्य प्ररोहणं न पुरुषस्य मृत्युना वृक्णस्य वृक्षस्येव पुनः प्ररो
हणं दृश्यते भवितव्यं च कुतश्चित्प्ररोहणेन। तस्मात्पृच्छामि मर्त्यो मनुष्यः स्विन्मृत्युना वृक्णः कस्मान्मूला [illegible] त्प्ररोहति।
मृतस्य पुरुषस्य कुतः प्ररोहणमित्यर्थः। यदि चे [illegible] देवं वदथ रेतसः प्ररोहतीति मा वोचत मैवं वक्तुमर्हथ कस्माद्यस्माज्जीवतः पुरुषा
द्रेतः प्रजायते न मृतात्। अपि च धानारुहो धाना बीजं बीजरुहोऽपि वृक्षो भवति। न केवलं कांडरुह एव। इवशब्दो नर्थकः वै वृक्षोऽञ्जसा
साक्षात्प्रेत्य मृत्वा संभवो धानातोऽपि प्रेत्य संभवोऽभवेदञ्जसा पुनर्वनस्पतेः यद्यदि सहमूलेन धानया वा आवृहेयुरुद्यच्छेयुरुत्पा
टयेयुर्वृक्षं न पुनरागत्य न भवेत् तस्मात्पृच्छामि सर्वस्यैव जगतो मूलं मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति।
जात एव न जायते इति मन्यध्वं यदि किमत्र प्रष्टव्यमिति जनिष्यमाणस्य हि संभवः प्रष्टव्यो न जातस्यायं तु जात एवातोऽस्मिन्विषये प्रश्न एव

पद्यत इति चेन्न किं [illegible] तर्हि मृतः पुनरपि जायत एवान्यथाऽकृताभ्यागमकृतनाशप्रसंगादतो वः पृच्छामि को न्वेनं
मृतं पुनर्जनयेत् तन्न विजज्ञिरे ब्राह्मणाः यतो मृतः पुनः प्ररोहति जगतो मूलं न विज्ञातं ब्राह्मणैरतो ब्रह्मिष्ठत्वात् हृता गा
वो याज्ञवल्क्येन जिता ब्राह्मणाः समाप्ताख्यायिका। यज्जगतो मूलं येन वा शब्देन साक्षाद्व्यपदिश्यते ब्रह्म यद्याज्ञवल्क्यो ब्रा
ह्मणान्पृष्टवान् तत्स्वेन रूपेण श्रुतिरस्मभ्यमाह। विज्ञानं विज्ञप्तिर्विज्ञानं तच्चानंदं न विषयविज्ञानवद्दुःखानुविद्धं किं तर्हि प्र
सन्नं शिवमतुलमनायासं नित्यतृप्तमेकरसमित्यर्थः। किं तद्ब्रह्मोभयविशेषणवद्रातिः रातेः षष्ठ्यर्थे प्रथमा धनस्येत्यर्थो
१०० धनस्य दातुः कर्मकृतो यजमानस्य परमयनं परागतिः कर्मफलस्य प्रदातृ किं च व्युत्थाय एषणाभ्यस्तस्मिन्नेव ब्रह्मणि ति
ष्ठत्यकर्मकृत्तत ब्रह्म वेत्तीति तद्विदस्तस्य तिष्ठमानस्य च तद्विदो ब्रह्मविदः परायणमिति। अत्रेदं विचार्यते। आनंदशब्दो लो १००
के सुखवाची प्रसिद्धोऽत्र च ब्र[illegible]ह्मविशेषणत्वेनानंदशब्दः श्रूयते आनंदं ब्रह्मेति श्रुत्यंतरे चानंदो ब्रह्मेति व्यजानादा
नंदं ब्रह्मणो विद्वान्यदेष आकाश आनंदो यो वै भूमा तत्सुखमिति च एषोऽस्य परम आनंद इत्येवमाद्याः संवेद्ये च सुखे आ
नंदशब्दः प्रसिद्धो ब्रह्मानंदश्च यदि संवेद्यः स्यादयुक्ता एते ब्रह्मण्यानंदशब्दाः ननु च श्रुतिप्रामाण्यात्संवेद्यानंदरूपमेव ब्रह्म किं

तत्र विचार्यमिति न विरुद्धश्रुतिवाक्यदर्शनात् सत्यमानंदशब्दो ब्रह्मणि श्रूयते विज्ञानप्रतिषेधश्चैकत्वे। यत्र त्वस्य सर्वमात्मै
वाभूत्तत्केन कं पश्येत्केन विजानीयात्तत्केन विजानीयाद्यत्र नान्यत्पश्यति नान्यद्विजानाति प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन
वेदेत्यादिविरुद्धश्रुतिवाक्यदर्शनाच्च कर्तव्यो विचारस्तस्माद्युक्तं वेदवाक्यार्थनिर्णयाय विचारयितुं मोक्षवादिविप्रतिपत्तेश्च
सांख्या वैशेषिकाश्च मोक्षवादिनो नास्ति मोक्षे सुखं संवेद्यमित्येवं प्रतिपन्ना अन्ये निरतिशयं सुखं संवेद्यमिति किं तावद्युक्तमा
नंदादिश्रवणाज्जक्षन्क्रीडन्रममाणः स यदि पितृलोककामो भवति सर्वज्ञः सर्ववित्सर्वान्कामान्समश्नुत इत्यादिश्रुतिभ्यो
मोक्षे सुखं संवेद्यमिति। नन्वेकत्वे कारकविभागाभावाद्विज्ञानानुपपत्तिः क्रियायाश्चानेककारकसाध्यत्वाद्विज्ञानस्य च क्रि
यात्वान्नैष दोषः शब्दप्रामाण्याद्वेदितृ ज्ञानमानंदविषये विज्ञानमानंदमित्यादीन्यानंदस्वरूपस्यासंवेद्यत्वेनुपपन्नानि व
चनानीत्यवोचाम। ननु वचनेनाप्यग्नेः शैत्यमुदकस्य चोष्णत्वं न क्रियत एव ज्ञापकत्वाद्वचनानां न च देशांतरेऽग्निः शीत इति शक्यते ज्ञा
पयितुमगम्यत्वाद्देशांतरे तूष्णमुदकमिति न प्रत्यगात्मन्यानंदविज्ञानदर्शनान्न विज्ञानमानंदमित्येवमादीनां वचनानां शीतो
ऽग्निरित्यादिवाक्यवत्प्रत्यक्षादिविरुद्धार्थप्रतिपादकत्वमनुभूयते त्वविरुद्धार्थता सुखमहमिति सुखात्मकमात्मानं स्वयमेव वे
दयते। तस्मात्तुतरां प्रत्यक्षादिविरुद्धार्थता तस्मादानंदं ब्रह्म विज्ञानात्मकं यत्स्वयमेव वेदयते। तथानंदप्रतिपादिकाः श्रुतयस्समंज

वि

पंताप

सास्युर्जक्षन्क्रीडन्रममाणइत्येवमाद्याः पूर्वोक्ताः। न कार्यकरणाभावेनुपपत्तेर्विज्ञानस्य शरीरवियोगादिमोक्षमाख्यंति
कः शरीराद्यभावे च करणानुपपत्तिराश्रयाभावात्तस्य विज्ञानानुपपत्तिरकार्यकरणत्वात् देहाद्यभावे च विज्ञानोत्पत्तौ सर्वे
षां कार्यकरणोपादानानर्थक्यप्रसंगः एकत्वविरोधाच्च परं चेद्ब्रह्मानंदात्मकमात्मानं नित्यविज्ञानत्वान्नित्यमेव विजानीयात्तत्र
संसार्यपि संसारविनिर्मुक्तस्तद्भावं प्रतिपद्य तेजसा वायद्वोदकं जलक्षिप्तो न पृथक्त्वेन व्यवतिष्ठते। आनंदात्मकब्रह्मवि
१०१ ज्ञानाय। तदा मुक्त आनंदात्मकमात्मानं वेदयत इत्येतदनर्थकं वाक्यं यद्ब्रह्मानंदमन्यसन्मुक्तो वेदयते प्रत्यगात्मानंदं म..म
स्यानंदस्वरूप इति नैकत्वविरोधः तथा च सति सर्वश्रुतिविरोधस्तु..तीयाकल्पनानोपपद्यते किं चान्य ब्रह्मणश्च निरंतरात्मा
नंदविज्ञाने विज्ञानाविज्ञानकल्पनानर्थक्यं निरंतरं वेदात्मानंदविषयब्रह्मणो विज्ञानं तदेव तस्य स्वभाव इत्यात्मानंदं विजानातीति कल्पनानुपपन्ना..तद्विज्ञानप्रसंगे हि कल्पनाया अर्थवत्त्वं यथात्मानं परं च वेत्तीति। न हि बाह्यासक्तमनसो नैरंतर्ये
णेषु ज्ञानाज्ञानकल्पनाया अर्थवत्त्वमथ विछिन्नमात्मानंदं विजानाति विज्ञानस्यात्मविज्ञानछिद्रेऽन्यविषयत्वप्रसंगः १०१
आत्मनश्च विक्रियावत्त्वं ततश्चानित्यत्वप्रसंगस्तस्माद्विज्ञानमानंदमिति स्वरूपान्वाख्यानपरैव श्रुतिर्नात्मानंदसंवेद्यत्वार्थी
जक्षत्क्रीडन्नित्यादिश्रुतिविरोधोऽसंवेद्यत्व इति चेन्न सर्वात्मैकत्वे यथाप्राप्तानुवादित्वान्..स्य सर्वात्मभावे सति यत्र कश्चिद्योगि

ना२

षु देवेषु वा जक्षणादि प्राप्तं तद्यथाप्राप्तमेवानूद्यते। तत्रस्यैव सर्वात्मभावादिति सर्वात्मभावमोक्षस्तुतये। यथाप्राप्तानुवादे दुःखि
त्वमपीति चेद्योग्यादिषु यथाप्राप्तजक्षणादिवत्स्थावरादिषु च यथाप्राप्तं दुःखित्वमपीति चेन्न नामरूपकृतकार्यकरणोपाधिसंप
र्कजनितभ्रांत्यध्यारोपितत्वात्सुखदुःखित्वादिविशेषस्येति परिहृतमेतत्सर्वं विरुद्धश्रुतीनां च विषयमवोचाम। तस्मादेषोस्य परम
आनंद इति वक्ष्यमाणानंदवाक्यानि द्रष्टव्यानीति॥ इति श्रीगोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकस्य शंकरभ
गवतः कृतायां बृहदारण्यकटीकायां पंचमोध्यायः समाप्तः॥ ॥जनको ह वैदेह आसांचक्रे। अस्य संबंधः॥ शारीराद्यानष्टौ पुरु
षान्निरुह्य प्रत्यूह्य पुनर्हृदये दिग्भेदेन च पुनः पंचधा व्यूह्य हृदये प्रत्युत्प हृदयं शारीरं च पुनरन्योन्यप्रतिष्ठं प्राणादिपंचवृत्यात्मके स
मानाख्ये जगदात्मनि सूत्र उपसंहृत्य जगदात्मानं शारीरं हृदयं स्वस्वावस्थामतिक्रांतवानूयः औपनिषदः पुरुषो नेति नेतीति व्यप
दिष्टः साक्षाद्व्यापादानकारणस्वरूपेण च निर्दिष्टो विज्ञानमानंदमिति। तस्यैव वागादिदेवताद्वारेण पुनरधिगमः कर्तव्य इत्यधिग
मनोपायांतरार्थोयमारंभो ब्राह्मणद्वयस्याख्यायिका त्वाचारप्रदर्शनार्था जनको ह वैदेह आसांचक्रे आसनं कृतवानास्था
यिकां दत्तवानित्यर्थः दर्शनकामेन यो राजा यद्यत तस्मिन्नवसरे याज्ञवल्क्य आवव्राज आगतवानात्मनो योगक्षेमार्थं राज्ञो वा विवि
दिषां दृष्ट्वानुग्रहार्थं तमागतं याज्ञवल्क्यं यथावत्पूजां कृत्वोवाच होक्तवान् जनको हे याज्ञवल्क्य किमर्थमचारीरागतोसि किं।

पशूनिछन्पुनरप्याहोस्विदण्वन्तान् सूक्ष्मांतान् सूक्ष्मवस्तुनिर्णयांतान्प्रश्नान्मत्तः श्रोतुमिछन्निति। उभयमेव पशू
न्प्रश्नांश्च हे संम्राट् संघादिति वाजपेययाजिनो लिंगं समस्तस्य वा भारतस्य वर्षस्य राजेयश्चाज्ञया राज्यं प्रशास्ति स संम्राट् त
स्यामंत्रणं हे संम्राड् इति। किंतु यत्ते तुभ्यं कश्चिदब्रवीदाचार्योऽनेकाचार्यसेवी हि त्वं भवान्तच्छृणवाम इतीतर आह। अब्रवीदुक्तवान्मे जि
त्वानामतः शिलिनस्यापत्यं शैलिनिर्वाग्वै ब्रह्मेति वाग्देवता ब्रह्मेति आहेतरो यथा मातृमान्माता यस्य विद्यते पुत्रस्य सम्यगनुशा
सनकर्त्री सि मातृमांस्तत ऊर्द्ध्वं पिता यस्य नुशास्ता स पितृमानुपनयनादूर्द्ध्वमासमावर्त्तनादाचार्यो यस्यानुशास्ता स आचार्यवाने
वं शुद्धित्रयहेतुसंयुक्तः स साक्षादाचार्यः स्वयं न कदाचिदपि प्रामाण्याच्च्यवति स यथा ब्रूयाच्छिष्याय तथा सौ जित्वा शैलिनिर
१·२ ब्रवीद्वाग्वै ब्रह्मेत्यवदतो हि किं स्यादिति न हि मूकस्यैहार्थमामुत्रार्थं वा किंचन स्यात्। किंत्वब्रवीदुक्तं वां स्तु ते तुभ्यं तस्य ब्रह्मण आ
यतनं प्र छं वायतनं नाम शरीरं प्रतिष्ठा त्रिष्वपि कालेषु य आश्रयः आहेतरो न मे ब्रवीदिति। इतर आह। यद्येवमेकपाद्वा एतदेकः पा १·२
दोस्य ब्रह्मणः तदिदमेकपात् ब्रह्म त्रिभिः पादैः शून्यमुपास्यमानमपि न फलाय भवतीत्यर्थः। यद्येवं स त्वं विद्वान्नोस्मात्वं
ब्रूहि हे याज्ञवल्क्य इति स चाह वागेवायतनं वाग्देवस्य ब्रह्मणो वागेव करणमायतनं शरीरमाकाशोऽव्याकृताख्यः प्रतिष्ठा उत्प
त्तिस्थितिप्रलयकालेषु प्रज्ञेत्येनदुपासीत प्रज्ञेति तृतीयमुपनिषद्ब्रह्मणः चतुर्थः पादः प्रज्ञेति हि कृत्वा एतद्ब्रह्मोपासीत का प्रज्ञता या

ज्ञवल्क्य किं स्वयमेव प्रज्ञोत प्रज्ञानिमित्तं वायतनप्रतिष्ठे ब्रह्मणो व्यतिरिक्ते तद्ब्रूहि किं न कथं नार्हि वागेव संम्राड् इति होवाच वागेव प्र
ज्ञा इति ह उवाचोक्तवान्न व्यतिरिक्ता प्रज्ञेति कथं पुनर्वागेव प्रज्ञेत्युच्यते वा वै सम्राट् बन्धुः प्रज्ञायते ऽस्माकं बंधुरित्युक्ते प्रज्ञायते बंधुः
तथ ऋग्वेदादी इष्टं यागनिमित्तं धर्मजातं हुतं होमनिमित्तं वाशितमन्नदाननिमित्तं पायितं पा नदाननिमित्तं अयं च लोकः इदं च जन्म पर
श्च लोकः प्रतिपत्तव्यं च जन्म सर्वाणि च भूतानि वाचैव संम्राट् प्रज्ञायंते अतो वाग्वै संम्राट् परमं ब्रह्म नैनं यथोक्तं ब्रह्मविदं वाग्जहाति स
र्वाण्येनं भूतान्यभिक्षरंति बलिदानादिभिरिह देवो भूत्वा पुनः शरीरपातोत्तरकालं देवानप्येत्यपिगच्छति य एवं विद्वानेतदुपास्ते वि
द्यानिष्क्रयार्थं हस्तितुल्यो ऋषभो हस्तिऋषभो यस्मिन्गोसहस्रे तत्सहस्रं हस्तिऋषभं सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञ रु६
वल्क्यः अननुशिष्य शिष्यं कृतार्थमकृत्वा शिष्याद्धनं न हरेतेति मम पिता मन्यत ममाप्ययमेवाभिप्रायः यदेव ते कश्चिदब्रवीदुदंको ना वी
मतः शुल्बस्यापत्यं शौल्बायनोऽब्रवीत्प्राणो वै ब्रह्मेति प्राणो वायुर्देवता पूर्ववत्प्राण एवायतनमाकाशः प्रतिष्ठा उपनिषत्प्रिय
मित्येनदुपासीत कथं पुनः प्रियत्वं प्राणस्य वै हे संम्राट् कामाय प्राणस्यार्थायायाज्यं याजयति पतितादिकमप्यप्रतिगृह्यस्याप्युग्र
देः प्रतिगृह्णात्यपि तत्र तस्यां दिशि वधनिमित्तमाशंकं वधाशंकेत्यर्थः यां दिशमेति तस्कराद्याकीर्णां वा तस्यां दिशि वधाशंका त
च्चैतत्सर्वं प्राणस्य प्रियत्वेन भवति प्राणस्यैव संम्राट् कामाय तस्मात्प्राणो वै संम्राट् परमं ब्रह्म नैनं प्राणो जहाति समानमन्यत् यदेव ते

द्दि श्चिद्दर्कु रिति नामतः स्वृस्यापत्यं वार्ष्णुः बर्कुर्वैव प्रेतिश्रादित्यो देवता बर्कुश्चित्तु पर्वत्तत्संयस्मा

१० कःश्रोत्रेणाश्रुतमनृतमपिस्यात् ननु चक्षुषादृष्टं तस्माद्वै सम्राट् पश्यंतमाहुरद्राक्षीस्त्वं हस्तिनमिति स वेद द्राक्षमित्याह तत्सत्यं
भवति यस्त्वन्यो ब्रूयादहमश्रौषमिति तत्व्यभिचरति यत्तु चक्षुषादृष्टं तदव्यभिचारित्वात्सत्यमेकं भवति यदेवते गर्दभी विपीत इ
तिनामतो भारद्वाजो गोत्रतः श्रोत्रे दिग्देवतानंतमित्येतदुपासीत कानंतता श्रोत्रस्य दिश एव श्रोत्रस्यानंत्यं यस्मात्तस्माद्वै सम्राट् प्रा
चीमुदीचीं वा यां कांचिदपि दिशं गच्छति नैवास्यांतं गच्छति कश्चिदप्यतोनंता दिशो दिशो वै सम्राट् श्रोत्रं तस्माद्दिगानंत्ये श्रोत्रस्या त्य
नंत्यं सत्यकाम इति। नामतो जबालाया अपत्यं जाबालस्त्वं इमा मनसि देवता आनंद इत्युपनिषत्ते यस्मान्मन एवानंदः तस्मान्मन
सा वै सम्राट् स्त्रियमभिकामयमानो भिहार्यते तस्मा प्रार्थयतेत्यर्थः यां स्त्रियमभिहार्यते तस्यां प्रतिरूपोनुरूपः पुत्रो जायते स आ
नंदहेतुः पुत्रस्य तेन मनसा निर्वर्त्यते तन्मन आनंदः विदग्धः शाकल्यो हृदयं वै सम्राट् सर्वेषां भूतानामायतनं नामरूपकर्मात्म
१०३ कानि हि भूतानि हृदयाश्रयाणीत्यवोचाम शाकल्यब्राह्मणे हृदयप्रतिष्ठिता निचेति तस्माद्धृदये ह्येव सम्राट् सर्वाणि भूतानि म
प्रतिष्ठितानि भवंति तस्माद्धृदयं स्थितिरित्युपासीत हृदये च प्रजापतिर्देवता॥ प्रथमं ब्राह्मणं॥ ॥जनको ह वैदेहः। यस्मात्स विशे
षणानि सर्वाणि ब्रह्माणि जानाति याज्ञवल्क्यस्तस्मादाचार्यकत्वं हित्वा जनकः कूर्चादासनविशेषाद् उच्छ्रायोपसमीपमवसर्प्य
न्यादयो निपतन्नित्यर्थः। उवाच उक्तवान् नमस्तेअस्तु हे याज्ञवल्क्य अनुमाशाधि इति अनुशाधि मामित्यर्थ इति शाखो वा कयपीस १०३

मात्यर्थः स होवाच याज्ञवल्क्यः यथा वै लोके हे सम्राट् महांतं दीर्घमध्वानमेष्यन् गमिष्यन् रथं वा स्थलेन गमिष्यन् नावं वा जले न समा
ददीत एवमेवैतानि ब्रह्माण्येताभिरुपनिषद्भिर्युक्तान्युपासीनः समाहितात्मासि। अत्यंतमेताभिरुपनिषद्भिः संयुक्तात्मासि न केव
लमुपनिषत्समाहित एवं वृंदारकः पूज्यश्चाढ्यश्च त्वोनद दिव्य इत्यर्थः। अधीतवेदः अधीतो वेदो यस्य सोयमधीतवेदः उक्ताश्चोपनि
षदः आचार्यैस्तुभ्यं स त्वमुक्तोपनिषत्कः एवं सर्वविभूतिसंपन्नोपि भयमध्यस्थ एव परमात्मज्ञानेन विना कृतार्थ एव तावदित्यर्थः
यावत्परं ब्रह्म न वेत्सि। इतोस्माद्देहाद्विमुच्यमान एताभिर्नौभिः स्थानीयाभिः समाहितः क्व कस्मिन्गमिष्यसि किं वस्तु प्राप्स्य
सीति नाहं तद्वस्तु भगवन् पूजावन्वेद जाने यत्र गमिष्यामीति यद्येवं न जानीषे यत्र गतः कृतार्थः स्यां अहं वै ते तुभ्यं तद्वक्ष्यामि यत्र अथ६
गमिष्यसीति ब्रवीतु भगवानिति यदि प्रसन्नो मां प्रति शृणु इंद्धो ह वै नाम इंध इत्येवं नामायं यश्चक्षुषि ब्रह्मेति पुरोक्तः आदित्यांतर्ग
तः पुरुषः एष योयं दक्षिणेक्षन्नक्षिणि विशेषेणाव्यवस्थितः स च सत्यनामा च तं वा एतं पुरुषं दीप्तिगुणत्वात् प्रत्यक्षं नामास्ये
ध इति। तमिंधं संतमिंद्र इत्याचक्षते। परोक्षेण यस्मात्परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः प्रत्यक्षनामग्रहणं हि द्विषंति एष त्वं वैश्वा
१ नरमात्मानं संपन्नोसि अथैतमक्षिणि पुरुषरूपमेषास्य पत्नी यत्वं वैश्वानरमात्मानं संपन्नोसि तस्यास्येंद्रस्य भोक्तृ भोग्यैषास्य पत्नी वि रा
राडन्नं भोग्यत्वादेव तदेतदन्नं वा अन्नं वा चैकं मिथुनं स्वप्ने। कथं तयोरेष इंद्राण्यादिंद्रस्य चैष संस्तावः संभूय यत्र संस्तवं कुर्वाते अन्योन्यं। स एष

फा२

संस्तावः कोऽसौ य एषोऽन्तर्हृदयाकाशोऽन्तर्हृदये हृदयस्य मांसपिंडस्य मध्ये अथ एनयोरेतद्भक्ष्यमाणं अन्नं भोग्यं स्थितिहेतुः किंत
त्य एषोऽन्तर्हृदये लोहित एव पिंडाकारापन्नो लोहितपिंडोऽन्नं जग्धं द्वेधा परिणमते यत्स्थूलं तदधो गच्छति यदन्यत्तत्पुनरग्निना प
च्यमानं द्वेधा परिणमते यो मध्यमो रसः स रसो लोहितादिक्रमेण पांचभौतिकं पिंडं शरीरमुपचिनोति योऽणिष्ठो रसः स एष लोहि
तपिंडः इंद्रस्य लिंगात्मनो हृदये मिथुनीभूतस्य यं तैजसमाचक्षते स उभयोरिंद्राण्योर्हृदये मिथुनीभूतयोः सूक्ष्मासु नाडीष्वनुप्रविष्टः स्थि
तिहेतुर्भवति। तदेतदुच्यतेऽथैनयोरेतदन्नमित्यादि किंचान्यदथैनयोरेतत्प्रावरणं भुक्तवतोः स्वपतोश्च प्रावरणं भवति लोके तत्सामान्यं
हि कल्पयति श्रुतिः किं तदिह प्रावरणं यदेतदंतर्हृदये जालकमिवानेकनाडीछिद्रबहुलत्वाज्जालकमिवाथैनयोरेषा सृतिर्मार्गः। संचर
तोऽनयेति संचरणी स्वप्नाज्जागरितदेशागमनमार्गः का सा सृतिः या एषा हृदयदेशादूर्ध्वाभिमुखी सत्युच्चरति नाडी तस्याः परिमाणमिद
१०४ मुच्यते। यथा लोके केशः सहस्रधा भिन्नोऽत्यंतसूक्ष्मो भवत्येवं सूक्ष्मा अस्य देहस्य संबंधिन्य एता हिता नाम हिता इत्येवं ख्याता नाड्यस्ता
श्चान्तर्हृदये मांसपिंडे प्रतिष्ठिता भवंति हृदयाद्विप्ररूढास्ताः सर्वतः कदंबकेसरवदेताभिर्नाडीभिरत्यंतसूक्ष्माभिरेतदन्नमास्र
वदास्रवति गच्छतीति तदेतद्देवताशरीरमनेनान्नेन दामभूतेनोपचीयमानं तिष्ठति तस्मात् यस्मात् स्थूलेनान्नेनोपचितः पिंडः इदं तु १०४
देवताशरीरं लिंगं सूक्ष्मेणान्नेनोपचितं पिंडोपचायकस्य अन्नं प्रविविक्तमेव मूत्रपुरीषादिस्थूलमपेक्ष्य लिंगस्थितिकरं त्वन्नं ततोऽपि सू

तस्माच्छारीरात्२

२

क्ष्मतरमतः प्रविविक्ताहारः पिंडस्तस्मात्प्रविविक्ताहारादपि प्रविविक्ताहारतर एष लिंगात्मा इव एव भवत्यस्माच्छरीराच्छरीरमेव शारी
रं आत्मनो वैश्वानरात्तैजसः सूक्ष्मान्नोपचितो भवति स एष हृदयभूतस्तैजसः सूक्ष्मभूतेन प्राणेन विध्रियमाणः प्राण एव च भ
वत्यस्य विदुषः क्रमेण वैश्वानरात्तैजसं सूक्ष्मं प्राप्तस्य हृदयात्मानमापन्नस्य हृदयात्मनः प्राणात्मानमापन्नस्य प्राचीदि
क् प्रांचः प्राग्गताः प्राणास्तस्य दक्षिणास्तथा दक्षिणा दिक् दक्षिणे प्राणाः तथा प्रतीची दिक् प्रत्यंचः प्राणाः उदीची दिक् उ
दंचः प्राणाः ऊर्ध्वा दिक् ऊर्ध्वाः प्राणाः अवाची दिक् अवांचः प्राणाः सर्वा दिशः सर्वे प्राणा एवं विद्वान् क्रमेण सर्वात्मकं प्रा
णमात्मत्वेनोपगतो भवति तं सर्वात्मानं प्रत्यगात्मन्युपसंहृत्य द्रष्टुर्हि दृष्टेर्भावं नेति नेत्यात्मानं तुरीयं प्रतिपद्यते यमेष विद्वा
ननेन क्रमेण प्रतिपद्यते। स एष नेति नेत्यात्मेत्यादि निरेष्यति। इत्यंतं व्याख्यातमेतदभयं वै जन्ममरणादिनिमित्तभयशून्यं हे
जनक प्राप्तोऽसीति स ह एवं किल उवाच उक्तवान् याज्ञवल्क्यः तदेतदुक्तं अथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति स होवाच
जनको वैदेहः अभयमेव त्वामपि गच्छतात् गच्छतु यस्त्वं नोऽस्मान् हे भगवन् पूजावन् अभयं ब्रह्म वेदयसे ज्ञापयसि प्रापितवानुपाधि
कृताज्ञानव्यवधानापनयनेनेत्यर्थः किमन्यदहं विद्यानिष्क्रयार्थं प्रयच्छामि साक्षादात्मानमेव दत्तवते तेन नमस्तेऽस्तु इमे
[illegible] विदेहास्तव यथेष्टं [illegible] भुज्ञामयं चाहमस्मि दासत्वावस्थितो यथेष्टं मां राज्यं च प्रतिपद्यस्वेत्यर्थः। षष्ठस्य द्वितीयं ब्रा

स्त्वं२

६ यः सामान्येनाधिगतः प्राणेनप्राणितीत्यादिनानर

रूपं। जनकं ह वैदेहं याज्ञवल्क्यो जगामास्याभिसंबंधो विज्ञानमय आत्मा साक्षादपरोक्षाद्ब्रह्म सर्वांतरः पर एव नान्योतोस्ति
द्रष्टा नान्यदतोस्ति द्रष्टृ इत्यादिश्रुतिभ्यः स एष इह प्रविष्टो वदनादिलिंगोस्ति व्यतिरिक्त इति मधुकांडे जातशत्रुसंवादे प्राणादि
कर्तृत्वप्रत्याख्यानेनाधिगतोपि सन् पुनः प्राणनादिप्रमाणमुपन्यस्योषस्तप्रश्ने प्राणनादिलिंगो दृष्टेर्द्रष्टा इत्यादिनानु
प्तत्वाक्तिस्वरूपावोधिगतस्य तस्यैव परोपाधिनिमित्तः संसारो यथा रज्जूषरशुक्तिकागगनादिषु सर्पोदककरजतमलिनत्वादि
पराध्यारोपणनिमित्तमेव न स्वतस्तथा निरुपाधिकोऽनुपाख्यो नेति नेति व्यपदेश्यः साक्षादपरोक्षात्सर्वांतर आत्मा ब्रह्माक्ष
र मन्तर्यामी प्रशास्तौपनिषदः पुरुषो विज्ञानमानंदं ब्रह्मेत्यधिगतं तदेव पुनरिह प्रविविक्ताहारस्ततोन्तर्हृदये
लिंगात्मा प्रविविक्ताहारतरस्ततः परेण जगदात्मा प्राणोपाधिरस्ततोपि प्रविलाप्य जगदात्मानमुपाधिभूतं रज्ज्वादाविव सर्पा
दिकं विद्यया स एष नेति नेतीति साक्षात्सर्वांतरं ब्रह्मत्वाधिगतमेवमनंतरं परिप्रापितो जनको याज्ञवल्क्येनागमतः संक्षेपतो जा
५ ग्रत्स्वप्नसुषुप्ततुरीयाण्युपन्यस्तानि अन्यप्रसंगेन प्रविविक्ताहारतरः सर्वप्राणः स एष नेतीति नीजाग्रत्स्वप्नादिद्वारेणै
व महता तर्केण विस्तरतोधिगमः कर्त्तव्यो यं परिप्रापयितव्यः भावस्यात्मनो विप्रतिपत्त्याशंकानिराकरणद्वारेण व्यतिरिक्तत्वं १·५
शुद्धत्वं स्वयंज्योतिष्ट्वमसंगत्वाक्तिस्वरूपत्वं निरतिशयानंदस्वात्माव्यमद्वैतत्वं चाधिगंतव्यमितीदमारभ्यते आख्यायिका तु विद्या

संप्रदानग्रहणविधिप्रकाशनार्था विद्यास्तुतयेव विशेषतः वरप्रदानादिसूचनाज्जनकं ह वैदेहं याज्ञवल्क्यो जगाम स च ग
च्छन्नेवमे ने चिंतितवान्न वदिष्ये किंचिदपि राज्ञे। गमनप्रयोजनं तु योगक्षेमार्थं न वदिष्य इत्येवंसंकल्पोपि याज्ञवल्क्यो
यद्यज्जनकः पृष्टवांस्तत्तत्प्रतिपेदे तत्र को हेतुः संकल्पितस्यान्यथाकरणे इत्यत्राख्यायिकामाचष्टे पूर्वत्र किल जनक
याज्ञवल्क्ययोः संवाद आसीदग्निहोत्रे निमित्ते तत्र जनकस्याग्निहोत्रविषयं विज्ञानमुपलभ्य परितुष्टो याज्ञवल्क्यस्त
स्मै जनकाय ह किल वरं ददौ। स च जनको ह कामप्रश्नमेव वरं वव्रे वृतवान् तं च वरं हास्मै ददौ याज्ञवल्क्यः तेन वरप्रदान
सामर्थ्येनानाविख्यासुमपि याज्ञवल्क्यं तूष्णीं स्थितमपि सं म्राडेव जनकः पूर्वः पप्रच्छ। तत्रैवानुक्तिर्ब्रह्मविद्यायाः
कर्मणा विरुद्धत्वाद्विद्यायाश्च स्वातंत्र्यात् स्वतंत्रा हि ब्रह्मविद्या सहकारिसाधनांतरापेक्षा पुरुषार्थसाधनेति च हेया निर
ज्ञवल्क्य संबोध्याभिमुखीकरणाय किंज्योतिरयं पुरुष इति किमस्य पुरुषस्य ज्योतिर्येन ज्योतिषा व्यवहरति। सोयं किं
ज्योतिरयं प्राकृतः कार्यकरणसंघातरूपः शिरःपाण्यादिमान् पुरुषः पृच्छ्यते किमयं स्वावयवसंघातबाह्येन ज्योतिरंतरेण
व्यवहरत्याहोस्विन् स्वावयवसंघातमध्यपातिना ज्योतिः कार्यमयं निर्वर्त्तयतीत्येतदभिप्रेत्य पृच्छति किं चातः यदि व्यतिरिक्तेनय

वृ

३ दिवाव्यतिरिक्तेनज्योतिषाज्योतिःकार्यंनिर्वर्त्त्यपतिदृष्टंतत्रकारणंयदिव्यतिरिक्तेनैवज्योतिःकार्यनिर्वर्त्तकत्वमस्यस्वभा
वोनिर्द्धारितोभवतिततोऽदृष्टज्योतिःकार्यविषयेप्यनुमास्यामहेव्यतिरिक्तज्योतिर्निमित्तमेवेदंकार्यमितिअथयाव्यतिरि
क्तेनैवस्वात्मनाज्योतिषाव्यवहरतिततोऽप्रत्यक्षेपिज्योतिषिज्योतिःकार्यदर्शनेऽव्यतिरिक्तमेवज्योतिरनुमेयमथानियम
एवव्यतिरिक्तमव्यतिरिक्तंवाज्योतिःपुरुषस्यव्यवहारहेतुःततोनध्यवसायएवज्योतिर्विषयइत्येवंमन्वानःपृच्छतिजनको
याज्ञवल्क्यंकिंज्योतिरयंपुरुषइतिनन्वेवमनुमानकुशलोजनकस्तस्यकिंप्रश्नेनस्वयमेवकस्मान्नप्रतिपद्यतइतिसत्यमेव
मेतत्तथापिलिंगलिंगिसंबंधविशेषाणामत्यंतसौक्ष्म्याद्दुरवबोध्यतांमन्यतेबहूनामपिपंडितानांकिमुतैकस्यातएवहिध
र्मसूक्ष्मनिर्णयेपरिषद्व्यापारइष्यतेपुरुषविशेषश्चापेक्ष्यतेदशावराप षत्त्रयोवैकोवेतितस्मात्यद्यप्यनुमानकौशलं
राज्ञस्तथापियुक्तोयाज्ञवल्क्यःप्रष्टुंविज्ञानकौशलतारतम्योपपत्तेःपुरुषाणामथवाश्रुतिःस्वयमेवाख्यायिकाव्याजेनानु
१०६ मानमार्गमुपन्यस्यास्मान्बोधयतिपुरुषमतिमनुसरंतीयाज्ञवल्क्योपिजनकाभिप्रायाभिज्ञतयाव्यतिरिक्तमात्मज्योतिर्वोध १०६
यिष्यन्जनकंव्यतिरिक्तप्रतिपादकमेवलिंगंप्रतिपेदेयथाप्रसिद्धमादित्यज्योतिःसम्राडितिहोवाचकथमादित्येनैवस्वावय
वसंघातव्यतिरिक्तेनचक्षुषोनुग्राहकेणज्योतिषायंप्राकृतःपुरुषआस्तेउपविशतिपल्ययतेपर्येतिक्षेत्रमरण्यंवातत्रगत्वाकर्म

पुरु

कुरुतेविपल्येतिविपर्येयेतीतिचयथागतमत्यंतव्यतिरिक्तज्योतिष्ट्वप्रसिद्धताप्रदर्शनार्थमनेकविशेषणंबाह्यानेकज्योतिःप्रद
र्शनंचलिंगस्याव्यभिचारित्वप्रदर्शनार्थं मेवमेवैतद्याज्ञवल्क्यअस्तमितआदित्येयाज्ञवल्क्यकिंज्योतिरेवायंपुरुषइति
चंद्रमाएवास्यज्योतिःअस्तमितेआदित्येचंद्रमस्यस्तमितेग्निर्ज्योतिः।शांतेग्नौवाग्ज्योतिर्वागितिशब्दःपरिगृह्यतेशब्देनविषये
णश्रोत्रमिंद्रियं दीप्यतेश्रोत्रेंद्रियेसंदीप्तेमनसिविवेकउपजायते।तेनमनसाबाह्यांचेष्टांप्रतिपद्यतेमनसाह्येवपश्यतिमन
साशृणोतीतिब्राह्मणं।कथंपुनर्वाग्ज्योतिरिति।वाचोज्योतिष्ट्वमप्रसिद्धमित्यतआहतस्माद्वैसम्राड्यस्माद्वाचाज्योतिषानुगृहीतो
यंपुरुषोव्यवहरतितस्मात्प्रसिद्धमेतत्वाचोज्योतिष्ट्वंकथमपियत्रयस्मिन्कालेप्रावृषि प्रायेणमेघांधकारेसर्वज्योतिः
प्रत्यस्तमयेस्वोपिपाणिर्हस्तोनविस्पष्टंनिर्ज्ञायतेअथतस्मिन्कालेसर्वचेष्टानिरोधेप्राप्तेबाह्यज्योतिषोभावाद्यत्रवागुच्चरतिश्वावाश्
यतिगर्दभोवारौतिउपैवतत्रन्येतितेनशब्देनज्योतिषाश्रोत्रमनसोर्नैरंतर्यंभवतितेन ज्योतिःकार्यत्वंवाक्प्रतिपद्यतेतेनवाग्ज्योति
षाउपन्येत्येवउपगच्छत्येवतत्रकर्मकुरुतेविप ल्येतितत्रवाग्ज्योतिषोग्रहणंगन्धादीनामुपलक्षणार्थंगंधादिभिरपिहिघ्राणा
दिष्वनुगृहीतेषुप्रवृत्तिनिवृत्त्यादयोभवंति।तेनतैरप्यनुग्रहोभवतिकार्यकरणसंघातस्यएवमेवैतद्याज्ञवल्क्यशांतायांपुनर्वाचि
गंधादिष्वपिचशांतेषुबाह्येष्वनुग्राहकेषुसर्वप्रवृत्तिनिरोधःप्राप्तोऽस्यपुरुषस्येतदुक्तंभवति।जाग्रद्विषयेहिवहिर्मुखानिकरणा

ख

न्नि। चक्षुरादीन्यादित्यादिज्योतिर्भिरनुगृह्यमाणानि यदा तदा स्फुटतरः संव्यवहारोस्य पुरुषस्य भवत्येवं तावज्जागरिते स्वावयवसं
घातव्यतिरिक्तेनैव ज्योतिषा ज्योतिःकार्यसिद्धिरस्य पुरुषस्य दृष्टा तस्मात्तेन वयं मन्यामहे। सर्वदा बाह्यज्योतिःप्रत्यस्तमयेपि स्वप्नसुषु
प्तकाले जागरिते च तादृगवस्थायां स्वावयवसंघातव्यतिरिक्तेनैव ज्योतिषा ज्योतिःकार्यसिद्धिरस्येति दृश्यते च स्वप्ने ज्योतिःकार्यसि
द्धिर्बंधुसंगमनवियोगदर्शनं देशांतरगमनागमनादि च सुषुप्ताच्चोत्थानं तस्मादस्ति व्यतिरिक्तं किमपि ज्योतिः किंपुनस्तच्छांतायां
वाचि ज्योतिर्भवतीत्युच्यते। आत्मैवास्य ज्योतिर्भवती   त्यात्मेति कार्यकरणस्वावयवसंघातव्यतिरिक्तं
कार्यकरणावभासकमादित्यादिबाह्यज्योतिर्वत्स्वयमन्येनानवभास्यमानमभिधीयते ज्योतिरंतस्थं च तत्पारिशेष्यात्कार्यकरणव्य त्याइ
तिरिक्तं तदिति तावत्सिद्धं यच्च कार्यकरणव्यतिरिक्तं कार्यकरणसंघातानुग्राहकं च ज्योतिस्तद्बाह्यैश्चक्षुरादिकरणैरुपलभ्यमानं दृष्टं
न तु तथा तच्चक्षुरादिभिरुपलभ्यते। आदित्यादिज्योतिःषूपर   तेषु कार्यं ज्योतिषो दृश्यते। यस्मात्तस्मादात्मनैवायं ज्योति
षास्ते पल्ययते कर्म कुरुते विपल्येतीति तस्मान्नूनमंतस्थं ज्योतिरित्यवगम्यते। किंत्वादित्यादिज्योतिर्विलक्षणं तज्ज्योतिः किं च स
एव हेतुर्यच्चक्षुराद्यग्राह्यत्वमादित्यादिवत् समानजातीयेनैवोपकारदर्शनाद्बाह्यादिविलक्षणं ज्योतिरंतरं सिद्धमित्येतदसत्क १०७
स्मादुपक्रियमाणसमानजातीयेनैवादित्यादिज्योतिषा कार्यकरणसंघातस्य भौतिकेनैवोपकारः क्रियमाणो दृश्यते यथाद

पादि २

दृष्टं चेदमनुमेयं। यदि नाम कार्यकरणादर्थांतरं तदुपकारकमादित्यादिवज्ज्योतिस्तथापि कार्यकरणसंघातसमानजातीयमेवानुमे
यं कार्यकरणसंघातोपकारकत्वादादित्यादिज्योतिर्वत्। यत्पुनरंतस्थत्वमप्रत्यक्षत्वाच्च वैलक्षण्यमुच्यते तच्चक्षुरादिज्योतिर्भिरने
कांतिकं यतः प्रत्यक्षाण्यंतस्थानि च चक्षुरादिज्योतींषि तस्मात्तव मनोरथमात्रं विलक्षणमात्मज्योतिः सिद्धमिति कार्यकरणसंघा
तभावभावित्वाच्च संघातधर्मत्वमनुमीयते ज्योतिषः सामान्यतोदृष्टस्य चानुमानस्य व्यभिचारित्वादप्रामाण्यं सामान्यतोदृष्टब
लेन हि भवानादित्यादिवद्व्यतिरिक्तं ज्योतिः साधयति कार्यकरणेभ्यो न च प्रत्यक्षमनुमानेन बाधितुं शक्यते। अयमेव तु कार्य
करणसंघातः प्रत्यक्षं पश्यति शृणोति मनुते विजानाति च। यदि नाम ज्योतिरंतरमस्योपकारकं स्यादादित्यादिवत् न सावात्मास्य
ज्योतिरंतरमादित्यादिवदेव। य एव तु प्रत्यक्षं दर्शनादिक्रियां करोति स एवात्मा स्यात्कार्यकरणसंघातो नान्यः प्रत्यक्षविरोधेनु
मानस्याप्रामाण्यात् ननु अयमेव चेद्दर्शनादिक्रियाकर्तात्मा संघातः कथमविकलस्यैवास्य दर्शनादिक्रियाकर्तृत्वं कदाचिद्भ
वति कदाचिन्नेति नैष दोषो दृष्टत्वात् न हि दृष्टेनुपपन्नं नाम। किं खद्योते प्रकाशाप्रकाशकत्वं दृश्यमानं कारणांतरमनुमेयमनुमेय
त्वेव केनचित्सामान्यात्सर्वं सर्वत्रानुमेयं स्यात्तच्चानिष्टं न च पदार्थस्वभावो नास्ति न ह्यग्नेरुष्णस्वभावत्वमन्यनिमित्तमुदकस्य वा शै
त्यं प्राणिधर्माधर्माद्यपेक्षमिति चेद्धर्माधर्मादेर्निमित्तांतरापेक्षस्वभावप्रसंगः। अस्त्विति चेत्तदनवस्थाप्रसंगः। स चानिष्टान

स्वप्नस्मृत्योर्दृष्टस्यैव दर्शनाद्यदुक्तं स्वभाववादिना देहस्यैव दर्शनादिक्रियानव्यतिरिक्तस्येति तन्न यदि देहस्यैव दर्शनादिक्रि
यास्वप्नदृष्टस्यैव दर्शनं न स्याद्यः स्वप्नं पश्यन्दृष्टपूर्वमेव पश्यति न त्वाकद्वीपादिगतमदृष्टरूपं तत्स्यैव तत्सिद्धं भवति यः स्वप्ने
पश्यति दृष्टपूर्वं स एव पूर्वं विद्यमाने चक्षुष्यद्राक्षीन्न देह इति देहस्य तद्द्रष्टा स येनाद्राक्षीत्तस्मिन्नुद्धृते चक्षुषि स्वप्ने तदेव दृष्टपूर्वं
न पश्येदस्ति च लोके प्रसिद्धिः पूर्वं दृष्टं मया हिमवतः शृंगमद्याहं स्वप्नेऽद्राक्षमित्युद्धृतचक्षुषामन्धानामपि तस्मादनुद्धृतेऽपि चक्षु
षि यः स्वप्नद्रष्टा स एव दृष्टो न देह इत्यवगम्यते तथा स्मृतो दृष्टस्मार्त्रोरेकत्वे सति य एव द्रष्टा स एव स्मर्त्ता यदा चैवं तदा निमीलिता
क्षोऽपि स्मरन्दृष्टपूर्वं यद्रूपं तद्दृष्टवदेव पश्यतीति तस्माद्यन्निमीलितं तन्न द्रष्टृ यन्निमीलिते चक्षुषि स्मरन्रूपं पश्यति तदेवानि
मीलितेऽपि चक्षुषि द्रष्टासीदित्यवगम्यते मृते च देहेऽविकलस्यैव चरूपादिदर्शनाभावाद्देहस्यैव द्रष्टृत्वे मृतेऽपि दर्शनादिक्रिया
स्यात्। तस्माद्यदपाये देहे दर्शनं न भवति यद्भावे च भवति तद्दर्शनक्रियादिकर्तृ न देह इत्यवगम्यते। चक्षुरादीन्येव दर्शनादिक्रि
१०८ याकर्तॄणीति चेत्। न यदहमद्राक्षं तत्स्पृशामीति भिन्नकर्तृकत्वे प्रतिसंधानानुपपत्तेः मनस्तर्हीति चेन्न मनसोऽपि विषयत्वाद्रूपा १०८
दिवदृष्टत्वाद्यनुपपत्तेः तस्मादस्त्यन्तस्थो व्यतिरिक्त आदित्यादिवदिति सिद्धं यदुक्तं कार्यकरणसंघातसमानजातीयमेव ज्योतिर
तरमनुमेयमादित्यादिभिस्तत्समानजातीयैरेवोपक्रियमाणत्वादिति तदसदुपकार्योपकारकत्वावस्थानियमदर्शनात्कथं पार्थि

नियम

वैरिंधनैः पार्थिवत्वसमानजातीयैस्तृणोलपादिभिरग्नेः प्रज्वलनोपकारः क्रियमाणो दृश्यते न च तावता तत्समानजातीयैरे
वाग्नेः प्रज्वलनोपकारः सर्वत्रानुमेयः स्यात् येनोदकेनापि प्रज्वलनोपकारो भिन्नजातीयेन वैद्युतस्याग्नेर्जाठरस्य च क्रिय
माणो दृश्यते तस्मादुपकार्योपकारकत्वे समानजातीयत्वं नास्ति कदाचित्समानजातीया मनुष्या मनुष्यैरेवोपक्रियन्ते। कदा
चित्स्थावरपश्वादिभिश्च भिन्नजातीयैस्तस्मादहेतुः कार्यकरणसंघातसमानजातीयैरेवादित्यादिभिर्ज्योतिर्भिरुपक्रियमाणत्वा नि
दिति यत्पुनरात्थ चक्षुरादिभिरादित्यादिज्योतिर्वद्दृश्यत्वादित्ययं हेतुर्ज्योतिरंतःस्यान्तस्थत्वे लक्षणत्वं च न साधयति चक्षुरा
दिभिरनैकान्तिकत्वादिति तदसच्चक्षुरादिकरणेभ्योऽन्यत्वे सतीति हेतोर्विशेषणत्वोपपत्तेः कार्यकरणसंघातधर्मत्वं ज्योतिष्वद्
ति यदुक्तं तन्नानुमानविरोधादादित्यादिज्योतिर्वत्कार्यकरणसंघातादर्थान्तरं ज्योतिरिति ह्यनुमानमुक्तं तेनैव विरुध्यत इयं प्रति
ज्ञाया कार्यकरणसंघातधर्मत्वं ज्योतिष्वदिति तद्भावभावित्वं त्वसिद्धं मृते देहे ज्योतिषोऽदर्शनात्सामान्यतो दृष्टस्यानुमानस्याप्रा
माण्ये सति पानभोजनादिसर्वव्यवहारलोपप्रसंगः स चानिष्टः। पानभोजनादिभिः क्षुत्पिपासादिनिवृत्तिमुपलभ्य च तस्तत्सा नप
मान्यात्पानभोजनाद्युपादानं दृश्यमानं [illegible] लोकेन प्राप्नोति दृश्यंते ह्युपलब्धपानभोजनं सामान्यतः पुनर्भोजनांतरैः क्षु
त्पिपासादिनिवृत्तिमनुमिन्वंतस्तादर्थ्येन प्रवर्त्तमानाः। यदुक्तमयमेव तु देहो दर्शनादिक्रियाकर्त्तेति तत्प्रथममेव परिहृतं स्वप्नस्मृत्यो
म

देहादर्थांतरत्वं ततो दृष्टेति। अनेनैव ज्योतिरंतरस्यानात्मत्वमपि प्रयुक्तं यत्पुनः खद्योतादेः कादाचित्कं प्रकाशाप्रकाशकत्वं तदसत्य
क्षाद्यवयवसंकोचविकाशनिमित्तत्वात्प्रकाशाप्रकाशकत्वस्य। यत्पुनरुक्तं धर्माधर्मयोरवश्यं फलदातृत्वं स्वच्छाभावोप्यभ्युपगंतव्य
इति तदभ्युपगमे च वतः सिद्धांतहानादेतेनानवस्थादोषः प्रयुक्तस्तस्मादस्ति व्यतिरिक्तं चांतःस्थं ज्योतिरात्मेति। यद्यपि व्यतिरि
क्तत्वादि सिद्धं तथापि समानजातीयानुग्राहकत्वदर्शननिमित्तभ्रांत्याकरणानामेवान्यतमो व्यतिरिक्तो वेत्यविवेकतः पृच्छति
कतम इति न्यायसूक्ष्मतया ह्युद्विज्ञेयत्वाद्युपपद्यते हि भ्रांतिरथवा शरीरव्यतिरिक्ते सिद्धेपि करणानि सर्वाणि विज्ञानवंती
व विवेकेनात्मनोनुपलब्धत्वादतोहं पृच्छामि कतम आत्मेति। कतमोसौ देहेंद्रियमनःसु यस्त्वयोक्त आत्मा येन ज्योतिषास्तेइ
त्युक्तमथवा योयमात्मा त्वयाभिप्रेतो विज्ञानमयः सर्वेष्वेषु प्राणा विज्ञानमया इवेषु प्राणेषु कतमो यथा समुदितेषु ब्राह्मणेषु स
र्व इमे तेजस्विनः कतमः एषु षडंगविदिति पूर्वस्मिन् व्याख्याने कतम आत्मेत्येतावदेव प्रश्नवाक्यं योयं विज्ञानमय इति प्रतिव
१·२ वचनं द्वितीये तु व्याख्याने प्राणेष्वित्येवमंतं प्रश्नवाक्यमथवा सर्वमेव प्रश्नवाक्यं विज्ञानमये हृद्यंतर्ज्योतिः पुरुषः कतम इत्येतदंतं यो
यं विज्ञानमय इत्येतस्य शब्दस्य निर्द्धारितार्थविशेषविषयत्वं कतम आत्मेति वेति शब्दस्य प्रश्नवाक्यपरिसमाप्त्यर्थत्वं व्यव १·२
हितसंबंधमंतरेणायुक्तमिति कृत्वा कतम आत्मेत्येवमंतमेव प्रश्नवाक्यं योयमित्यादि परं सर्वमेव प्रतिवचनमिति निश्चीयते। योय

मित्यात्मनः प्रत्यक्षत्वान्निर्देशो विज्ञानमयो विज्ञानप्रायो बुद्धिविज्ञानोपाधिसंपर्काविवेकाद्विज्ञानमय इत्युच्यते। बुद्धिविज्ञान
संपृक्त एव हि यस्मादुपलभ्यते। राहुरिव चंद्रादित्यसंपृक्तो बुद्धिर्हि सर्वार्थकरणं तमसीव प्रदीपः पुरोवस्थितो मनसा ह्येव प
श्यति मनसा शृणोतीति ह्युक्तं बुद्धिविज्ञानालोकविशिष्टमेव हि सर्वं विषयजातमुपलभ्यते। पुरोवस्थितप्रदीपालोकविशिष्टमि
व तमसि द्वारमात्राणि त्वन्यानि बुद्धेः। तस्मात्तेनैव विशेषते विज्ञानमय इति। येषां परमात्मविज्ञप्तिविकार इति व्याख्यानं तेषां वि
ज्ञानमयो मनोमय इत्यादौ विज्ञानमयशब्दस्यान्यार्थदर्शनादश्रोतार्थतावसीयते। संदिग्धश्च पदार्थोऽन्यत्र निश्चितप्रयोगदर्श
नान्निर्द्धारयितुं युक्तो वाक्यशेषात् निश्चितन्यायबलाद्वा स धीरिति चोत्तरत्र पाठाद्धृद्यंतरिति च वचनात् युक्तं विज्ञानप्रायत्वमेव प्रा
णेष्विति व्यतिरेकप्रदर्शनार्था सप्तमी यथा वृक्षेषु पाषाण इति सामीप्यलक्षणा प्राणेषु हि व्यतिरेकाव्यतिरेकता संदिह्यत
आत्मनः प्राणेषु प्राणेभ्यो व्यतिरिक्त इत्यर्थः यो हि येषु भवति स तद्व्यतिरिक्तो भवत्येव यथा पाषाणेषु वृक्षः हृदि तत्रेतत्स्यात्प्रा
णेषु प्राणजातीय एव बुद्धिः स्यादित्यत आह। हृद्यंतरिति हृच्छब्देन पुंडरीकाकारो मांसपिंडस्तात्स्थ्याद्बुद्धिर्हृत्तस्यां हृदि बुद्ध्य
ंतरिति बुद्धिवृत्तिव्यतिरेकप्रदर्शनार्थः ज्योतिरवभासात्मकत्वात्। आत्मोच्यते। तेन ह्ययमवभासकेनात्मना ज्योतिषास्ते पल्य
यते कर्म कुरुते चेतनावानिव ह्ययं कार्यकरणपिंडो यथादित्यप्रकाशस्थो घटो यथा वा मरकतादिमणिः क्षीरादिद्रव्यप्रक्षिप्तः

६

परीक्षणायात्मच्छायमेव तत्क्षीरादिद्रव्यं करोति तादृगेतदात्मज्योतिर्बुद्धेरपि हृदयात्सूक्ष्मत्वाद्धृदयंतस्थमपि हृदयादि
कं कार्यकरणसंघातं चैकीकृत्यात्मज्योतिः छायं करोति पारंपर्येण सूक्ष्मस्थूलतारतम्यात्स्वच्छतरतमत्वाद्बुद्धिस्तावत्स्व
च्छत्वादानंतर्याच्चात्मचैतन्यज्योतिःप्रतिच्छाया भवति तेन हि विवेकिनामपि तत्रात्माभिमानबुद्धिः प्रथमा ततोऽप्यानंतर्यान्तु
मनसि चैतन्यावभासता बुद्धिसंपर्कात्ततः इंद्रियेषु मनःसंयोगात्ततोऽनंतरं शरीरे इंद्रियसंपर्कादित्येवं पारंपर्येण कृत्स्नं कार्य
करणसंघातमात्मा चैतन्यस्वरूपज्योतिषावभासयति तेन हि सर्वस्य लोकस्य कार्यकरणसंघाते तद्वृत्तिषु वानियतात्माभि
मानबुद्धिर्यथाविवेकं जायते तथा भगवतोक्तं गीतासु यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः क्षेत्रं क्षेत्री तथा कृत्स्नं प्र
काशयति भारत यदादित्यगतं तेज इत्यादि च। नित्यो नित्यानां चेतनश्चेतनानामिति च काठके। तमेव भांतमनुभाति सर्वं तस्य
भासा सर्वमिदं विभातीति च येन सूर्यस्तपति तेजसेद्ध इति च मंत्रवर्णात् स वा अयं हृद्यंतर्ज्योतिः पुरुषः आकाशवत्सर्वगतत्वात्पू
र्ण इति पुरुषो निरतिशयं चास्य स्वयंज्योतिष्ट्वं सर्वावभासात्मकत्वात्स्वयमन्यानवभास्यत्वाच्च स एष पुरुषः स्वयमेव ज्योतिः
११ स्वभावोयं त्वं पृष्ठसि कतम आत्मेति बाह्यानां ज्योतिषां सर्वकरणानुग्राहकाणां प्रत्यस्तमये तः करणद्वारेण हृद्यंतर्ज्योतिः
पुरुष आत्मानुग्राहकः करणानामित्युक्तं। यदापि बाह्यकरणानुग्राहकाणामादित्यादिज्योतिषां भावस्तदाप्यादित्यादिज्यो ११

तिषां परार्थत्वात्कार्यकारणसंघातस्याचैतन्ये स्वार्थानुपपत्तेः स्वार्थज्योतिष आत्मनोऽनुग्रहाभावे अयं कार्यकरणसंघातो न व्यव
हाराय कल्प्यते। आत्मज्योतिरनुग्रहेणैव सर्वदा सर्वसंव्यवहारो यदेतद्धृदयं मनश्चैतत्संज्ञानमित्यादिश्रुत्यंतरात् साभिमानो हि सर्वः
प्राणिसंव्यवहारोऽभिमानहेतुं च मरकतदृष्टांतेनावोचाम यद्यप्येवमेतत्तथापि जाग्रद्विषये सर्वकारणागोचरत्वादात्मज्योतिषो
बुद्ध्यादिबाह्याभ्यंतरकार्यकरणव्यवहारसन्निपातव्याकुलत्वान्न शक्यते तज्ज्योतिरात्माख्यं मुंजेषीकावन्निष्कृष्य दर्शयितुमि
त्यतः स्वप्ने दिदर्शयिषुः प्रक्रमते स समानः सन्नुभौ लोकावनुसंचरति यः स पुरुषः स्वयमेव ज्योतिरात्मा समानः सदृशः स
दृशः केन प्रकृतत्वात्संनिहितत्वाच्च हृदयेन हृदीत्विह हृच्छब्दवाच्या बुद्धिः प्रकृता सन्निहिता च। तस्मात्तयैव सामान्यं किं पुनः सा
मान्यमश्वमहिषवद्विवेकतोऽनुपलब्धिरवभास्याद्बुद्धिरवभासकं तदात्मज्योतिरालोकवदवभासकयोर्हि विवेकतोऽनुपलब्धिः
प्रसिद्धा विशुद्धत्वाद्ध्यालोकोऽवभास्येन सदृशो भवति यथा रक्तमवभासयन्रक्तसदृशो रक्ताकारो भवति। तथा हरितं नीलं लोहि
तं चावभासयन्नालोकस्तत्सदृशस्तत्स मानो भवति। तथा बुद्धिमवभासयन्बुद्धिद्वारेण कृत्स्नं क्षेत्रमवभासयतीत्युक्तं मरक
तमणिदर्शनेन तेन सर्वेण समानो बुद्धिसामान्यद्वारेण सर्वमय इति चात एव वक्ष्यति तेनासौ न कुतश्चित्प्रविविक्तो मुंजेषीकावत्स्वे
न ज्योतीरूपेण दर्शयितुं शक्यत इति सर्वव्यापारं तत्राध्यारोपान्नामरूपगतं ज्योतिर्धर्मो नामरूपयोः नामरूपे वात्मज्योतिषि स

वीलोको मोमुह्यते यमात्मा नायमात्मा तैर्वधर्मा नैवं धर्मा कर्ता कर्ता शुद्धोऽशुद्धः वद्धो मुक्तः स्थितो गतः आगतोऽस्ति नास्तीत्या
दिविकल्पैस्ततः समानः सन्नुभौ प्रतिपन्न [illegible] प्रतिपन्नव्याविद्धलोकपरलोकावुपात्तदेहेंद्रियादिसंघातत्यागान्योपादानसन्तान
प्रबंधन्यातसन्निपातैरनुक्रमेणसंचरति तत्रताव [illegible] न्तामरूपोपाधिसादृश्यं प्रत्रां
त्तिनिमित्तं यत्तदेव हेतुर्नस्वतद्रूपत्वेतदुच्यते। यस्मात्समानः सन्नुभौ लोकावनुक्रमेणसंचरति। तदेतत्प्रत्यक्षं दर्शयति। [illegible]
[illegible] यतो ध्यायतीव ध्यानव्यापारं करोतीव चिंतयतीव ध्यानव्यापारवतीं बुद्धिं तत्स्थेन चित्स्वभावज्योतीरूपेणावभा
सयन् तत्सदृशस्तत्समानः संध्यायतिवालोकवदेवालोकवतिचिंतयतीति भ्रांतिर्लोकस्य न तु परमार्थतो ध्यायति। तथा लेलायतीव
वात्यर्थं चलतीव तेष्वेव करणेषु बुद्ध्यादिषु वायुषु च चलत्सु तदवभासकत्वात्तत्सदृशत्वं तदिति लेलायतीव न तु परमार्थतश्चलन
धर्मकं तदात्मज्योतिः कथं पुनरेतदवगम्यते। तत्समानत्व भ्रांतिरेवैहिकलोकसंचरणादिहेतुर्नस्वतद्रूपत्वस्यार्थस्य प्रदर्शनायहे
तुरुपदिश्यते आत्मा हि यस्मात्स्वप्नो भूत्वा स यया धिया समानः सा धीर्यद्यद्भवति। तत्तदसावपितवतीं तस्माद्यदासौ स्वप्नो भव
तुरुपदिश्यते ... स्वप्नवृत्तिं प्रतिपद्यते धीस्तदा सोऽपि स्वप्नवृत्तिं प्रतिपद्यते। यदा धीर्जिजागरिषति तदासावप्यतः स्वप्नो भूत्वा स्वापवृत्ति
मवभासयन्धियः स्वापवृत्त्याकारो भूत्वा इमं लोकं जागरितं व्यवहारलक्षणं कार्यकरणसंघातात्मकं लौकिकशास्त्रीय ११९

व्यवहारास्पदमतिक्रामत्यतीत्यक्रामति विविक्तेन [illegible] स्वेनात्मज्योतिषा तं स्वप्नात्मिकं धीवृत्तिं वै मे भासयन्नवतिष्ठते। यस्मा
त्स्वयं ज्योतिः स्वभाव एवासौ विशुद्धः सन् कर्तृक्रियाकारकफलशून्यः परमार्थतो धीसादृश्यमेव तु नूलयलोकसंचारादिसंव्यव
हारभ्रांतिहेतुर्मृत्योरूपाणि मृत्युः कर्माविद्यादिर्न्नतस्यान्यद्रूपं स्वतः कार्यकरणान्येवास्य रूपाण्येतत्तानि मृत्यो रूपाण्यति
क्रामति। क्रियाफलाश्रयाणि। ननु नास्त्येव धियासमानान्यो धियो वभासको ज्योतिरात्मा धीव्यतिरेकेण प्रत्यक्षेण वानुमाने
न वानुपलंभात्सद्यथान्यात त्वाल एवद्धितीयाधीर्यत्त्ववभास्यावभासकयोरन्यत्वेपि विवेकानुपलंभात्सादृश्यमिति घटाद्यालोक
यो ... न्यत्वेनालोकस्योपलंभात् घटादेः संश्लिष्टयोः सादृश्यं भिन्नयोरेव नवत यथेहघटादेरिव धियोवभासकं ज्योतिः
रंतरं प्रत्यक्षेण वानुमानेन वोपलभामहे धीरेव हि चित्स्वरूपावभासकत्वेन स्वाकारा विषयाकारा च तस्मान्नानुमानतो नापि प्र
त्यक्षतो धियोवभासकं ज्योतिः शक्यते प्रतिपादयितुं व्यतिरिक्तं यदपि दृष्टांतरूपमभिहितमवभास्यावभासकयोर्भिन्नयोरेव ग्राह्यग्राहक
घटाद्यालोकयोः संयुक्तयोः सादृश्यमिति तत्राप्यभ्युपगममात्रमस्माभिरुक्तं न त त्र घटाद्यवभासको भिन्नो परमार्थतस्तु
घटादिरेवावभासात्मकः सालोको न्योन्योहि घटादिरूपघटे विज्ञानमात्रमेव सालोकघटादिविषयाकारमवभासते। यदेवं
तदानवाह्योदृष्टांतोस्ति विज्ञानलक्षणमात्रत्वात्सर्वस्य एवं तस्येव विज्ञानस्य ग्राह्यग्राहकारता मलं परिकल्प्यत स्येव पुन

षट्

विशुद्धं परिकल्पयंतितत्र ग्राह्यग्राहकविनिर्मुक्तंविज्ञानंस्वच्छीभूतंक्षणिकंव्यवतिष्ठतइतिकेचित्तस्यापिज्ञांतिंकेचिदि
छंतिअन्येतदपिविज्ञानंसांवृतंग्राह्यग्राहकांशविनिर्मुक्तंशून्यमेवघटादिवाह्यवस्तुवदित्यपरेमाध्यमिकाआवक्षतेसर्व ये
एताःकल्पनाबुद्धिविज्ञानावभासकस्यव्यतिरिक्तस्यात्मनोतिषोपद्भवादस्यश्रेयोमार्गस्यप्रतिपक्षभूतावैदिकस्यतत्रेषां
वाह्योर्थोस्तितान्प्रत्युच्यते।ननावत्स्वात्मा वभासकत्वं घटादेः।तमस्यवस्थितोघटादिस्तावन्नकदाचिदपिस्वात्मनावभा
स्यते।प्रदीपाद्यालोकसंयोगेतुनियमेनैवावभास्यमानोदृष्टःसंश्लिष्टयोरपिघटालोकयोरन्यत्वमेवपुनःपुनःसंश्लेषविश्ले
षेवविशेषदर्शनान्।रज्जुघटयोरिवान्यत्वेचव्यतिरिक्तावभासकत्वंनस्वात्मनेवस्वमात्मानमवभासयति।ननुप्रदीपःस्वा
त्मानमेवावभासयंदृष्टइतिनहिघटादिरिवप्रदीपदर्शनायप्रकाशांतरमुपादत्तेलोकिकास्तस्मात्प्रदीपःस्वात्मानंप्रकाशयति
नावभास्यत्वाविशेषात्यद्यपिप्रदीपोन्यस्यावभासकःस्वयमवभासात्मकत्वात्तथापिव्यतिरिक्तचेतत्वावभास्यत्वंनव्यभि
चरतिघटादिवदेवयदाचैवंतदाव्यतिरिक्तावभास्यत्वंतावदवश्यंभाविननुयथाघटश्चेतन्यावभास्यत्वेपिव्यतिरिक्तमालो
कांतरमपेक्षतेनचैवंप्रदीपोन्यमालोकांतरमपेक्षते।तस्मात्प्रदीपोन्यावभास्योपिसन्नात्मानंचावभासयति।नस्वतःपरतोवा
विशेषात्तावान्।यथाचेतन्यावभास्यत्वंघटस्यतथाप्रदीपस्यापिचेतन्यावभास्यत्वमविशिष्टं।यत्तूच्यते।प्रदीपआत्मानंचा

११२ ११२

घ०२

वभासयतीतितदसत्।कस्माद्यदात्मानंनावभासयतितदाकीदृशःस्यात्।नहितदाप्रदीपस्यस्वतोवापरतोवाविशेषःकश्चि
दुपलभ्यतेसहिनाभ्यवभास्योभवति।यस्यावभासकसन्निधावसंन्निधोचविशेषउपलभ्यते।नहिप्रदीपस्यस्वात्मसंनिधिर
ग्रा संनिधिर्वाक्वचःकल्पयितुमस्तितिचकादाचित्कविशेषआत्मानंप्रदीपःप्रकाशयतीतिमृषैवोच्यतेचेतन्यग्राह्यत्वंतुघटादिभिर
विशिष्टंतस्माद्विज्ञानस्यात्म ग्राह्यग्राहकत्वेनप्रदीपोदृष्टांतश्चेतन्यग्राह्यत्वंचविज्ञानस्यवाह्यविषयेरविशिष्टंचेतन्यग्राह्य
त्वेचविज्ञानस्याकिंग्राह्यविज्ञानग्राह्यंनैवकिंवाग्राहकविज्ञानग्राह्यतेति।तत्रसंदिह्यमानेवस्तुनियथान्यत्रदृष्टोन्यायःकल्प
यितुंयुक्तोनतुदृष्टविपरीतस्तथावसतिव्यतिरिक्तेनैवग्राहकेणवाह्यानांप्रदीपादीनांग्राह्यत्वंदृष्टंतथाविज्ञानस्यापिचेतन्यग्रा
क ह्यत्वात्प्रकाशत्वेसत्यपिप्रदीपवद्व्यतिरिक्तचेतन्यग्राह्यत्वंयुक्तंकल्पयितुंनत्वनन्यग्राह्यत्वं।यत्त्वान्योविज्ञानस्यग्रहीतासत्रा
त्मात्मातिरंतरंविज्ञानात्।तदानवस्थेतिचेत् न ग्राह्यत्वमात्रंहितद्ग्राहकस्यवस्त्वंतरत्वेलिंगमुक्तंन्यायतोनत्वेकांतग्राहक
त्वितद्ग्राहकांतरास्तित्वेवाकदाचिदपिलिंगंभवति।तस्मान्नतदनवस्थाप्रसंगोविज्ञानस्यव्यतिरिक्तग्राह्यत्वेकरणांतरापेक्षा
यामनवस्थेतिचेन्ननियमाभावान्नहिसर्वत्रायंनियमोभवतियत्रवस्त्वंतरेणगृह्यतेवस्त्वंतरंतत्रग्राह्यग्राहकव्यतिरिक्तंकरणां
तरंस्यादितिनैकांतेननियंतुंशक्यतेवैचित्र्यदर्शनात्कथंघटस्तावदात्मव्यतिरिक्तेनग्राहकेणगृह्यते।तत्रप्रदीपादिरालोके

क

ग्राह्यग्राहकव्यतिरिक्तंकरणंनहिप्रदीपाद्यालोकोघटादेश्चवस्तुरंजकोवा।घटवद्वस्तुर्ग्राह्यत्वेपिप्रदीपस्यवस्तुःप्रदीपव्यति
रेकेणनचवाह्यमालोकस्थानीयंकिंचित्करणांतरमपेक्षतेतस्मान्नैवनियंतुंशक्यतेयत्रयत्रव्यतिरिक्तग्राह्यत्वंतत्रतत्रक
रणांतरस्यादेवेति।तस्माद्विज्ञानस्यव्यतिरिक्तग्राहकग्राह्यत्वेनकरणद्वारानवस्थानापिग्राहकद्वाराकदाचिदप्युपपादयितुं
शक्यतेतस्मात्सिद्धंविज्ञानव्यतिरिक्तंबाह्यमर्थांतरमिति।ननुनास्त्येवबाह्योर्थोघटादिःप्रदीपोवाविज्ञानव्यतिरिक्तोयद्
व्यतिरेकेणनोपलभ्यतेतत्तन्मात्रंवस्तुदृष्टंयथास्वप्नविज्ञानग्राह्यंघटपटादिवस्तुस्वप्नविज्ञानव्यतिरेकेणानुपलंभात्स्व
प्नघटप्रदीपादिःस्वप्नविज्ञानमात्रतावगम्यतेतथाजागरितेपिघटप्रदीपादेर्जाग्रद्विज्ञानव्यतिरेकेणानुपलंभाज्जाग्रद्विज्ञानमा
त्रतैवयुक्तंवक्तुं।तस्मान्नास्तिबाह्योर्थोघटप्रदीपादिर्विज्ञानमात्रमेवतुसर्वंतस्मादुक्तंविज्ञानस्यव्यतिरिक्तावभासत्वात्
विज्ञानव्यतिरिक्तमस्तिबाह्यमर्थांतरंघटादेरिवेतितन्मिथ्यासर्वस्यविज्ञानमात्रत्वेदृष्टांताभावात्।नयावत्तावदभ्युपगमात्ननु
बाह्योर्थोस्तिवक्तैकांतेनैवनाभ्युपगम्यते।ननुमयानाभ्युपगम्यतएवनविज्ञानंघटःप्रदीपइतिविज्ञानाद्व्यार्थपृथक्त्वाययावत्ताव
दपिबाह्यमर्थांतरमवश्यमभ्युपगंतव्यंविज्ञानादर्थांतरंवस्तुनवदभ्युपगम्यतेविज्ञानंघटःपटइत्येवमादिनांशब्दानामेका
र्थत्वेपर्यायशब्दत्वंप्राप्नोतितथासाधनानांफलस्यचैकत्वेसाध्यसाधनभेदोपदेशशास्त्रस्यानर्थक्यप्रसंगस्तत्कर्तृज्ञानप्रसं ११३

गोवाकिंवाभ्युपेत्यविज्ञानव्यतिरेकेणवादिप्रतिवादिवाददोषाभ्युपगमात्नर्हिविज्ञानमात्रमेववादिप्रतिवादिवाद स
दोषोवाभ्युपगम्यतेनिराकर्त्तव्यत्वात्प्रतिवाद्यादीनांनह्यात्मीयंविज्ञानंनिराकर्त्तव्यमभ्युपगम्यतेस्वयंवात्माकस्यचिन्नयोस च
तिसर्वसंव्यवहारलोपप्रसंगोनचप्रतिवाद्यादयःस्वात्मनैवगृह्यंतइत्यभ्युपगमःव्यतिरिक्तग्राह्याहितेभ्युपगम्यतेतस्मा
त्तद्वत्सर्वमेवव्यतिरिक्तग्राह्यंवस्तुजाग्रद्विषयत्वात्।जाग्रद्वस्तुप्रतिवाद्यादिवदितिसुलभोदृष्टांतःसंतानांतरवद्विज्ञा नान्त
रवच्चेति।तस्माद्विज्ञानवादिनापिनशक्यंविज्ञानव्यतिरिक्तमर्थांतरंनिराकर्तुंस्वप्नेविज्ञानव्यतिरेकाभावादयुक्तमितिचेन्ना
भावादपिभावस्यवस्त्वंतरत्वोपपत्तेर्यथैवतावत्स्वप्नेघटादिविज्ञानस्यभाव त्वमभ्युपगतंतदभ्युपगम्यतद्व्यतिरेकेण
घटाद्यभावउच्यतेसविज्ञानविषयोघटादिर्यद्यभावोयदिवाभावःस्यादुभयथापिघटादिविज्ञानस्यभावभूतत्वमभ्युपगतमेव
ननुतन्निवर्त्तयितुंशक्यतेतन्निवर्तकन्यायाभावात्।एतेनसर्वस्यशून्यताप्रत्युक्ताप्रत्यगात्मग्राह्यतावात्मनोहमितिमीमां
सकपक्षःप्रत्युक्तःयत्तूक्तंसालोकोन्यस्थान्यस्थघटोजायतइतितदसल्लक्षणांतरेपिसएवायंघटइतिप्रत्यभिज्ञानात्सादृश्या
न्प्रत्यभिज्ञानंकृतोस्थितकेशनखादिष्विवेतिचेन्नतत्रापिक्षणिकत्वस्यासिद्धत्वाज्जात्येकत्वाच्च[illegible]षुपुनरुच्छितेषुवके

ब्र

शानखादिषु केशानखत्वजाते रेकत्वात्केशानखत्वप्रत्ययस्तन्निमित्तोऽभ्रांत एवनदिदृश्यमानलूनछितकेशनखादिषुव्य
क्तिनिमित्तःस्त एवेतिप्रत्ययो भवति। कस्यचित्दीर्घकालव्यवहितदृष्टेषु च तुल्यपरिमाणेषु तत्कालीनवालादितुल्याइतिप्रत्य
यो भवति न तु त एवेति। घटादिषु पुनर्भवति स एवेति प्रत्ययस्तस्मान्न समो दृष्टांतः प्रत्यक्षेण हि प्रत्यभिज्ञायमाने वस्तुनि तदेवेति
नवान्यत्वमनुमातुंयुक्तं प्रत्यक्षविरोधे लिंगस्याभासत्वोपपत्तेः सादृश्यप्रत्ययानुपपत्तेश्च ज्ञानस्य हि क्षणिकत्वादेकस्य हि वस्तु
दर्शिनो वस्त्वंतरदर्शने सादृश्यप्रत्ययः स्यात् ननु वस्तुदर्शयैको वस्त्वंतरदर्शनाय क्षणांतरमवतिष्ठते विज्ञानस्य क्षणिकत्वात्स
कृद्वस्तुदर्शनेनैव क्षयोपपत्तेः तेनेदं सदृशमिति हि सादृश्यप्रत्ययो भवति। तेनेति दृष्टस्मरणमिदमिति। वर्त्तमानप्रत्ययस्तेने
ति दृष्टं स्मृत्वा यावदिदमिति वर्त्तमानक्षणकालमवतिष्ठते ततः क्षणवादहानिरथ तेनेत्येवोपक्षीणः स्मार्त्तप्रत्ययः इदमिति चा
न्य एव वार्त्तमानिकः प्रत्ययः क्षीयते। ततः सादृश्यप्रत्ययानुपपत्तिस्तेनेदं सदृशमिति। अनेकदर्शिन एकस्याभावाद्व्यपदेशा
नुपपत्तिश्च दृष्टव्यदर्शिनैवोपक्षयाद्विज्ञानसादृष्टमदो द्राक्षमिति व्यपदेशानुपपत्तिर्दृष्टवतो व्यपदेशक्षणानवस्थानात् अ
थावतिष्ठेत क्षणवादहानिरथादृष्टवतो व्यपदेशः सादृश्यप्रत्ययश्च तदानीं जात्यंधस्येव रूपविशेषव्यपदेशास्तत्सादृश्यप्रत्य
१४ यश्च सर्वमिंधप [illegible] रंपरेति प्रसज्येत सर्वज्ञशास्त्रप्रणयनादि न चैतदिष्यते। अकृताभ्यागमकृतप्रनाशादोषौ तु प्रसिद्धतरौ क्षण ११४

व

वादे। दृष्टव्यपदेशहेतुः पूर्वोत्तरसहितः एक एव स्खलावत्प्रत्य योजायत इति चेत् तेनेदं सदृशमिति च वर्त्तमानातीतयो
र्भिन्नकालत्वात् तत्र वर्त्तमानप्रत्यय एकः स्खलावयवस्थानीयोऽतीतश्च तौ प्रत्ययौ भिन्नकालौ तदेतदुभयप्र
त्ययविषयस्य कुर्वेत्स्खलाप्रत्ययस्ततः क्षणद्वयव्यापित्वादेकस्य विज्ञानस्य पुनः क्षणवादहानिर्ममतवतादि
विशेषानुपपत्तेश्च सर्वसंव्यवहारलोपप्रसंगः सर्वस्य वस्तु संवेद्य विज्ञानमात्रत्वे विज्ञानस्य च स्वच्छावबोधावभासमात्रस्वा
भाव्याभ्युपगमात् द्वन्द्वनिष्ठान्यस्याभावेऽनित्यदुःखशून्यात्मत्वाद्यनेककल्पनानुपपत्तिर्न च दाडिमादेरिव विरुद्धानेकांशवत्वं
विज्ञानस्य स्वच्छावभासस्वाभाव्यात् विज्ञानस्यानित्यदुःखादीनां विज्ञानांशत्वे च सत्यनुभूयमानत्वाद्व्यतिरिक्तविष
यत्वप्रसंगः यथानित्यदुःखाद्यात्मैकत्वमेव विज्ञानस्य तदा तद्वियोगाद्विशुद्धिकल्पनानुपपत्तिः स्वसंयोगिमलवियोगा
यव द्विशुद्धिर्भवति यथादर्शप्रभृतीनां न तु स्वाभाविकेन धर्मेण कस्यचिद्वियोगो दृष्टो न ह्यग्नेः स्वाभाविकेन प्रकाशेनौष्ण्येन वावि
योगो दृष्टो यदपि पुष्पगुणानां रक्तत्वादीनां द्रव्यांतरयोगेन वियोजनं दृश्यते तत्रापि संयोगपूर्वकत्वमनुमीयते बीजभावन
या पुष्पफलादीनां गुणांतरोत्पत्तिदर्शनात् अतो विज्ञानस्य विशुद्धिकल्पनामुपपत्तिर्विषयविषय्याभासत्वचयन्मलं परिकल्प्य

तेविज्ञानस्य तदप्यन्यसंसर्गित्वादनुपपन्नं नह्यविद्यमानेन विद्यमानस्य संसर्गः स्यादसति चान्यसंसर्गे योधर्मो यस्य दृष्टः
स तत्स्वभावत्वान्न तेन वियोगमर्हति। यथाग्नेरौष्ण्यं सवितुर्वा प्रकाशस्तस्मादन्यसंसर्गे न मलिनत्वं तद्विशुद्धिश्च विज्ञानस्य
तीयं कल्पनांधपरंपरैव प्रमाणशून्येत्यवगम्यते। यदपि तस्य विज्ञानस्य निर्वाणं पुरुषार्थं कल्पयति। तत्रापि फलाश्रयानुपपत्तिः कंटकवि
कंटकवेधजनितदुःखनिवृत्तिः फलं न तु कंटकविद्धमरणे तद्दुःखनिवृत्तिफलस्याश्रय उपपद्यते। तद्वत्सर्वनिर्वाणेऽसति च फ
लाश्रये पुरुषार्थकल्पना व्यर्थैव। यस्य पुरुषशब्दवाच्यस्य विशुद्धिसत्त्वस्यात्मनो विज्ञानस्य चार्थः परिकल्प्यते तस्य पुनः पुरुषस्य नि
र्वाणे कस्यार्थः पुरुषार्थ इति स्यात्। यस्य पुनरस्त्यनेकार्थदर्शी। विज्ञानव्यतिरिक्त आत्मा तस्य दृष्टस्मरण दुःखसंयोगवियोगादि स ख
र्वमेवोपपन्नमन्यसंयोगनिमित्तं कालुष्यं तद्वियोगनिमित्ता च विशुद्धिरिति शून्यवादिपक्षस्तु सर्वप्रमाणविप्रतिषिद्ध इति।
तन्निराकरणाय नादरः क्रियते॥ ॥ यथैवेहैकस्मिन्देहे स्वप्नो भूत्वा मृत्यो रूपाणि कार्यकरणान्यतिक्रम्य स्वप्ने स्वात्मज्यो
तिष्यास्ते एवं स वै प्रकृतः पुरुषोयं जायमानः कथं जायमान इत्युच्यते शरीरं देहेन्द्रियसंघातमात्मत्वेन संपद्यमानः शरीरमात्म ११५
त्वमापद्यमान इत्यर्थः पाप्मभिः पाप्मसमवायिभिर्धर्माधर्माश्रयैः कार्यकरणैरित्यर्थः। संसृज्यते संयुज्यते। स एव उत्क्रा
मन् शरीरान्तरमूर्द्ध्वं त्क्रामन् म्रियमाण इत्येतस्य व्याख्यानमुत्क्रामन्निति तानेव संसृष्टान्पाप्मरूपान्कार्यकरणलक्ष

णान्विजहाति तैर्वियुज्यते तान्परित्यजतीत्यर्थः यथायं स्वप्नजागरितयोर्वर्तमान एवैकस्मिन्देहे पाप्मरूपकार्यकरणोपादानपरित्यागाभ्या
मनवरतं संचरति धियासमानः सन्तथासोयं पुरुष उभाविहलोकौ जन्ममरणाभ्यां कार्यकरणोपादानपरित्यागावनवरतं प्रतिपद्य
मान आ संसारमोक्षात्संचरति तस्मात्सिद्धमस्यात्मनो ज्योतिषोन्यत्वं कार्यकरणरूपेभ्यः पाप्मभ्यः संयोगवियोगाभ्यां न हि तद्धर्म
त्वे सति तैरेव संयोगो वियोगो वा युक्तः॥ ननु न स्तो द्वौ लोकौ यौ जन्ममरणाभ्यामनुक्रमेण संचरति स्वप्नजागरिते एव स्वप्नजा
गरिते तु प्रत्यक्षमवगम्येते न त्विहलोकपरलोकौ केनचित्प्रमाणेन तस्मादेते एव स्वप्नजागरिते इहलोकपरलोकाविति उच्यते।
तस्येतस्य पुरुषस्य द्वे एव स्थाने भवतो न तृतीयं चतुर्थं वा के ते इदं च यत्प्रतिपन्नं वर्तमानं जन्मशरीरेन्द्रियविषयवेदनाविशिष्टं
स्थानं प्रत्यक्षतोनुभूयमानं परलोक एव स्थानं परलोकस्थानं तच्च शरीरादिवियोगोत्तरकालानुभाव्यं ननु स्वप्नोपि परलोकस्थ
स्याद सति द्वे एवेत्यवधारणमयुक्तं॥ न। कथं तर्हि संध्यं तदिहलोकपरलोकयोर्यः संधिस्तस्मिन्भवं संध्यं यत्तृतीयं तत्स्वप्नस्थानं
न स्थानान्तरं तेन स्थानद्वित्वावधारणं न हि ग्रामयोः संधिस्तावेव ग्रामावपेक्ष्य तृतीयत्वपरिगणनमर्हति कथं पुनस्तस्य परलोक
स्थानस्यास्तित्वमवगम्यते यदपेक्ष्य स्वप्नस्थानं संध्यं भवेद्यतस्तस्मिन्संध्ये स्वप्नस्थाने तिष्ठन्भवन्वर्तमान एते उभे स्थाने पश्य
ति के ते उभे इदं च परलोकस्थानं च तस्मात्स्तः स्वप्नजागरितव्यतिरेकेण ते लोकौ यौ धियासमानः सन्ननुसंचरति जन्ममरणसंतान

प्रबंधेन कथं पुनः स्वप्ने स्थितः सन्नुभौ लोकौ पश्यतीति किमाश्रयः केन विधिनेत्युच्यते यथा कथं पश्यतीति शृणु यथाक्रम आक्र-
मत्यनेनेत्याक्रमः आश्रयोऽवष्टंभ इत्यर्थः यादृशेनाक्रमेणास्य सोऽयं यथाक्रमः अयं पुरुषः परलोकस्थाने प्रतिपत्तव्ये निमि-
त्ते यथाक्रमो भवति यादृशेन परलोकप्रतिपत्तिसाधनेन विद्याकर्मपूर्वप्रज्ञालक्षणेन युक्तो भवतीत्यर्थः तमाक्रमं परलो-
क […] स्थानायोन्मुखीभूतं प्राप्तांकुरीभावमिव बीजं तमाक्रममाक्रम्यावष्टभ्याश्रित्योभयान्पश्यतीति बहुवचनं धर्माधर्म-
फलानेकत्वादुभयानुभयप्रकारानित्यर्थः कांस्तान्पाप्मनः पापफलानि न तु पुनः साक्षादेव पाप्मनां दर्शनं संभवति तस्मात्पा-
११६ पफलानि दुःखानीत्यर्थः आनंदांश्च धर्मफलानि सुखानीत्येतानुभयान्पाप्मन आनंदांश्च पश्यति तान्जन्मांतरदृष्टवासना-
मया[…]निव प्रतिपत्तव्यजन्मविषयाणि क्षुद्रधर्माधर्मफलानि धर्माधर्मप्रयुक्तो देवतानुग्रहाद्वा पश्यतीति कथमवगम्यते प-
रलोकस्थानभावितत्पाप्मानंददर्शनं स्वप्न इत्युच्यते । यस्माद्दिहजन्मन्यननुभाव्यमपि पश्यति बहु तत्र स्वप्नानामपूर्व-
दर्शनं पूर्वदृष्टस्मृतिर्हि स्वप्नः प्रायेण तेन स्वप्नजागरितस्थानव्यतिरेकेणास्ति उभौ लोकौ यदादित्यादिबाह्यज्योतिषामभावेऽयं
कार्यकरणसंघातः पुरुषो येन व्यतिरिक्तेनात्मना ज्योतिषा व्यवहरतीत्युक्तं तदेव नास्ति यदादित्यादिज्योतिषामभावगमनं यत्रे ११६

से

दं विविक्तं स्वयंज्योतिरूपलभ्येत येन सर्वदेवायं कार्यकरणसंघातः संसृष्ट एवोपलभ्यते तस्मादसत्समोऽसन्नेव वा स्वेन विविक्ते-
न स्वभावेन ज्योतीरूपेणात्मेति अथ क्वचिद्विविक्तः स्वेन ज्योतिरूपेणोपलभ्येत बाह्याध्यात्मिकभूतभौतिकसंसर्गशून्यस्ततो
यथोक्तं सर्वं भविष्यतीति तदर्थमाह । स यः प्रकृत आत्मा यत्र यस्मिन्काले प्रस्वपिति प्रकर्षेण स्वापमनुभवति तदामुपादानः केन विधि- कि
ना प्रस्वपितीति संध्यं स्थानं प्रतिपद्यत इत्युच्यते । अस्य दृष्टस्य लोकस्य जागरितलक्षणस्य सर्वावतः सर्वमवतीति सर्वावान् यं लो-
कः कार्यकरणसंघातो विषयवेदनासंयुक्तः सर्वावत्त्वमस्य व्याख्यातमन्नत्रयप्रकरणे अथो यं वा आत्मेत्यादिना सर्वावान्भूत-
भौतिकमात्रा अस्य संसर्गकारणभूता विद्यंत इति सर्ववान् सर्ववानेव सर्वावान् तस्य सर्वावतो मात्रामेकदेशमवयवमपादाया-
पच्छिद्यादाय गृहीत्वा दृष्टवस्तुवासनावासितः सन्नित्यर्थः स्वयमात्मनैव विहत्य देहं पातयित्वा निःसंबोधमापाद्य जागरि-
ते ह्यादित्यादीनां चक्षुरादिष्वनुग्रहो देहव्यवहारार्थो देहव्यवहारश्चात्मनो धर्माधर्मफलोपभोगप्रयुक्तस्तद्धर्माधर्मफलोपभो-
गोपरमणमस्मिन्देहे आत्मकर्मोपरमकृतमित्यात्मास्य विहंतेत्युच्यते । स्वयं निर्माय निर्माणं कृत्वा वासनामयं स्वप्नदेहं माया-
मयमिव निर्माणमपि तत्कर्मापेक्षत्वात्स्वयं कर्तृकमुच्यते । […] स्वेनात्मीयेन भासोपादानलक्षणेन भासा दीप्त्या
प्रकाशेन सर्ववासनात्मकेनांतःकरणवृत्तिप्रकाशेनेत्यर्थः सा हि तत्र विषयभूता सर्ववासनामयी प्रकाशते सा तत्र स्वयंज्ञाउच्यते

त्रो

तेनस्वेनभासा विषयभूतेनस्वेनचज्योतिषा तद्विषयेणाविविक्तरूपेणानुभूतदृक्स्वभावेनतद्भासारूपंवासनात्मकंविषयीकुर्वन्प्रस्व
पितियदेवंवर्त्तनंतत्प्रस्वपितीत्युच्यतेअत्रैतस्यामवस्थायामेतस्मिन्कालेयंपुरुषःआत्मास्वयमेवविविक्तज्योतिर्भवतिबाह्याध्या।
त्मिकभूतभौतिकसंसर्गरहितंज्योतिर्भवतिनन्वस्यलोकस्यमात्रोपादानंकृतंकथंतस्मिन्सत्यत्रायंपुरुषःस्वयंज्योतिर्भवती
त्युच्यतेनैषदोषोविषयभूतमेवहितत्तेनेवंत्रायंपुरुषःस्वयंज्योतिर्दर्शयितुंशक्योन्यथासतिविषयेकस्मिंश्चिन्सुषु
प्तकालइवयदापुनःसावासनाभिव्यक्ताविषयभूताउपलभ्यमानाभवति।तदासिःकोशादिवनिष्कृष्टंसर्वसंसर्गरहितंचक्षुरा
दिकार्यकरणव्यावृत्तस्वरूपमलुप्तदृगात्मज्योतिःस्वेनरूपेणावभासयन्गृह्यतेतेनात्रायंपुरुषःस्वयंज्योतिर्भवतीतिसिद्धं।
नन्वत्रकथंपुरुषःस्वयंज्योतिर्येनजागरितमिवग्राह्यग्राहकादिलक्षणःसर्वोव्यवहारोदृश्यते।चक्षुराद्यनुग्राहकश्चादित्य
द्यालोकास्तथैवदृश्यते।यथाजागरिते।तत्रकथंविशेषावधारणंक्रियतेत्रायंपुरुषःस्वयंज्योतिर्भवतीत्युच्यतेवैलक्ष
ण्यात्स्वप्नदर्शनस्यजागरितेहीन्द्रियबुद्धिमनआलोकादिव्यापारसंकीर्णमात्मज्योतिरिहतुस्वप्नइन्द्रियाभावात्तदनुग्राहकादि
त्याद्यालोकाभावाच्चविविक्तंकेवलंभवतितस्माद्विलक्षणं।ननुतथैवविषयाउपलभ्यंतेस्वप्नेपियथाजागरितेतत्रकथमिन्द्रिया
भावोद्विलक्षण्यमुच्यतइति।शृणुनतत्रविषयाःस्वप्नेरथादिलक्षणास्तथानरथयोगाःरथेयुज्यंतइति रथयोगाअश्वादयस्त ११७

वि

ज्यते।

प३

त्रविद्यतेनचपंथानोरथमार्गाभवंत्यथरथान्रथयोगान्पथःसृजतेस्वयंकथंपुनःसृजतेरथादिसाधनानांवृक्षादीनाम
भावेनन्वुक्तमस्यलोकस्यसर्वावतोमात्रामपादायस्वयंनिर्मायेत्यतःकरणवृत्तिरस्यलोकस्यवासनामात्रामपादायरथादिवा
सनारूपांतत्करणवृत्तिस्तदुपलब्धिनिमित्तेनकर्मणा चोद्यमानादृश्यत्वेनव्यवतिष्ठतेतदुच्यतेस्वयंनिर्मायेतितदेवाहरथादी
न्सृजतइति ननुतत्रकरणंवाकरणानुग्राहकाणिवाआदित्यादिज्योतींषितदवभासकानिविषयाविद्यंते।तद्वासना
मात्रंतुकेवलंतदुपलब्धिनिमित्तकर्मचोदितोद्भूतान्तःकरणवृत्त्याश्रयंदृश्यतेतद्यस्यज्योतिषोदृश्यतेऽलुप्तदृशस्तदात्मज्योतिरत्र
केवलमसिरिवकोशाद्विविक्तंतथानतत्रानंदाःसुखविशेषाःमुदोहर्षाःपुत्रादिलाभनिमित्ताःप्रमुदस्तएवप्रकर्षोपेताःअथ
चानंदादीन्सृजतेतथानतत्रवेशांताःपल्वलाःपुष्करिण्यस्तडागाःस्रवन्त्योनद्योअथवेशांतादीन्सृजतेवासनामात्ररूपान् भवंति च
यस्मात्सहिकर्त्तातद्वासनाश्रयचित्तवृत्त्युद्भवनिमित्तकर्महेतुत्वेनेत्यवोचामतस्यकर्तृत्वं।ननुसाक्षादेवतत्रक्रियासंभवंमि
साधनाभावान्नहिकारकमंतरेणक्रियासंभवतिनचहस्तपादादीनितत्रक्रियाकारकाणिसंभवंतियत्रतुतानिविद्यंतेतत्रजागरितेत
त्रात्मज्योतिरवभासितैःकार्यकरणैरथादिवासनाश्रयांतःकरणवृत्त्युद्भवनिमित्तंकर्मनिर्वर्त्यतेतेनोच्यतेसहिकर्त्तेति तदुक्तमा
त्मनेवायंज्योतिषास्तेपल्ययते कर्मकुरुतइति।तत्रापिनपरमार्थतःस्वतःकर्तृत्वंचैतन्यज्योतिषोवभासकत्वव्यतिरेकेणयत्

तन्यात्मज्योतिषांतःकरणद्वारेणावभासयति कार्यकरणानि तदवभासितानि कर्म्मसु व्याप्रियंते कार्यकरणानि। तत्र कर्तृत्वमुपच
र्यत आत्मनः। तदुक्तं ध्यायतीव लेलायतीवेति तदेवानूद्यते स हि कर्त्तेति। हिदे[illegible]त्यर्थे तदेतस्मिन्नुक्तेर्थे एते श्लोका मंत्रा भवंति। स्वप्नेन स्व
भावेन शारीरं शरीरमभिप्रहत्य निश्चेष्टमापाद्य सुप्तः स्वयमलुप्तदृगादिशक्तिस्वाभाव्यात्सुप्तान्वासनाकारोद्भूतानन्तः
करणवृत्त्याश्रयान्बाह्याध्यात्मिकान्सर्वानेव भावान्स्वेन रूपेण प्रत्यस्तमितान्सुप्तानभिचाकशीति अलुप्तयात्मदृष्ट्या प
श्यत्यवभासयतीत्यर्थः। शुक्रं शुद्धं ज्योतिष्मदिंद्रियमात्रारूपमादाय गृहीत्वा पुनः कर्म्मणा जागरितस्थानमेत्यागच्छति। हि
११८ रण्मयो हिरण्मय इव चैतन्यज्योतिःस्वभावः पूरुषः पुरुषः एकहंसः एक एव हंतीत्येकहंसः। एको जाग्रत्स्वप्ने
हलोकपरलोकादीन्गच्छतीत्येकहंसः। तथा प्राणेन पंचवृत्तिना रक्षन्परिपालयन्नन्यथा मृतभ्रांतिः स्यादवरं निकृष्टमने
काशुचिसंघातत्वादत्यंतबीभत्सं कुलायं नीडं शरीरं स्वयं तु बहिस्तस्मात्कुलायाच्चरित्वा यद्यपि शारीरस्थ एव स्वप्नं
पश्यति तथापि तत्संबंधाभावात्तत्स्थ इवाकाशवद्बहिश्चरित्वेत्युच्यते। अमृतः स्वयममरणधर्म्मीयते गच्छति यत्र कामं
यत्र कामो विषयेषूद्भूतवृत्तिर्भवति तं तं कामं वासनारूपेणोद्भूतं गच्छति। किं च स्वप्नांते स्वप्नस्थाने उच्चावचमुच्चं देवत्वादिभाव ११८
मवचं तिर्यगादिभावं निकृष्टं तदुच्चावचमीयमानः गम्यमानो रूपाणि देवो द्योतनावान्कुरुते निर्वर्त्तयति वासनारूपाणि बहून्य

संख्येयानि उतापि स्त्रीभिः सह मोदमान इव जक्षदिव हसन्निव वयस्यैरुत इवापि भयानि विभ्ये सिंहव्याघ्रादीनि पश्यं
निव। आराममारमणमाक्रीडामनेन निर्मितां वासनारूपामस्यात्मनः पश्यंति सर्वे जनाः। ग्रामं नगरं स्त्रियमन्नाद्यमित्यादि
वासनानिर्मितमाक्रीडनरूपं। न तं पश्यति तं न पश्यति कश्चन कष्टं भो वर्त्तते अत्यंतविविक्तं दृष्टिगोचरापन्नमप्यहो भा
ग्यहीनता लोकस्य यच्छक्यदर्शनमप्यात्मानं न पश्यंतीति लोकं प्रत्यनुक्रोशं दर्शयति श्रुतिरत्यंतविविक्तः स्वयंज्योतिरात्मा
स्वप्ने भवतीत्यभिप्रायस्तं नायतं बोधयेदित्याहुः प्रसिद्धिरपि लोके विद्यते। स्वप्नआत्मज्योतिषो व्यतिरिक्तत्वे कासौ तमात्मानं सु
प्तमायतं सहसा भृशं न बोधयेदित्याहुरेवं कथयंति चिकित्सकादयो जना। लोके नूनं ते पश्यंति जाग्रद्देहादिंद्रियद्वारतोपसृत्य
केवलो बहिर्वर्त्तत इति यत आहुस्तन्नायतं बोधयेदिति तत्र च दोषं पश्यंति भृशं ह्यसौ बोध्यमानस्तानींद्रियद्वाराणि सहसा प्र
तिबुध्यमानो न प्रतिपद्यत इति तदेतदाह। दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यते यमिंद्रियद्वारदेशं यस्माद्देशाच्छुक्रमादाया
पसृतः तं यमिंद्रियदेशमेष आत्मा पुनर्न प्रतिपद्यते कदाचिद्व्यत्यासेनेंद्रियमात्राः प्रवेशयति तत्रांध्यबाधिर्यादिदोषप्रा
प्तौ दुर्भिषज्यं दुःखभिषक्कर्मता ह। अस्मै देहाय भवति दुःखेन चिकित्सनीयो सौ देहो भवतीत्यर्थः। तस्मात्प्रसिद्ध्यापि स्व
प्ने स्वयंज्योतिष्ट्वमस्य गम्यते यस्मात्स्वप्ने जाग्रद्व्यतिक्रांतो मृत्युरूपाणीति तस्मात्स्वप्ने स्वयंज्योतिरात्मा अथो अपि खल्व

२

पद ३ न्य आहुः तं जागरितदेश एवास्यैषः यः स्वप्नो न संध्यस्थानं तैर्मिहलोकपरलोकाभ्यां व्यतिरिक्तं किं तर्हि इहलोक एव जागरि
तदेशो। यद्येवं किं चातः श्रृणु अतो यद्भवति यदा जागरितदेश एवायं स्वप्नस्तदायमात्मा कार्यकरणेभ्यो न व्यावृत्तस्तैर्मिश्रीभू
तो तेन स्वयंज्योतिरात्मेत्यतः स्वयंज्योतिष्ट्वबाधनायान्य आहुः जागरितदेश एवास्यैष इति तत्र च हेतुमाचक्षते जागरित
देशत्वे यानि हि यस्माद्धस्त्यादीनि पदार्थजातानि जाग्रज्जाग्रतितदृशे पश्यति लौकिकस्तान्येव सुप्तोऽपि पश्यतीति तदसन्न इं
२ द्रियोपरमाद्धुपरतेषु हि इंद्रियेषु स्वप्नान्पश्यति। तस्मान्नान्यस्य ज्योतिषस्तत्र संभवोऽस्ति [illegible] न तत्र रथा न रथयोगा इत्या
दि [illegible] द्वायं पुरुषः स्वयंज्योतिर्भवत्येव स्वयंज्योतिरात्मास्तीति स्वप्ननिदर्शनेन प्रदर्शितिम [illegible] कामति मृत्यो रूपाणीति
च क्रमेण संचरन्निहलोकपरलोकादिव्यतिरिक्तः तथा जाग्रत्स्वप्नकुलायाभ्यां व्यतिरिक्तस्तत्र च क्रमसंचारान्नित्यश्चेत्येत
त्प्रतिपादितं याज्ञवल्क्येन अतो विद्यानिष्क्रयार्थं सहस्रं ददामीत्याह जनकः सोऽहमेवं बोधितस्त्वया भगवंस्तुभ्यं सहस्रं
ददामि [illegible] क्षस्य कामप्रश्नो मयाभिप्रेतस्तदुपयोग्ययं नादर्थ्यात्तस्य कदेश एवात्वान्नियोऽस्याभिः समस्तकामप्रश्ननिर्ण
यश्रवणेन मोक्षायात ऊर्ध्वं ब्रूहि येन संसाराद्विप्रमुच्येयं त्वत्प्रसादाद्विमोक्षपदार्थैकदेशनिर्णयाहेतोः सहस्रदानं। यत्प्र
स्तुतमात्मनैवायं ज्योतिषास्त इति तत्प्रत्यक्षतः प्रतिपादितमत्रायं पुरुषः स्वयंज्योतिर्भवतीति स्वप्ने यदुक्तं स्वप्नो भूत्वेमं लोक ११२

मतिक्रामति मृत्यो रूपाणीति तत्रैतदाशंक्यते मृत्यो रूपाण्येवातिक्रामति न मृत्युं [illegible] संघातस्य स्वप्ने कार्यकरणव्यावृत्तस्या
पि मोक्षासादिदर्शनं तस्मान्नूनं नैवायं मृत्युमतिक्रामति कर्मणो हि मृत्योः कार्यं मोक्षासादि दृश्यते यदि च मृत्युना बद्ध ए
वायं स्वभावतस्ततो विमोक्षो नोपपद्यते न हि स्वभावान्नूकश्चिद्विप्रमुच्यते यदि स्वभावो न भवति मृत्युस्ततस्तस्मान्मोक्ष उपपद्य
ते यथाऽसौ मृत्युरात्मीयो धर्मो न भवति तथा प्रदर्शनायात ऊर्ध्वं विमोक्षाय ब्रूहीत्येवं जनकेन पर्यनुयुक्तो याज्ञवल्क्यस्तद्दि
दर्शयिषया प्रवृत्ते स एव प्रकृतः स्वयंज्योतिः पुरुष एषः यः स्वप्ने प्रदर्शितः एतस्मिन्संप्रसादे सम्प्रसीदत्यस्मिन्निति। सं
प्रसादो जागरिते देहेंद्रियव्यापारशतसंनिपातजं हि कालुष्यं तेभ्यो विप्रमुक्त ईषत्प्रसीदति स्वप्ने इह तु सुषुप्ते संप्रसी
दतीत्यतः सुषुप्तं [illegible] संप्रसाद उच्यते [illegible] हि तदा सर्वान्शोकान्नुभवति सलिल एको द्रष्टेति हि वक्ष्यति सुषुप्तस्थमात्मानं स
वा एष एतस्मिन्संप्रसादे क्रमेण संप्रसन्नः सन्सुषुप्ते स्थित्वा कथं संप्रसन्नः स्वप्नात्सुषुप्तं प्रविविक्षुः स्वप्नावस्थ एव रत्वा रतिम वि४
नुभूय मित्रबंधुजनदर्शनादिना चरित्वा विहृत्यानेकधा [illegible] दृष्ट्वैव न कृत्वेत्यर्थः। पुण्यं च पुण्यफलं पापं च पापफलं न तु
पुण्यपापयोः साक्षाद्दर्शनमस्तीत्यवोचाम। तस्मान्न पुण्यपापा [illegible] नुबद्धो यो हि करोति पुण्यपा
पे स ताभ्यामनुबध्यते। न हि दर्शनमात्रेण तदनुबद्धः स्यात्। तस्मात्सुप्तो भूत्वा मृत्युमतिक्रामत्येव न मृत्युरूपाण्येव केवल

वरूपं फलंश्रमनुपलभ्येत्यर्थः।

मतोनमृत्यो रात्मस्वभावत्वाशंकामृत्युरूपेत्यक्ता वोस्य स्वप्नेपिकुर्यान्नतुकरोतिस्वभावश्चेत्क्रियास्यादनिर्मोक्षतैवस्या
त्स्वभाव: स्वभावतावादतो विमोक्षोस्योपपद्यते मृत्यो: पुण्यपापाभ्यां ननुजागरितेस्य स्वभाव एवनंबुध्याद्युपाधिकृतं हि त
त्तृ प्रतिपादितं साक्षिस्यां ध्यायतीवलेलायतीवेतितस्मादकीर्तिने वस्वप्नेमृत्युरूपातिक्रमणात्तनस्वात्मविकल्पाशंकानिर्मो
क्षतावांसंप्रदोसोनुत्तवेतरकाले पुन: प्रतिन्यायं यथान्यायंयथागतं निःआयोत्याय: अथनमायोनिगमनंपुन: पूर्वगमनवैप
रीत्येनयदागमनंसप्रतिन्यायं यथागतंपुनरागच्छतीत्यर्थ:। प्रतियोनियथास्थानंस्वप्नस्थाना
द्धिसुषुप्तंप्रतिपन्न: सन्यथास्थानमेवपुनरागच्छतिप्रतियोन्याद्रवतिस्वप्नायेवस्वप्नस्थानायेवननुस्वप्नेनकरोतिपुण्यपापेत
यो: फलमेवपश्यतीतिकथमवगम्यतेयथाजागरितेतथाकरोत्येवस्वप्नेपितुल्यत्वाद्दर्शनस्येतिअत आह। सवा आत्मायत्किंचि
त्तत्र स्वप्ने पश्यतिपुण्यपापफलमनन्वागतो: ननुगतोननुबद्धस्तेन दृष्टेनभवतिनैवानुबद्धो भवतियदिहि स्वप्नेकृतमेवतेनस्यात्
तेनानुबध्येत स्वप्नाद्युत्थितोपि समन्वागत: स्यान्नच तल्लोके स्वप्नकृतकर्मणान्वागतत्वप्रसिद्धिर्नहिस्वप्नकृतेनाग स्कारि
णमात्मानंमन्यतेकश्चिन्नच स्वप्नदृशा: श्रुत्वालोकस्तं गर्हयतिपरिहरतिवातोनन्वागत एवतेनभवतितस्मात्स्वप्नेकुर्वन्निवोपलक्ष्य
तेनतु क्रियास्तिपरमार्थत: उतेव स्त्रीभि: सहमोदमानइवेतिहिश्लोक उक्त आख्यातारश्चस्वप्नस्यसहेदशब्देनाचक्षतेहस्तिनो १२०

अतोनतस्यक्रिर्तित्वं

पत्रं:

घघटीकृताधावंतीवमयादृष्टा: कथंपुनरस्याकर्तृत्वमितिकार्यकरणैर्मूर्त्तै: संश्लेषोमूर्त्तस्यसतु क्रियाहेतुर्दृष्टो नह्य
मूर्त्त: कश्चित्क्रियावान्दृश्यतेमूर्त्तश्चात्मातोसंग: यस्माद्वासंगोयंपुरुषस्तस्मादनन्वागतस्तेनस्वप्नदृष्टेन। तएवनक्रि
याकर्तृत्वमस्यकथंचिदप्युपपद्यतेकार्यकरणसंश्लेषेणहिकर्तृत्वंस्यात्सचसंश्लेष: संयोगोस्यनास्तियतोसंगोह्ययंपुरु
षस्तस्मादमृतएवमेवैतद्याज्ञवल्क्यसोहंभगवतेसहस्रंददाम्यतऊर्ध्वंविमोक्षायैवब्रूहिमोक्षपदार्थैकदेशस्यकर्मप्रविवेक
स्यसम्यग्दर्शितत्वादतऊर्ध्वंविमोक्षायैवब्रूहीति॥ ॥तत्रासंगोह्ययंपुरुषइत्यसंगताकर्तृत्वेहेतुरुक्तउक्तंचपूर्वंकर्मवशात्हस
इयतेयत्रकाममितिकामश्चसंगोअतोसिद्धोहेतुरुक्तोसंगोह्ययंपुरुषइति। नच्चेतदस्तिकथंतर्हिअसंगएवेतिकामीतदुच्यते।
सवाएषयतस्मिन्स्वप्नेसवैएषपुरुष: संप्रसादात्प्रत्यागत: स्वप्नेरत्वाचरित्वायथाकामंदृष्ट्वैवपुण्यंचसर्वंपूर्ववन्नबुद्धन्तायैव पापं
जागरितस्थानायतस्मादसंगएवायंपुरुषोयदिस्वप्नेसंगवान्स्यात्कामीसततस्तत्संगजैर्दोषैर्बुद्धान्तायागतोलिप्येत। यथा
सोस्वप्नेसंगत्वात्स्वप्नसंगजैर्दोषैर्जागरितेप्रत्यागतोनलिप्यते। एवंजागरितसंगजैरपिदोषैर्नलिप्यतेएव बुद्धांतेजागरि
तिसयत्तत्रबुद्धांतेकिंचित्पश्यत्यनन्वागतस्तेनभवत्यसंगोह्ययंपुरुषइतिरत्वाचरित्वेत्यादिपूर्ववत्तदेतदुच्यतेसवाएष
एतस्मिन्बुद्धान्तेननुदृष्ट्वैवेतिकथमवधार्यतेकरोतिचतत्र पुण्य पापेतत्फलंचपश्यतिनकारकावज्ञासकत्वेनकर्तृत्वोप

वृ

प्तेत्यात्मनैवायंज्योतिषास्तइत्यादिनाआत्मज्योतिषावभासितः कार्यकरणसंघातोव्यवहरतितेनास्यकर्तृत्वमुपचर्यते
नस्वतः कर्तृत्वं। तथाचोक्तं ध्यायतीवलेलायतीवेति बुध्याद्युपाधिकृतमेवनस्वतः। इहतुपरमार्थापेक्षयाउपाधिनिर
पेक्षउच्यते। दृष्ट्वैवपुण्यंचपापंचनकृत्वेतितेन नपूर्वापरव्याघाताशंका। यस्मान्निरुपाधिकः परमार्थतोनकरोति। न
चलिप्यतेक्रियाफलेन। तथाचव्यासभगवतोक्तमनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः शरीरस्थोपिकौंतेयनकरो
तिनलिप्यतइति। तथासहस्रदानंतुकामप्रविवेकस्यदर्शितत्वात्। तथासवाएषएतस्मिन्स्वप्नेसवाएषएतस्मिन्बुद्धांतइत्येता
भ्यांकंडिकाभ्यामसंगतैवप्रतिपादिता। यस्माद्बुद्धांतेकृतेनस्वप्नांतगतः संप्रसंन्नोसंबद्धोभवतिस्त्र्यन्यादिकार्यादर्शनात्तस्मा
त्रिष्वपिस्थानेषुस्वतोसंगएवायमतोमृतः स्थानत्रयधर्मविलक्षणः। प्रतियोन्याद्रवतिस्वप्नांतायैवसंप्रसादायेत्य
१२९ न र्थः। दर्शनवृत्तेः स्वप्नस्यस्वप्नशब्देनाभिधानदर्शनादत्रशब्देनचविशेषणोपपत्तेस्तस्माउभौअंतायधावतीतिवसुषुप्तंदर्शयि
ष्यति। यदिपुनरेवमुच्यतेस्वप्नांतेरत्वाचरित्वाएतावुभावंतावनुसंचरतिस्वप्नांतंचबुद्धांतंचेतिदर्शनात्स्वप्नांतायैवेत्यत्रा
पिदर्शनवृत्तिरेवस्वप्नउच्यतइतितथापिनकिंचिद्दुष्यत्यसंगत्वं हिसिसाधयिषितंसिद्ध्यत्येव। यस्माज्जागरितेदृष्ट्वैव १२९
पुण्यंचपापंचरत्वाचरित्वावस्वप्नांतमागतोनजागरिततद्दोषेणानुगतोभवति। एवमयंपुरुषः आत्मास्वयंज्योतिः कार्य

एवो२ वै२ विद्यायां१ या२ सौ१

र्षीवाह्यसोस्यपरमोलोकस्तस्मादपकृष्यमाणायामविद्यायांचकाष्ठागतायांसर्वात्मभावोमोयथास्वयंज्योतिष्ट्वंस्वप्नेप्र
त्यक्ष तत्उपलभ्यतेतद्वद्विद्याफलमुपलभ्यतइत्यर्थः। तथाऽविद्यामपुत्कृष्यमाणायांतिरोधीयमानायांचविद्याया
मविद्यायाः फलंप्रत्यक्षतउपलभ्यते। अथयत्रैनंघ्नंतीवजिनंतीवेति। तएतेविद्याविद्याकार्येसर्वात्मभावः परिछिन्नात्मभाव
श्चविद्ययासुव्यक्तं सर्वात्माभवत्यविद्ययाचासर्वोभवत्यन्यतः कुतश्चित्प्रविभक्तोभवतियतः प्रविभक्तोभवतितेनविरुध्यते
विरुद्धत्वाद्धन्यतेजीयतेविछाद्यतेचासर्वविषयत्वेचविभिन्नत्वादेतद्भवतिसमस्तस्तुसन्नकुतोभिविद्यतेयेनविरुध्यतेविरोधाभा
वेकेनहन्यतेजीयतेविछाद्यतेवा। अत इदमविद्यायाः सतत्वमुक्तं भवतिसर्वात्मानंसंतमसर्वात्मत्वेनग्राहयतिआत्मनोन्यद्वस्त्वंतरमवि
द्यमानंप्रत्युपस्थापयत्यात्मानमसर्वत्वमापादयतिततस्तद्विषयः कामोभवतियतोभिद्यतेकामतः क्रियामुपादत्तेततः फलंतदे
तदुक्तंवक्ष्यमाणंचयत्रहिद्वैतमिवभवतितदितरइतरंपश्यतीत्यादिइदमविद्यायाः सतत्वंसहकार्येणप्रदर्शितंविद्यायाश्चकार्य
सर्वात्मभावः प्रदर्शितोविद्याविपर्ययेणसाचाविद्यानात्मनः स्वाभाविकोधर्मोयस्माद्विद्यायामुत्कृष्यमाणायांस्वयमपचीय
मानासतीकाष्ठांगतायांविद्यायांपरिनिष्ठितेसर्वात्मभावेसर्वात्मनानिवर्त्ततेरज्ज्वामिवसर्पज्ञानंरज्जुनिश्चयेतच्चोक्तंय
त्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादितस्मान्नात्मधर्मोविद्यानहिस्वाभाविकस्योच्छित्तिः कदाचिदप्युपपद्यतेसवितुरि

वोस्यप्रकाशयोस्तस्मात्तस्यामोक्षउपपद्यते॥ ॥इदानींयोसोसर्वात्मभावोमोक्षोविद्याफलंक्रियाकारकफलशून्यंसप्रत्यक्ष
तोनिर्दिश्यतेयत्राविद्याकामकर्माणिनसंतिततदेतत्प्रस्तुतंयत्रसुप्तोनकंचनकामंकामयतेनकंचनस्वप्नंपश्यतीतितदेतद्
अस्यरूपंयःसर्वात्मभावःसोस्यपरमोलोकइत्युक्तस्तदेतदतिछंदाअतिछंदमित्यर्थोरूपपरत्वाछंदःकामोतिगछंदोयस्मा
द्रूपात्तदतिछंदंरूपमन्योसावस्वरांतःछंदःशब्दोगायत्र्यादिछंदोवाचीअयंतुकामवचनोतःस्वरांतएवतथाप्यतिछंदाइति
पाठःस्वाध्यायधर्मोद्रष्टव्योस्तिचलोकेकामवचनेप्रयुक्तःछंदःशब्दःस्वछंदःपरछंदइत्यादावतोतिछंदमित्येवमुपनेयंकाम
वर्जितमेत्यतद्रूपमित्यस्मिन्नर्थेतथापहतपाप्मा [illegible] शब्देनधर्माधर्मावुच्येतेपाप्मशब्दःसंस्थतेपाप्मनोविजहातीत्युक्त्वा
२४ तदपहतपाप्मधर्माधर्मवर्जितमित्येतत्किंचाभयंभयंहिनामाविद्याकार्यमविद्ययाह्ययमन्यदितिद्युक्तंतत्कार्यद्वारेणकारण
प्रतिषेधोयमभयंरूपमित्यविद्यावर्जितमित्येतद्यदेतद्विद्याफलंसर्वात्मभावस्तदेतदतिछंदापहतपाप्माभयंरूपंसर्वसंसा
रधर्मवर्जितमतोभयंरूपमेतदिदंचपूर्वमेवोपन्यस्तंअतीतानंतरब्राह्मणसमाप्तावभयंवैजनकप्राप्तोसीतिआगमतद्धेतु
तर्कतःप्रपंचितंदर्शितागमार्थप्रत्ययदार्ढ्यायअयमात्मास्वयंचैतन्यज्योतिःस्वभावःसर्वस्वेनचैतन्यज्योतिषावभासयतीत्यु १२४
क्तंस्वप्नेचकिंविषयस्पतिरमतेचरतिजानातिचेत्युक्तमतःस्थितंचैतन्यायतोनित्यंस्वरूपचैतन्यज्योतिष्ट्वमात्मनःसयदिवात्मात्रा

ध२ ते२

विनष्टःस्वेनैवरूपेणवर्ततेकस्मादयमहमस्मीत्यात्मानंवाबहिरिमानिभूतानीतिजाग्रत्स्वप्नयोरिवनजानातीत्यत्रोच्यते।
ष्टएवज्ञानहेतुर्भेदत्वमेवाज्ञानहेतुस्तत्कथमित्युच्यते।दृष्टांतेनहिप्रत्यक्षीभवतिविवक्षितोर्थइत्याह।तत्रयथालो
केप्रियेष्टयास्त्रियासंपरिष्वक्तःसम्यक्परिष्वक्तःकामयंत्याकामुकःसन्नबाह्यमात्मनःकिंचनकिंचिदपिवेदमत्तोन्यद्वस्त्वि
तिनवांतरमयमहमस्मिसुखीदुःखीवेतिअपरिष्वक्तस्तुतयाप्रविभक्तोजानातिसर्वमेवबाह्यमाभ्यंतरंचपरिष्वंगोत्तरकाले
त्वेकत्वापत्तेर्नजानातिएवमेवयथादृष्टांतोयंपुरुषःक्षेत्रज्ञोभूतमात्रासंसर्गतःसैंधवखिल्यवत्प्रविभक्तोजलादौचंद्रा
दिबिंबवत्कार्यकरणइहप्रविष्टःसोयंपुरुषःप्राज्ञेनपरमार्थेनस्वाभाविकेनस्वेनात्मनापरेणज्योतिषासंपरिष्वक्तःएकी
भूतोनिरंतरःसर्वात्मानबाह्यंकिंचनवस्त्वंतरंनाप्याभ्यंतरमात्मन्ययमहमस्मिसुखीदुःखीवेतिवेदतत्रचैतन्यज्योतिःस्व
भावत्वेकस्मादिहनजानातीतियदप्राक्षीस्तत्रायंहेतुर्मयोक्तएकत्वंयथास्त्रीपुंसयोःपरिष्वक्तयोस्तत्रार्थान्नानात्वंविशे
षविज्ञानहेतुरित्युक्तंभवतिनानात्वेचकारणमात्मनोवस्त्वंतरस्यप्रत्युपस्थापिकाविद्येत्युक्तं।तत्रचाविद्यायाःयदा
प्रविभक्तोभवतितदासर्वेणैकत्वमेवास्यभवतिततश्चज्ञानज्ञेयादिकारकप्रविभागेसतिकुतोविशेषविज्ञानप्रादुर्भा
वःकामोवासंभवतिस्वाभाविकेस्वरूपस्थआत्मज्योतिषियस्मादेवंसर्वैकत्वमेवास्यरूपमतस्तद्वैअस्यात्मनःस्वयंज्यो

त्तिः स्वभावस्यैतद्रूपमाप्तकामं यस्मात्समस्तमेतत्तस्मादाप्ताः कामाः यस्मिन्रूपे तदिदमाप्तकामं यस्य ह्यन्यत्वे
न प्रविभक्तः कामस्तस्य तदनाप्तकामं भवति यथा जागरितावस्थायां देवदत्तादिरूपं न त्विदं तथा कुतश्चित्प्रविभज्यते। अत
आप्तकामं भवति किमन्यस्माद्वस्त्वंतरान्न प्रविभज्यते आहोस्विदात्मैव तद्वस्त्वंतरमत आह नान्यदस्त्यात्मनः कथं यत आ
त्मकामं आत्मैव कामा अस्मिन्रूपेऽन्यत्र प्रविभक्ता इवान्यत्वेन काम्यमाना यथा जाग्रत्स्वप्नयोस्तस्यात्मैवान्यत्वप्र
त्युपस्थापकहेतोरविद्याया अभावादात्मकाममत एवाकाममेतद्रूपं काम्यविषयाभावाच्छोकांतरं शोकच्छिद्रं शोकशून्य
मित्येतच्छोकमध्यमिति वा सर्वथाप्यशोकमेतद्रूपं शोकवर्जितमित्यर्थः प्रकृतस्त्वयं ज्योतिरात्माविद्याकामकर्मविनिर्मु
क्त इत्युक्तमसंगत्वादात्मन आगंतुकत्वाच्चैतेषां तत्रैवमाशंका जायते चैतन्यात्मस्वभावत्वे सत्यप्येकीभावान्न जानाति स्त्री
पुंसयोरिव संपरिष्वक्तयोरित्युक्तं। तत्र प्रासंगिकमेतदुक्तं। कामकर्मादिवन्न स्वयंज्योतिष्ट्वमप्यस्यात्मनो न स्वभावो यस्मा
२५ त्संप्रसादे नोपलभ्यत इत्याशंकायां प्राप्तायां तन्निराकरणाय स्त्रीपुंदृष्टांतोपादानेन विद्यमानस्यैव स्वयंज्योतिष्ट्वस्य सुषुप्ते
ऽग्रहणमेकीभावाद्धेतोर्न तु कामकर्मादिवदागंतुकमित्येतत्प्रासंगिकमभिधाय यत्प्रकृतं तदेवानुवर्त्तयति। अत्र चैतत्प्रकृत १२५
तमाविद्याकामकर्मविनिर्मुक्तमेतद्रूपं यत्सुषुप्त आत्मनोऽगृह्यते प्रत्यक्षत इति तदेतदध्यायांतमेवाभिहितं सर्वसंबंधातीतो

व यं

तमेतद्रूपमिति यस्मादत्रैतस्मिन्सुषुप्तस्थानेऽतिच्छंदापहतपाप्माऽभयमेतद्रूपं तस्मादत्र पिता जनकस्तस्य जनकपितृत्वात्पि
व तृत्वं पुत्रं प्रति तत्कर्मनिमित्तं कर्मणायमसंबद्धोऽस्मिन्काले तस्मात्पिता पुत्रसंबंधनिमित्तस्य कर्मणो विनिर्मुक्तत्वात्पिताऽप्य
पिता भवति तथा पुत्रोऽपि पितुः पुत्रो भवतीति सामर्थ्याद्गम्यते उभयोर्हि संबंधनिमित्तं कर्म तदयमतिक्रांतो वर्त्तते अपहतपाप्मेति ह्यु
क्तं तथा माताऽमाता लोकाः कर्मणा जेतव्या जिताश्च तत्कर्मसंबंधाभावाल्लोका अलोकास्तथा देवाः कर्मांगभूताः तत्कर्मसंबंधा
१ त्ययाद्देवा अदेवास्तथा वेदाः साध्यसाधनसंबंधविधायका मंत्रलक्षणाश्चाभिधायकत्वेन कर्मांगभूताः अधीता अध्येतव्याश्च
कर्मनिमित्तमेव संबध्यंते पुरुषेण तत्कर्मातिक्रमणादेतस्मिन्काले वेदा अप्यवेदाः संपद्यंते न केवलं शुभकर्मसंबंधातीतः
किं तर्ह्यशुभैरप्यत्यंतघोरैः कर्मभिरसंबद्ध एवायं वर्त्तत इत्येतमर्थमाह। अत्र स्तेनो ब्राह्मणसुवर्णहर्त्ता भ्रूणघ्ना सहपाठा
दवगम्यते। स तेन घोरेण कर्मणैतस्मिन्काले विनिर्मुक्तो भवति येनायं कर्मणा महापातकी स्तेन उच्यते तथा भ्रूणहाऽभ्रूण
हा तथा चांडालो न केवलं प्रत्युत्पन्नेनैव कर्मणा विनिर्मुक्तः किं तर्हि सहजेनाप्यत्यंतनिकृष्टजातिप्रापकेणापि विनिर्मुक्तः ए
वायं चांडालो नाम शूद्रेण ब्राह्मण्यामुत्पन्नश्चंडाल एव चांडालः स जातिनिमित्तेन कर्मणाऽसंबद्धत्वादचांडालो भ
वति पौल्कसः पुल्कस एव पौल्कसः [illegible] शूद्रेणैव क्षत्रियायामुत्पन्नस्तथासावप्यपौल्कसो भवति। तथाश्रमल

३

त्तिः स्वभावस्यैतद्रूपमाप्तकामं यस्मात्समस्तमे[illegible]त तत्तस्मादाप्ताः कामाः यस्मिन्रूपे तदिदमाप्तकामं यस्य ह्यन्यत्वे
न प्रविभक्तः कामस्तस्य तदनाप्तकामं भवति यथा जागरितावस्थायां देवदत्तादिरूपं न त्विदं तथा कुतश्चित्प्रविभज्यते। अत
आप्तकामं भवति किमन्यस्माद्वस्त्वंतरान्न प्रविभज्यते आहोस्विदात्मैव तद्वस्त्वंतरं अत आह नान्यदस्त्यात्मनः कथं य[illegible]तत्वा
त्मकामं आत्मैव कामा [illegible] अस्मिन्रूपेऽन्यत्र प्रविभक्ता इवान्यत्वेन काम्यमाना यथा जाग्रत्स्वप्नयोस्तेस्यात्मैवान्यत्वप्र
त्युपस्थापकहेतोरविद्याया अभावादात्मकाममत एवाकाममेतद्रूपं काम्यविषयाभावाच्छोकांतरं शोकच्छिद्रं शोकशून्य
मित्येतत् शोकमध्यमिति वा सर्वथाप्यशोकमेतद्रूपं शोकवर्जितमित्यर्थः प्रकृतस्त्वयं ज्योतिरात्माविद्याकामकर्मविनिर्मु
क्त इत्युक्तमसंगत्वादात्मन आगंतुकत्वाच्चैतेषां तत्रैवमाशंका जायते चैतन्यात्मस्वभावत्वे सत्यप्येकीभावान्न जानाति स्त्री
पुंसयोरिव संपरिष्वक्तयोरित्युक्तं। तत्र प्रासंगिकमेतदुक्तं। कामकर्मादिवन्न स्वयंज्योतिष्ट्वमप्यस्यात्मनो न स्वभावो यस्मा
१२५ त्संप्रसादे नोपलभ्यत इत्याशंकायां प्राप्तायां तन्निराकरणाय स्त्रीपुंदृष्टांतोपादानेन विद्यमानस्यैव स्वयंज्योतिष्ट्वस्य सुषुप्ते
ऽग्रहणमेकीभावाद्धेतोर्न तु कामकर्मादिवदागंतुकमित्येतत्प्रासंगिकमभिधाय यत्प्रकृतं तदेवानुवर्तयति। अत्र चैतत्प्रकृत १२५
तमाविद्याकामकर्मविनिर्मुक्तमेतद्रूपं यत्सुषुप्त आत्मनो गृह्यते प्रत्यक्षत इति तदेतद्यथाभूतमेवाभिहितं सर्वसंबंधातीत

व यां

तमेतद्रूपमिति यस्मादत्रैतस्मिन्सुषुप्तस्थानेऽतिच्छंदापहतपाप्माऽभयमेतद्रूपं तस्मादत्र पिता जनक[illegible]जनयितृत्वात्पि
व तृत्वं पुत्रं प्रति तत्कर्मनिमित्तं कर्मणायमसंबद्धोऽस्मिन्काले तस्मात्पिता पुत्रसंबंधनिमित्तस्य कर्मणो विनिर्मुक्तत्वात्पिता अप्य
पिता भवति तथा पुत्रोऽपि पितुः पुत्रो भवतीति सामर्थ्याद्गम्यत उभयोर्हि संबंधनिमित्तं कर्म तदयमतिक्रांतो वर्तते अपहतपाप्मेति ह्यु
क्तं तथा माता अमाता लोकाः कर्मणा जेतव्या जिताश्च तत्कर्मसंबंधाभावाल्लोका अलोकास्तथा देवाः कर्मांगभूताः तत्कर्मसंबंधा
१ त्ययाद्देवा अदेवास्तथा वेदाः साध्यसाधनसंबंधविधायका मंत्रलक्षणाश्चाभिधायकत्वेन कर्मांगभूताः अधीता अ[illegible]ध्येतव्याश्च
कर्मनिमित्तमेव संबध्यंते पुरुषेण तत्कर्मातिक्रमणादेतस्मिन्काले वेदा अप्यवेदाः संपद्यंते न केवलं शुभकर्मसंबंधातीतः
किं तर्ह्यशुभैरप्यत्यंतघोरैः कर्मभिरसंबद्ध एवायं वर्तत इत्येतमर्थमाह। अत्र स्तेनो ब्राह्मणस्वर्णहर्ता भ्रूणघ्ना सहपाठा
दवगम्यते। स तेन घोरेण कर्मणैतस्मिन्काले विनिर्मुक्तो भवति येनायं कर्मणा महापातकी स्तेन उच्यते तथा भ्रूणहा भ्रूण
हा तथा चांडालो न केवलं प्रत्युत्पन्नेनैव कर्मणा विनिर्मुक्तः किं तर्हि सहजेनाप्यत्यंतनिकृष्टजातिप्रापकेणापि विनिर्मुक्त ए
वायं चांडालो नाम शूद्रेण ब्राह्मण्यामुत्पन्नश्चंडाल एव चांडालः स जातिनिमित्तेन कर्मणाऽसंबद्धत्वान्न चांडालो भ
वति पौल्कसः पुल्कस एव पौल्कसः [illegible]द्रेणैव क्षत्रियायामुत्पन्नस्तथासोप्यपौल्कसो भवति। तथा चाश्रमल

३

क्षणोऽस्य कर्मणि निरवसंबद्धो भवतीत्युच्यते श्रमणः परिव्राड् यत्कर्मनिमित्तो भवति स तेन विनिर्मुक्तत्वादश्रमणस्तथा तापसो वा
नप्र[illegible]स्थो तापसः सर्वेषां वर्णाश्रमादीनामुपलक्षणार्थमुभयोर्ग्रहणं किं बहुनाऽनन्वागतमसंबद्धमित्येतत्पुण्येन शास्त्र
विहितेन कर्मणा तथा पापेन विहिताकरणप्रतिषिद्धक्रियालक्षणेन रूपपरत्वान्नपुंसकलिंगमनन्वागतं रूपमिति ह्यनुवर्तते किंपु
नरसंबद्धत्वकारणमिति तद्धेतुरुच्यते तीर्णो तिक्रांतो हि यस्मादेवं रूपस्तदा तस्मिन्काले सर्वान्शोकान् शोकाः कामाः इष्ट
विषयप्रार्थना हि तद्विषयवियोगे शोकत्वमापद्यते। इष्टं हि विषयमप्राप्तं वियुक्तं चोद्दिश्य चिंतयन्स्तद्गुणान्संतप्यते। पुरुषोऽतः
शोकोऽरतिः कामइति पर्यायाः यस्मात्सर्वकामातीतो ह्यत्रायं भवति न कंचन कामं कामयते तच्छिदाद्धति हियुक्तं तन्मुक्तिया पतितौ शोक यं
१८ शाद्धः कामवचन एव च [illegible] वितुमर्हति कामस्य कर्महेतु [illegible] वक्ष्यति हि स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कु
रुत इति अतः सर्वकामातीतीर्णत्वाद्युक्तमुक्तमनन्वागतं पुण्येनेत्यादि हृदयस्येति हृदयमिति पुंडरीकाकारो मांसपिंडः तत्स्थमंतःक
कौ रणं बुद्धिर्हृदयमित्युच्यते तात्स्थ्यान्मं चौशानवत् हृदयस्य बुद्धेर्ये शोकाः बुद्धिसंश्रया हि ते कामः संकल्पो विचिकित्सेत्यादि सर्वं मन ए
वेत्युक्तत्वात् वक्ष्यति च कामा ये स्य हृदि श्रिता इति आत्मसंश्रयभ्रांत्यपनोदाय हृदीदं वचनं हृदि श्रिता हृदयस्य शोका इति च हृदयकरणसं १२८
बंधातीतस्तथायमस्मिन्काले ति कामतिमृत्योर्न रूपाणीति ह्युक्तं हृदयसंबंधातीतत्वात्तु तत्संश्रयकामसंबंधातीतो भवतीति हि युक्तं

त्रिव द्याश्रि

रंस्वप्ने चैव वादिनो ह्येते हि कामाः वासनाश्च हृदयसंबंधिनमात्मानमुपसर्प्योपश्लिष्यंते हृदयवियोगेऽप्यात्मन्यवतिष्ठं
ते। पुटतैलस्थ इव पुष्पादिगंध इत्यावक्षते तेषां कामः संकल्पो हृदये ह्येव रूपाणि हृदयस्य शोका इत्यादीनां वचनामानर्थ ना
क्यमेव। हृदयकरणोत्पाद्यत्वादिति चेन्न हृदि श्रिता इति [illegible] विशेषणान्न हि हृदयस्य करणमात्रत्वे हृदि श्रिता इ
ति वचनं समंजसं हृदये ह्येव रूपाणि प्रतिष्ठितानीति चात्मविप्रयुक्तविवक्षितत्वात्र हृच्छयणवचने यथार्थमेव युक्तं स्या
ड्लाप त्पतीवैती श्रुतेरन्यार्थासंभवात्कामा ये स्य हृदि श्रिता इति विशेषणादात्माश्रया अपि संतीति चेन्नानाश्रितापेक्षत्वा
न्नाशाश्रयांतरमपेक्ष्य हृदीति विशेषणं किं तर्हि ये हृदयेनाश्रिताः कामाः तानपेक्ष्य विशेषणं ये त्वप्ररूढा भविष्यतो
भूताश्च प्रतिपक्षतो निवृत्तास्ते नैव हृदि श्रिताः संभाव्यंते अतो युक्तं तानपेक्ष्य विशेषणं ये प्ररूढा वर्तमाना विषये ते
सर्वे प्रमुच्यंत इति यापि विशेषणानर्थक्यमिति चेत् न तेषु यत्नाधिक्याधेयार्थत्वादितरथाऽश्रुतमविशिष्टं वकल्पितं स्यादात्मा
श्रयत्वं कामानां न कंचन कामं कामयत इति प्राप्तप्रतिषेधात् आत्माश्रयत्वं कामानां श्रुतमेवेति चेन्न स धीः स्वप्नो भूत्वेति
परिहृतत्वात्कामाश्रयत्वप्राप्तेरसंगवचनाच्च नहि कामाश्रयात्वे असंगवचनमुपपद्यते संगश्च काम इत्यवोचाम आत्मकाम
इति श्रुते[illegible] विषयोस्य कामो भवतीति चेन्न व्यतिरिक्तकामाभावार्थत्वात्तस्याः चेत्रापिकादितंत्रन्यायोपपन्नमात्मनः का

माद्याश्रयत्वमिति चेन्न ह्रीर्धीर्भीरित्यादिविशेषश्रुतिविरोधादनपेक्ष्यास्तावैशेषिकादितंत्रोपपत्तयः श्रुतिविरोधेन्या
याभाससत्वोपगमात्स्वयंज्योतिष्ट्वबाधनाच्च कामादीनां च स्वप्ने केवलदृष्टिमात्रविषयत्वात्स्वयंज्योतिष्ट्वं सिद्धं स्थितं
च बाध्येत । आत्मसमवायित्वे दृश्यत्वानुपपत्तिश्चक्षुर्गतविशेषणवत् द्रष्टुर्हि दृश्यमर्थान्तरभूतमिति । द्रष्टुः स्वयंज्योति
ष्ट्वं सिद्धं तद्बाधितं स्यात् यदि कामाद्याश्रयत्वं परिकल्प्यते । सर्वशास्त्रार्थविप्रतिषेधाच्च परस्यैकदेशकल्पनायां का
माद्याश्रयत्वे च सर्वशास्त्रार्थजातं कुप्येत । एतच्च विस्तरेण चतुर्थे वोचाम । महता हि प्रयत्नेन कामाद्याश्रयकल्पनाः प्र
तिषेद्धव्या आत्मनः परेणैकत्वशास्त्रार्थसिद्धये तत्कल्पनायां पुनः क्रियमाणायां शास्त्रार्थ एव बाधितः स्यात् यथेच्छा
दीनामात्मधर्मत्वं कल्पयंतो वैशेषिका नैयायिकाश्चोपनिषच्छास्त्रार्थेन न संगच्छंते तथेयमपि कल्पनोपनिषच्छास्त्रार्थ
बाधनान्नादरणीया । स्त्रीपुंसयोरविवेकत्वान्न पश्यतीत्युक्तं स्वयंज्योतिरिति च स्वयंज्योतिष्ट्वं नाम चैतन्यात्मस्वभावता यदि
ह्यग्न्युष्णत्वादिवच्चैतन्यात्मस्वभावः आत्मा स कथमेकत्वेपि हि स्वभावं जह्यात् न जानीयात् अथ न जहाति कथमिह सुषु १२७
प्ते न पश्यति विप्रतिषिद्धमेतच्चैतन्यमात्मस्वभावो न जानाति चेति । न विप्रति [illegible] षिद्धमुभयमप्येतदुपपद्यत एव कथं यद्वै सुषु
प्ते तन्न पश्यति पश्यन्वै तन्न पश्यन्नेव पश्यति [illegible] यत्तच्च सुषुप्ते न पश्यतीति [illegible] जानीषे तन्न तथा गृह्णीयाः

कस्मात्पश्यन्नैव भवति तत्र । नन्वेवं न पश्यतीति सुषुप्ते जानीमो यतो न चक्षुर्वा मनो वा दर्शने करणं व्यापृतमस्ति व्यापृतेषु हि द
र्शनश्रवणादिषु पश्यतीति व्यवहारो भवति शृणोतीति वा न च व्यापृतानि करणानि पश्यामस्तस्मान्न पश्यत्येवायं न हि
र्द्द पश्यन्नेव भवति कथं न हि यस्माद्द्रष्टुर्दृष्टिकर्तुर्या दृष्टिस्तस्या दृष्टेर्विपरिलोपो विनाशः विद्यते यथाग्नेरौष्ण्यं यावदग्निभावि
तथायं वात्माद्रष्टाऽविनाशी अतोऽविनाशित्वादात्मनो दृष्टिरप्यविनाशिनी यावद्द्रष्टृभाविनी हि सा । ननु विप्रतिषिद्धमिदमभिधी
यते द्रष्टुः सा दृष्टिर्न विपरिलुप्यत इति च [illegible] द्रष्टा क्रियते दृष्टिकर्तृत्वाद्द्रष्टेत्युच्यते । क्रियमाणा च द्रष्ट्रा दृष्टिर्न विपरिलुप्यत
इति चाशक्यं वक्तुं ननु न विपरिलुप्यत इति वचनादविनाशिनी स्यात् न वचनस्य ज्ञापकत्वात् न हि न्यायप्राप्तो विनाशः कृतकस्य वचन
शतेन वारयितुं शक्यते वचनस्य यथाप्राप्तार्थज्ञापकत्वात् नैष दोषः आदित्यादिप्रकाशकत्ववत् दर्शनोपपत्तेः यथादित्यादयो नित्य
प्रकाशस्वभावा एव संतः स्वाभाविकेन नित्येनैव प्रकाशेन प्रकाशयंति । न ह्यप्रकाशात्मानः संतः प्रकाशं कुर्वंतः प्रकाशयंतीत्युच्यं
ते किं तर्हि स्वभावेनैव नित्येन प्रकाशेन तथायमप्यात्मा परिलुप्तस्वभावया दृष्ट्या नित्यया द्रष्टेत्युच्यते गौणं तर्हि द्रष्ट[illegible]त्वं
न मुख्योपपत्तेः यदि ह्यन्यथाप्यात्मनोऽन्यो दर्शनप्रकारोऽस्ति तदैवमेव मुख्यं द्रष्टृत्वमुपपद्यते नान्यथा यथादित्यादीनां प्रकाशयि त्रा
तृत्वं नित्येनैव स्वाभाविकेनाक्रियमाणेन प्रकाशेन तदेव च प्रकाशयितृत्वं मुख्यं प्रकाशयितृत्वान्तरानुपपत्तेस्तस्मान्न द्रष्टु

[illegible]
द्रष्टृत्वं दृष्टृन्दास्य द्रष्टुस्तस्य ।ता वा न वाऽनेनो २

दृष्टिर्विपरिलुप्यत इति न विप्रतिषिद्धं गंधोप्यस्ति न नित्यक्रिः ।कर्तृविषय एव तृच्प्रत्ययांतस्य शब्दस्य प्रयोगो दृष्टो यथा
छेत्ता भेत्ता गंतेति तथा द्रष्टेत्यत्रापीति चेन्न प्रकाशयितेति दृष्टत्वादेव तु प्रकाशकेष्वन्यथा संभवान्नूनं त्वान्मनीति चेन्न दृष्टे
विपरिलोपश्रुतेः पश्यामि न पश्यामीत्यनुभवदर्शनान्नेति चेन्न करणव्यापारविशेषापेक्षत्वात् उद्धृतचक्षुषां च स्वप्न
आत्मदृष्टेरविपरिलोपदर्शनात् तस्मादपरिलुप्तस्वभावैवात्मनो दृष्टिरतस्तयापरिलुप्तया दृष्ट्या स्वयंज्योतिः स्वभावया प
श्यन्नेव भवति सुषुप्ते। कथं तर्हि न पश्यतीत्युच्यते। ननु तदस्ति किं तद्द्वितीयं विषयभूतं किं विविक्तं ततो द्रष्टुरन्यत् अन्यत्वेन
विभक्तं यत्पश्येदुपलभेत यद्धि तद्विशेषदर्शनकारणमंतःकरणं चक्षूरूपं च तदविद्ययान्यत्वेन प्रत्युपस्थापितमासीत्तदेत
२८ स्मिन्काले एकीभूतमात्मनः परेण परिष्वंगात् द्रष्टुर्दृष्टिपरिच्छिन्नस्य विषयदर्शनाय करणमन्यत्वेन व्यवतिष्ठते। अयं तु स्वेन सर्वात्म
नासं परिष्वक्तः स्वेन परेण प्राज्ञेनात्मना प्रियेव पुरुषस्तेनन दृष्टत्वेन व्यवस्थितानि विषयाश्च तदभावाद्विशेषदर्शनं नास्ति। करणानि
करणादिकृतं हि तन्नात्मकृतमात्मकृतमिव प्रत्यवभासते। तस्मात्तत्कृतेयं भ्रांतिरात्मनो दृष्टिः परिलुप्यत इति समानमन्यत्।
यद्वै तन्न जिघ्रति यद्वै तन्न रसयते। यद्वै तन्न वदति यद्वै तन्न शृणोति यद्वै तन्न मनुते यद्वै तन्न स्पृशति यद्वै तन्न विजानाति मननविज्ञान १२८
योर्दृष्ट्यादिसहकारित्वेपि सति चक्षुरादिनिरपेक्षो भूतवर्त्तमानविषयव्यापारो विद्यत इति पृथग्ग्रहणं। किंपुनर्दृ

ष्ट्यादीनामग्नेरौष्ण्यप्रकाशनज्वलनादिवत् धर्मी भेद आहोस्विदभिन्नस्यैव धर्मस्य परोपाधिनिमित्तकं धर्मान्यत्वमित्यत्र के
चिद्व्याचक्षते भिन्नं वस्तुनः स्वत एवैकत्वं नानात्वं च यथा गोर्द्रव्यतयैकत्वं सास्नादीनां धर्माणां परस्परतो भेदो यथा स्थूले
ष्वेवमेकत्वं नानात्वं च तथा निरवयवेष्वमूर्त्तवस्तुष्वेकत्वं नानात्वमनुमेयं सर्वत्राव्यभिचारदर्शनादात्मनापि तद्वदेव दृष्ट्यादीनां
परस्परं नानात्वमात्मना चैकत्वमिति। नान्यपरत्वात् नहि दृष्ट्यादिधर्मभेदप्रदर्शनपरमिदं वाक्यं यद्वै तदित्यादि किं तर्हि यदि वै
तन्यात्मज्योतिः कथं न जानाति सुषुप्ते नूनमतो न चैतन्यात्मज्योतिरित्येवमाशंकाप्राप्तौ तन्निराकरणायैतद्यद्वै तदित्यादि
स्वयं जाग्रत्स्वप्नयोश्चक्षुराद्यनेकोपाधिद्वारं चैतन्यात्मज्योतिः स्वाभाव्यमुपलक्षितं दृष्ट्याद्यभिधेयव्यवहाराय सुषुप्ते तदुप
धिभेदव्यापारनिवृत्तावनुद्भास्यमानत्वादनुपलक्ष्यमाणस्वभावमप्युपाधिभेदेन भिन्नमिव यथाप्राप्तानुवादेनैव विद्य
मानत्वमुच्यते तत्र दृष्ट्यादिधर्मभेदकल्पना विवक्षितार्थानभिज्ञतया सैंधवघनवत्प्रज्ञानैकरसघनश्रुतिविरोधाच्च विज्ञा
नमानंदं सत्यं ज्ञानं प्रज्ञानं ब्रह्मेत्यादिश्रुतिभ्यश्च। शब्दप्रवृत्तेश्च किंकीवशब्दप्रवृत्तिश्च चक्षुषा रूपं विजानाति श्रोत्रेण शा
ब्दं विजानाति [illegible] वाचान्नस्य रसं विजानातीति च सर्वत्रैव दृष्ट्यादिशब्दाभिधेया
नो विज्ञानशब्दवाच्यतामेव दर्शयति शब्दप्रवृत्तिश्च प्रमाणं दृष्टांतोपपत्तेश्च यथा हि लोके स्वच्छस्वाभाव्ययुक्तः स्फटिकस्तन्नि
मित्तमेव केवलं हरितनीललोहिताद्युपाधिभेदसंयोगात्तदाकारत्वं भजते न च स्वच्छस्वाभाव्यव्यतिरेकेण हरितनीललोहिता

दिलक्षणो धर्मभेदो [stain] स्फटिकस्य कल्पयितुं शक्यं तेन तथा चक्षुराद्युपाधिभेदसंयोगात्प्रज्ञानघनस्य तावस्यैवात्मज्यो
तिषो दृश्यादिशक्तिभेद उपलक्ष्यते। प्रज्ञानघनस्य स्वच्छस्वभावात् स्फटिकस्य च्छायाभाववत् स्वयंज्योतिष्ट्वाद्यथा वादित्यज्यो
तिरवभासस्य भेदैः संयुज्यमानं हरितनीललोहितादिभेदैर्विभाग्यं तदाकाराभासं भवति। तथा चक्षुरादि जगदवभासयच्चक्षुरादि
निय तदाकारं भवति तथा चोक्तं मात्मनैवायं ज्योतिषा स्त इत्यादि न च निरवयवस्य अनेकात्मकता शक्या तेकल्पयितुं दृष्टांताभावा
च्च यद्याकाशस्य सर्वगतत्वादिधर्मभेदः परिकल्प्यते परमाणुवादीनां गंधरसाद्यनेकगुणवत्वं तदपि निरूप्यमाणं परोपाधि
निमित्तमेव भवति आकाशस्य तावत्सर्वगतत्वं नाम न स्वतो धर्मोस्ति सर्वोपाधि [stain] संश्रयाद्धि सर्वत्र स्वेन रूपेण सत्वमपेक्ष्य
सर्वगतत्वव्यवहारो न तु आकाशः क्वचिद्गतो वा गतो वा स्वतो गमनं हि नाम देशांतरस्थस्य देशांतरेण संयोगकारणं सा च क्रि
नै यावयविशेषसंभवति। एवं धर्मभेदा नैव संत्याकाशे तथा परमाणवादावपि परमा [stain] णुर्नाम पृथिव्या गंधघनायाः [stain] परम
२९ सूक्ष्मावयवो गंधात्मक एव न तस्य पुनर्गंधवत्वं नाम शक्यते कल्पयितुं मथ तस्यैव रसादिकधर्मकत्वं स्यादिति चेन्न तत्राप्यवा
दिसंसर्गनिमित्तत्वात्तस्मान्न निरवयवस्य अनेकधर्मवत्वे दृष्टांतोस्ति एतेन दृगादिशक्तिभेदानां पृथक्क्लृप्तरूपादिभेदेन परिणामभेदक १२९
ल्पना प्रत्युक्ता जाग्रत्स्वप्नयोरिव यद्विज्ञानीयात्तद्वितीयं प्रविभक्तमन्यत्वेन नास्तीत्युक्तम् अतः सुषुप्तेन विज्ञानाति वि

वेति ४

शेषं ननु यद्यस्यायमेव स्वभावः किंनिमित्तमस्य विशेषविज्ञानं स्वभावपरित्यागेन ह्यभूद्विशेषविज्ञानमेवास्य स्वभावः
कस्मादेव विशेषं न जानातीत्युच्यते शृणु। यत्र यस्मिन् जागरिते स्वप्ने वान्यदिवात्मनो वस्त्वंतरमिवाविद्यया प्रत्युपस्थापितं भ
वति तत्राविद्याप्रत्युपस्थापितादन्योन्यमिवात्मानं मन्यमानः असत्यात्मनः प्रविभक्ते वस्त्वंतरे अन्योन्यस्सन्नन्यदुपलभे
तत [stain] द्यदन्विति स्वप्नप्रत्यक्षतो घ्नंतीव जिघ्रंतीति तथान्योन्यस्य रूपं न जिघ्रेदृसये ह देहं शृणुयाम त्वीतस्प नेहि ज्ञानीयादिति
यत्र पुनः सो विद्या सुषुप्ते वस्त्वंतरप्रत्युपस्थापिका शांता तेनान्यत्वेनाविद्याप्रविभक्तस्य वस्तुनोऽभावात् केन कं
पश्येज्जिघ्रेद्विजानीयाद्वा अतः स्वेनैव हि प्राज्ञेनात्मना स्वयंज्योतिः स्वभावेन संपरिष्वक्तः उपसंहृतकरणः समस्तः संप्रस
न्नः आप्तकामः आत्मकामः सलिलवत्स्वच्छीभूतः सलिलंच [stain] स्सलिलः एको द्वितीयस्याभावादविद्यया हि द्वितीयः प्रवि
भक्तः सा चेह शांता अतः एको द्रष्टा दृष्टेरविलुप्तत्वादात्मज्योतिःस्वभावायाः अद्वैतो द्रष्टव्यस्य द्वितीयस्याभावात् एतदमृतमभयमेष
ब्रह्मलोको ब्रह्मैव लोको ब्रह्मलोकः परमेवायमस्मिन्काले व्यावृत्तकार्यकरणोपाधिभेदः स्वेनात्मज्योतिषा शांतसर्वसं
बंधो वर्तते। हे सम्राडिति ह एवं ह एनं जनकमनुशशासानुशिष्टवान्याज्ञवल्क्य इति श्रुतिवचनमेतत्कथं वानुशशास एषास्य
विज्ञानमयस्य परमा गतिर्यास्त्वन्या देहग्रहणलक्षणा ब्रह्मादिस्तंबपर्यंता अविद्याकल्पितास्ता गतयः अतोऽस्य परमा विद्योपवि

षयत्वात् इयं तु देवत्वादिगतीनां कर्मविद्यासाध्यानां परमोत्तमा या समस्तात्मत्वो वा यत्र नान्यत्पश्यति नान्यच्छृणोति नान्य
द्विजानाति एषैव च परमा संपत् सर्वासां संपदां विभूतीनामियं परमा स्वाभाविकत्वादस्याः कृतका ह्यन्याः संपदस्तथैषो
स्य परमो लोकः ये न्ये कर्मफलाश्रया लोकास्तेस्यापरमाः अयं तु न केनचन कर्मणा मीयते स्वाभाविकत्वादेषोस्य परमो
लोकस्तथैषोस्य परम आनंदो यान्यन्यानि विषयेंद्रियसंबंधजनितान्यानंदजातानि तान्यपेक्ष्यैषोस्य परम आनंदो नित्य
३० त्वात् यो वै भूमा तत्सुखमिति श्रुत्यंतराद्यत्रान्यत्पश्यत्यन्यद्विजानाति तदल्पं मर्त्यममुख्यं सुखमिदं तु तद्विपरीतमत ए
षोस्य परम आनंदः एतस्यैवानंदस्य मात्रां कलामविद्याप्रत्युपस्थापितां विषयेंद्रियसंबंधकालविभाव्यामन्यानि भूता
न्युपजीवंति कानि तानि त एवानंदादविद्यया प्रविभज्यमानस्वरूपाण्यन्यत्वेन तानि ब्रह्मणः परिकल्प्यमानान्यन्यानि संउ
पजीवंति भूतानि विषयेंद्रियसंपर्कद्वारेण विभाव्यमानां यस्य परमानंदस्य मात्रावयवाः ब्रह्मादिभिर्मनुष्यपर्यंतैर्भूतै
रुपजीव्यंते तदानंदमात्रावयवद्वारेण मात्रिणं परमानंदमधिजिगमयिषन्नाह सैन्धवलवणशकलैरिव लवणशैलं स
यो मनुष्याणां मध्ये राद्धः संसिद्धो विकलः समग्रावयव इत्यर्थः । समृद्धः उपभोगोपकरणसंपन्नो भवति किं चान्येषां समा
नजातीयानामधिपतिः स्वतंत्रः पतिर्न मांडलिकः सर्वैः समस्तैर्मानुष्यकैरिति दिव्यभोगोपकरणनिवृत्त्यर्थं मनुष्याणामेव १३०

यानि भोगोपकरणानि तैः संपन्नानामप्यतिशयेन संपन्नतमः स मनुष्याणां परम आनंदस्तत्रानंदानंदिनोरभेदनिर्देशात्तुना
र्थांतरभूतत्वमित्येतत्परमानंदस्यैवेयं विषयविषय्याकारेण मात्रा प्रसृतेति हि युक्तं यत्र वा अन्यदिव स्यादित्यादिवाक्यांतरस्मा
धुक्तोयं स परम आनंद इत्यभेदनिर्देशः युधिष्ठिरादितुल्यो राजा चोदोर्दणे । दृष्टं मनुष्यानंदमादिं कृत्वा शतगुणोत्तरोत्तरक्र
मेण भूमीयपरमानंदं यत्र भेदो निवर्त्तते तमधिगमयति यत्रायमानंदः शतगुणोत्तरोत्तरक्रमेण वर्द्धमानो यत्र विवृद्धिकाष्ठामनु
भवति यत्र गणितभेदो निवर्त्तते अन्यदर्शनश्रवणमननाभावात्तं परमानंदं विवक्षन्नाह । अथ ये मनुष्याणां एवंप्रकाराः शतमा
नंदाः आनंदभेदाः स एकः पितॄणां तेषां विशेषणं जितलोकानामिति श्राद्धादिकर्मभिः पितॄन्तोषयित्वा तेन कर्मणा जिता लोका ये
षां ते जितालोकाः पितरः तेषां पितॄणां जितलोकानां मनुष्यानंदशतगुणीकृतपरिमाणः एक आनंदो भवति सोपि शतगुणीकृतो गंध
र्वलोके एक आनंदो भवति गंधर्वलोकानंदः शतगुणीकृतः कर्मदेवानामेक आनंदो भवति अग्निहोत्रादिश्रौतकर्मणा ये देवत्वं प्रा
प्नुवंति ते कर्मदेवाः तथैवाजानदेवानां एक आनंदः आजानत एवोत्पत्तित एव ये देवास्ते आजानदेवाः यश्च श्रोत्रियो धीतवेदः अवृ
जिनो वृजिनं पापं तद्रहितो यथोक्तकारीत्यर्थः अकामहतो वीततृष्णः आजानदेवेभ्यो र्वाक् यावंतो विषयास्तेषु तस्यैवं

बृ

न्तस्याजानदेवैः समानआनंदइत्युच्यते तदन्यात्कष्यते वशाट्टात्त्वछतगुणीकृतपरिमाणः प्रजापतिलोक एक आनंदो विराट्शरीरे
र तथात द्विज्ञानवांश्रोत्रियोधीतवेदश्चावृजिनइत्यादिपूर्ववत् तछतगुणीतपरिमाणोएक आनंदो ब्रह्मलोके हिरण्यगर्भ
ना ज्ञानियश्चेत्यादिपूर्ववदेवातः परंगणितनिवृत्तिरेष परमआनंदइत्युक्तोयस्यपरमआनंदस्य ब्रह्मलोकाद्यानंदा मात्राउदधेरिव
विप्रुषः एवंशतगुणोत्तरवृद्ध्युपेताः आनंदायत्रैकतांयांति यश्च श्रोत्रियः प्रत्यक्षः अथैष एव संप्रसादलक्षणः परमआनंदः
तत्र हिनान्यत्पश्यतिन्यच्छृणोत्यतो न्तसा न्तस त्वादमृतः इतरेतद्विपरीताः अत्र च श्रोत्रियत्वावृजिनत्वतुल्य अकामतो हेत्व
कृतोविशेषः आनंदशतगुणवृद्धिहेतुरेतानि साधनानि श्रोत्रियत्वावृजिनत्वाकामहतत्वानि तस्य तस्यानंदस्य प्राप्तावर्थं
दर्शितानि यथाकर्माण्यग्निहोत्रादीनि देवानां देवत्वप्राप्तौ। तत्र तत्र च श्रोत्रियत्वावृजिनत्वलक्षणे कर्मणी अधरस्तनभूमि
३१ ष्वपिसमानेइतिनोत्तरानंदप्राप्तिसाधनेअभ्युपेयते अकाम [illegible] हतत्वं तु वैराग्यतारतम्योपपत्तेरुत्तरोत्तरभूम्यानंदप्राप्ति
साधनमित्यवगम्यते स एष परमआनंदो विदुषः श्रोत्रियप्रत्यक्षोधिगत तथा च वेदव्यासः यच्च कामसुखं लोके यच्च दिव्यंम
हत्सुखं [illegible] तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलामिति। एष ब्रह्मलोकः हे सम्राडिति हो वाच १३१
याज्ञवल्क्यः। सोहमेवमनुशिष्टो भगवते तुभ्यं सहस्रं ददामि भगवानतऊर्ध्वं विमोक्षायैव ब्रूहि व्याख्यातमेतत्। अत्र हि वि

५

मोक्षायेत्यस्मिन्वाक्ये याज्ञवल्क्यो विनयं चकारलीतवान्। याज्ञवल्क्य भयकारणमाह श्रुतिः नयाज्ञवल्क्यो वक्तृत्व सामर्थ्या
न्नावाद्धीतवान्त्रानाद्वाकिं तर्हि मेधावी राजा सर्वेभ्यो [illegible] मामाम न्त्रेभ्यः प्रश्ननिर्णयावसाने भ्यः उदरो स्मीत
आवृणोनु अवरोधंकृतवानित्यर्थः। यदन्मयानि र्णीतं रूपं विमोक्षार्थं तत्रैकदेशत्वेनैव कामप्रश्नस्य गृहीत्वा पुनः पुनः
र्मा पर्यनुयुंक्त एवं मेधावित्वादित्येतद्भयकारणं सर्वमिदीयं विज्ञानं कामप्रश्नव्याजेनोपादित्सतीति। अत्र विज्ञानमयः स्वयंज्यो
तिरात्मा स्वप्नप्रदर्शितः स्वप्नांतबुद्धांतसंचारेण कार्यकरणव्यतिरिक्तता कामकर्मप्रविवेकश्चासंगतयामत्स्यदृष्टांतेन प्र
दर्शितः पुनश्चाविद्याकार्यः स्वप्नेवंध्नंतीवेत्यादिना प्रदर्श्य तमर्थादविद्यायाः सतत्वं निर्द्धारितं मतद्भ्रमोध्यारोपणरूप
त्वमनात्मधर्मत्वं च तथा विद्यायाश्चैवं प्रदर्शितं सर्वात्मभावः स्वप्न एव प्रत्यक्षतः सर्वोस्मीति मन्यते सोस्य परमो लोक इ
ति तत्र च सर्वात्मभावः स्वभावोस्य विद्याकामकर्मादिसर्वसंसारधर्मसंबंधातीतं रूपमस्य साक्षाद्व्युत्थे गृह्यते इत्ये
तन्न विज्ञापितं स्वयंज्योतिरात्मा एष परम आनंदः एष [illegible] विद्याया विषयः स एष परमः संप्रसादः सुखस्य च
पराकाष्ठेत्येतदेवमनेन ग्रंथेन व्याख्यातं तच्चैतत्सर्वं विमोक्षपदार्थस्य दृष्टांतभूतं बंधनस्य च नैवेतमोक्षवंधनेसहेतुके
सप्रपंचे निर्दिष्टे विद्याकार्यं तत्सर्वं दृष्टांतभूतमेवेति तद्दार्ष्टांतिकस्थानीये मोक्षवंधने सहेतुके कामप्रश्नार्थभूते लयाव

५ विद्या १

त २

कव्यइतिपुनःपर्यनुयुंक्तेजनकोऽहंभगवते इत्यादि विमोक्षायैवब्रूहीतितत्रमहामत्स्यवत्स्वप्नबुद्धांतावसंगःसंचरत्येकआत्मास्वयंज्यो
तिरित्युक्तंयथावासोकार्यकरणानिमृत्युरूपाणिपरित्यजन्नुपाददानश्चमहामत्स्यवत्स्वप्नबुद्धांतावनुसंचरतितथा
जायमानोम्रियमाणश्चेतरेवमृत्युरूपैःसंयुज्यतेवियुज्यतेवाहलोकपरलोकावनुसंचरतीति।संसरणंस्वप्नबुद्धांतानुसंचारदृष्टां
तस्यदार्ष्टांतिकत्वेनसूचितंतदिहविस्तरेणसनिमित्तंसंसरणंवर्णयितव्यमिति।तदर्थोयमारंभः तत्रचबुद्धांतात्स्वप्नांतम
यमात्मानुप्रवेशितः संप्रसादस्थानंमोक्षदृष्टांतभूतंततःप्रत्यावृत्तबुद्धांतेसंसारव्यवहारःप्रदर्शयितव्यइतितेना
स्यसंबंधः।सवैबुद्धांतात्स्वप्नांतक्रमेणसंप्रसन्नःएषरतस्मिन्संप्रसादेस्थित्वाततःपुनरीषत्प्रबु तःस्वप्नांतेरत्वाचरित्वे
७२ त्यादिपूर्ववद्बुद्धांतायैवाद्रव तिइतत्त्वास्यास्यसंसारोवर्ण्यतेयथायमात्मास्वप्नांताद्बुद्धांतमागतःएवमय मस्मा
द्देहाद्देहांतरंप्रतिपत्स्यतइत्याहात्रदृष्टांतंततत्रयथालोकेअनःशकटंसुसमाहितंसुष्टुभृशंवासमाहितंभांडोपस्कर
णेनोलूखलमुसलशूर्पपिठरादिनान्नाद्येनवसंपन्नंसंभारेणाक्रांतमित्यर्थःतथाभाराक्रांतंसदुत्सर्जनंशब्दंकुर्वद्यथा
यायाद्गच्छेच्छाकटिकेनाधिष्ठितंसदेवमेवयथोक्तोदृष्टांतोयंशारीरःशरीरेभवःकोसौलिंगात्मालिंगोपाधिःयःस्वप्नबुद्धां
तावविजन्ममरणाभ्यांपाप्मसंसर्गवियोगलक्षणाभ्यामिहलोकपरलोकावनुसंचरतियस्योत्क्रमणमनुप्राणाद्युत्क्र १३२

मणंसप्राज्ञेनपरेणात्मना स्वयंज्योतिःस्वभावेनात्मनान्वारूढोधिष्ठितोवभास्यमानस्तथाचोक्तमात्मनैवायंज्योतिषा
स्तेपल्ययतेइतिउत्सर्जन्याति तत्रचैतन्यात्मज्योतिषावभास्येलिंगेप्राणप्रधानेगच्छतितदुपाधिरप्यात्मागच्छतीवतथाचश्रु
त्यंतरंकस्मिन्न्वहमित्यादिध्यायतीवेतिवातएवोक्तंप्राज्ञेनात्म नान्वारूढइतिअन्यथाप्राज्ञेनैकीभूतःसकथंवत्कथमुत्स
र्जन्यातिलिंगोपाधि रात्माउत्सर्जन्मर्मसुनिकृत्यमानेषुदुःखवेदनयार्तःशब्दंकुर्वन्यातिगच्छतितत्कस्मिन्काल
इत्युच्यतेयत्रएतद्भवत्येतदितिक्रियाविशेषणमूर्द्ध्वोच्छ्वासीयत्रोर्द्ध्वोच्छ्वासित्वमस्यभवतीत्यर्थःदृश्यमानस्याप्यनुवदनं
वैराग्यहेतोरीदृशःकष्टःखल्वयंसंसारोयेनोत्क्रांतिकालेमर्मसुकृत्यमानेषुस्मृतिलोपोदुःखवेदनार्तस्यपुरुषार्थ
साधनप्रतिपत्तौवासामर्थ्यपरवशीकृतचित्तस्यतस्माद्यावदियमवस्थानागमिष्यतितावदेवपुरुषार्थसाधनकर्तव्य
तायामप्रमत्तोभवेदित्याह कारुण्यान्नश्रुतिः।तदस्योर्द्ध्वोच्छ्वासित्वंकस्मिन्कालेकिंनिमित्तंकथंवास्यादेतदित्युच्यतेसोयं ग
प्राकृतःशिरःपाण्यादिमान्पिंडोयत्रयस्मिंकालेयमणिमानमणोर्भावमणुत्वंकार्श्यमित्यर्थः।निएतिनिर्गच्छतिकिंनि
मित्तंजरयावास्वयमेवकालपक्वफलवज्जीर्णःकार्श्यतांगच्छतिउपतपतीत्युपतपन्ज्वरादिरोगस्तेनोपतपतावाउपतप्य
मानोहिरोगेणविषमाग्नितयान्नंभुक्तंनजरयति।ततोन्नरसेनानुपचीयमानःपिंडःकार्श्यतामापद्यते।तदुच्यते।उपतपतावेत

रिमाणं निगच्छति यदात्यंतकार्श्यं प्रतिपन्नो जरादिनिमित्तैस्तदोर्द्ध्वोछ्वासी भवति यदोर्द्ध्वोछ्वासी तदा[...]हितसंज्वारः शाकटवत्
उत्सर्जन्याति [...]ज्वरो रोगादिपीडनं कार्श्यतापत्तिश्च शरीरवतोऽवश्यंस्फाविनष्टेनर्था इति वैराग्यायेदमुच्यते यदा स
सुत्सर्जन्याति तदा कथं शरीरं विमुंचतीति दृष्टांत उच्यते तत्र यथाम्रफलं उदुंबरं वा फलं [...] पिप्पलं वाऽनेकदृष्टांतोपादा फलं विष
नं मरणस्यानियतनिमित्तत्वख्यापनार्थं अनियतानि हि मरणस्य निमित्तान्यसंख्यातानि च तदपि वैराग्यार्थमेव यस्माद
यमनेकमरणनिमित्तवांस्तस्मात्सर्वदा मृत्योरास्य एव वर्त्तत इति बंधनाद्बध्यते येन वृंतेन स बंधकारणो रसोऽयस्मिन्नाव
ध्यत इति वृंत एवोच्यते। बंधनं तस्माद्रसाद्वृंताद्वा बंधनात्प्रमुच्यते वातायनेकनिमित्तं एवमेवायं पुरुषो लिंगात्मा लिंगो
३३ पाधिरेभ्योंगेभ्यश्चक्षुरादिदेहावयवेभ्यः संप्रमुच्य सम्यग्निर्लेपेन प्रमुच्यते [...] मुमूर्षुगमनकाले दव प्राणेन रक्षन् किं तर्हि
सह वायुनोपसंहृत्य पुनः प्रतिन्यायं पुनः शब्दात्पूर्वमप्ययं देहाद्देहांतरमसकृद्गतवान् यथा स्वप्नबुद्धांतौ पुनः पुनर्गच्छ
ति तथा पुनः प्रतिन्यायं प्रतिगमनं यथागतमित्यर्थः। प्रतियोनि योनिं योनिं प्रति कर्मश्रुतादिवशादाद्रवति किमर्थं प्राणाये
व प्राणा[...]हायेत्यर्थः स प्राण एव हि गच्छति ततः प्राणायेति विशेषणमनर्थकं प्राणव्यूहाय हि गमनं देहांतरं प्रति तेन ह
स्य कर्मफलोपभोगार्थसिद्धिर्न प्राणसत्तामात्रेण तस्मात्तादर्थ्यार्थं युक्तं विशेषणं प्राणव्यूहायेति तत्रास्येदं शरीरं परित्य 133

बृ २

प्रत्येनासि पापकर्म्मणि नियुक्ताः ८

प्रगच्छति। नान्यस्य देहांतरस्योपादाने सामर्थ्यमस्ति देहेंद्रियविवियोगा[...]त्यः स्वप्नवत्यस्थानीयाः गृहमिव राज्ञे
शरीरांतरं कृत्वा प्रतीक्षमाणा विद्यंते [...]वं सति कथमस्य शरीरांतरोपादानमित्यु[...]सर्वं ह्य[...]स्य जगत्[...]फलो
पभोगसाधनत्वायोपात्तं स्वकर्मफलोपभोगाय चायं प्रवृत्तो देहाद्देहांतरं प्रतिपित्सुस्तस्मात्सर्वमेव जगत्स्वकर्मणा प्र
युक्तं तत्कर्मफलोपभोगयोग्यं साधनं कृत्वा प्रतीक्षत एव कृतं लोकं पुरुषोऽभिजायत इति श्रुते[...]स्वप्नाज्जागरितं प्रतिपि
त्सोस्तत्र कथमिति लोकप्रसिद्धो दृष्टांतो [...]राजानं राज्याभिषिक्तमायांतमायांतं स्वराष्ट्रे उग्राजातिविशेषाः क्रूरकर्मा
णो वा प्रत्येनसः प्रतिप्रत्येनसः तस्करादिदंडनादौ नियुक्ताः सूताः ग्रामण्यश्च सूतग्रामण्यः सूता[...]संकरजातिवि
शेषाः ग्रामण्यो ग्रामनेतारस्ते पूर्वमेव राज्ञ आगमनं बुद्ध्वा अन्नैर्भोज्यभक्ष्यादिप्रकारैः पानैर्म्मदिरादिभिरावसथैश्च प्रासादा
दिभिः प्रतिकल्पंते निष्पन्नैरेव प्रतीक्षते। अयं राजाऽऽयात्ययमागच्छतीति। एवमेव यथा दृष्टांतः एवं ह एवंविदं कर्म्मफ
लस्य वेदितारं संसारिणमित्यर्थः। कर्म्मफलं हि प्रस्तुतं तदेवं शब्देन परामृश्यते सर्वाणि भूतानि शरीरकर्तॄणि कर
णानुग्राहकाणि चादित्यादीनि तत्कर्म्मप्रयुक्तानि कृतैरेव कर्म्मफलोपभोगसाधनैः प्रतीक्षंते इदं ब्रह्म भोक्ता कर्त्तास्माकमाया
ति तथागच्छतीत्येवमेव कृत्वा प्रतीक्षंत इत्यर्थः तमेवं जिगमिषुं के सहगच्छंति [...]गच्छंतीति [...] तद्यथा प्रत्युन्ना आहोस्वि[...] कर्म

क्रि

वृक्षात्स्वयमेवगच्छतिपरलोकशरीरकर्तृणीवभूतानीत्युच्यतेदृष्टांतस्तद्यथाराजानंप्रयियासंतंप्रकर्षेणयातुमिच्छंतं
उग्राःप्रत्येनसःसूतग्रामण्यस्तएवाभिसमायंत्याभिमुख्येनसमायंत्येकीभावेनतमभिमुखाःआयंत्यनाहूताएवराज्ञाकेव
लंतदभिप्रायाभिज्ञाःएवमेवइममात्मानंभोक्तारमंतकालेमरणकालेसर्वेप्राणावागादयोभिसमायंतियत्रैतदूर्ध्वोच्छ्वा
सी [illegible] भवतीतिव्याख्यातं॥ ॥षष्ठाध्यायस्यतृतीयंब्राह्मणं॥ ॥सयत्रायमात्मासंसारोपवर्णनंप्रस्तुतंतत्रायंपुरुषःए
भ्योऽङ्गेभ्यःसंप्रमुच्येत्युक्तंतत्संप्रमोक्षणंकस्मिन्कालेकथंवेतिसविस्तरंसंसरणंवर्णयितव्यमित्यारभ्यतेसोयमात्मा
प्रस्तुतोयत्रयस्मिन्कालेअव [illegible] ल्यमबलभावंनिएत्यगत्वायद्देहस्यदौर्बल्यंतदात्मनएवदौर्बल्यमुप [illegible] चर्यतेअबल्यं
न्येत्यतिनह्यसावस्वतोमूर्त्तत्वादबलभावंगच्छति।तथासंमोहमिवसंमूढतांसंमोहोविवेकाभावःसंमोहतामिव [illegible] निगच्छ
१३४ तिनचास्यस्वतःसंमोहोऽसंमोहोवास्तिनित्यचैतन्यज्योतिःस्वभावत्वात्तेनेवशब्दःसंमोहमिवन्येतीतिउत्क्रांतिकालेहिक १३४
रणोपसंहारनिमित्तोव्याकुलीभावआत्मनइवलक्ष्यतेलौकिकैस्तथाचवक्तारोभवंतिसंमूढःसंमूढोयमितिवाऽभय
त्रैवशब्द [illegible] प्रयोगोयोज्यःवल्यमिवन्येत्यसंमोहमिवन्येतीति।उभयस्यपरोपाधिनिमित्तत्वाविशेषात्समानकर्तृकत्वमि
दंत्राद्यथास्मिन्कालेएतेप्राणावागादयःएनमात्मानमभिसमायंतितदास्यशारीरस्यात्मनोऽङ्गेभ्यःसंप्रमोक्षणंकेनवाप्र

[illegible]पुनः संप्रमोक्षणं मि

कारेणात्मानमभिसमायंतीत्युच्यतेसआत्माएताःतेजोमात्रास्तेजोवयवान्रूपादिप्रकाशकत्वाच्चक्षुरादीनिकरणानीत्यर्थः
ताएतासमभ्याददानःसम्यग्निर्लेपेनाददानःआभिमुख्येनाददानःसंहरमाणःस्वप्नापेक्षयाविशेषणंसमितिनतुस्वप्नेनि
र्लेपसम्यगादानमस्तित्यादानमात्रंगृहीतावाकृगृहीतंचक्षुरस्यलोकस्यसर्वावतोमात्रामपादायेत्यादिवाक्येभ्यः
हृदयमेवपुंडरीकाकाशमन्ववक्रामत्यन्वागच्छतिहृदयेऽभिव्यक्तविज्ञानोभवतीत्यर्थः।बुध्यादिविक्षेपोपसंहारेसतिनहित
स्यस्वतश्चल [illegible] नंविक्षेपोपसंहारादिविक्रियावाध्यायतीवलेलायतीवेत्युक्तत्वात्बुध्याद्युपाधिद्वारेवहिसर्वविक्रियाध्यारो
प्यतेतस्मिन्कालेपुनस्तस्यतेजोमात्राभ्यादानमित्युच्यते।सयत्रैषचक्षुषिभवश्चाक्षुषःआदित्यांशोभोक्तुःकर्मणाप्रयुक्तोया
वद्देहधारणंतावच्चक्षुषोनुग्रहंकुर्वन्वर्त्ततेमरणकालेत्वस्यचक्षुरनुग्रहंपरित्यजति।स्वमादित्यात्मानंप्रतिपद्यते।तदेतदुक्तं
यत्रास्यपुरुषस्यमृतस्याग्निंवागप्येतिवातंप्राणश्चक्षुरादित्यमित्यादिपुनर्देहग्रहणकालेसंश्रयिष्यंतितथास्वपतःप्रबुध्यत
श्चतदेतदाहचाक्षुषःपुरुषोयत्रयस्मिन्कालेपराङ्पर्यावर्त्ततेपरिसमंतात्परा [illegible] वर्त्ततइतिअथात्रास्मिन्कालेऽरूपज्ञो
भवतिमुमूर्षुः।रूपंन [illegible] जानातितदायमात्माचक्षुरादितेजोमात्राःसमभ्याददानोभवति।स्वप्नकालइवैकीभवतिकरणजातंस्व
लिंगात्मनातदैनंपार्श्वस्थाआहुर्नपश्यतीति [illegible] तथाघ्राणदेवतानिवृत्तौघ्राणमेकीभवतिलिंगात्म

नाव[illegible]न जिघ्रतीत्याहुः समानमन्यत् जिह्वायां सोमो वरुणो वा देवता तन्निवृत्त्यपेक्षया न रसयत इत्याहुः तथा न वदति न शृ
णोति न मनुते न स्पृशति न विजानातीत्याहुः। तदोपल[illegible]क्ष्यते देवतानिवृत्तिः करणानां च हृदय एकीभावस्तत्र हृदय उपसं
हृतेषु करणेषु योऽत्र व्यापारः स कथ्यते तस्य हैतस्य प्रकृतस्य हृदयस्य हृदयछिद्रस्येत्येतत् अग्रं नाडीमुखं निर्गमनद्वारं प्र
द्योतते। स्वप्नकाल इव स्वेन भासा तेजोमात्रादानकृतेन स्वेनैव ज्योतिषा आत्मनैव वर्त्तते नात्मज्योतिः प्रद्योतेन हृदयाग्रेणैष आत्मा
विज्ञानमयो लिंगोपाधिः निर्गच्छति निः क्रामति तथाथर्वणे कस्मिन्वहमुत्क्रांत उत्क्रांतो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठा
स्यामीति स प्राणमसृजतेति तेन ह्यात्मचैतन्यज्योतिः सर्वदाभिव्यक्ततरं तदुपाधिद्वारा ह्यात्मनि जन्ममरणगमनागमनादिसर्व
34 विक्रियादिलक्षणः संव्यवहारस्तदात्मकं हि द्वादशविधं करणं बुद्ध्यादि तत्सूत्रं तज्जीवनं सोऽन्तरात्मा जगतस्तस्थुषश्च तेन प्रद्योते 134
न [illegible] हृदयाग्रप्रकाशेन विनिष्क्रममाणः केन मार्गेण निष्क्रामतीत्युच्यते चक्षुष्टो वा आदित्यलोकप्राप्तिनिमित्तं ज्ञानं कर्म वा
नि यदि स्यान्मूर्ध्नो वा ब्रह्मलोकप्राप्तिनिमित्तं चेदन्येभ्यो वा शरीरदेशेभ्यः शरीरावयवेभ्यः यथाकर्म यथाश्रुतं तं विज्ञानात्मानमुत्क्रा
मंतं परलोकाय प्रस्थितं परलोकायोद्भूताकूतमित्यर्थः। प्राणः सर्वाधिकारिस्थानीयो राज्ञ इवानूत्क्रामति प्राणं चानूत्क्रामंतं वा
गादयः सर्वे प्राणा अनूत्क्रामंति यथाप्रधानान्वाचिख्यासेयं न तु क्रमेण सार्थवद्गमनमिह विवक्षितं तदैष आत्मा सविज्ञानो भ

वति स्वप्न इव विशेषविज्ञानवान्भवति कर्मवशात् न स्वतंत्रः स्वतंत्रश्चेत्स्यात्सर्वः कृतकृत्यः स्यान्नत्वेतल्लभ्य
ते अत एवाह व्यासः सदा तद्भावभावित इति कर्मणोद्भाव्यमानेनान्तःकरणवृत्तिविशेषाश्रितवासनात्मकविशेषविज्ञानेन
सर्वो लोक एतस्मिन्काले सविज्ञानो भवति सविज्ञानमेव च गन्तव्यमन्ववक्रामत्यनुगच्छति विशेषविज्ञानोद्भासितमेवेत्यर्थः।
तस्मात्तत्कालेस्वातंत्र्यार्थं योगधर्मानुसेवनं परिसंख्यानाभ्यासश्च विशिष्टपुण्योपचयश्च श्रद्दधानैः परलोकार्थिभिर
प्रमत्तैः कर्त्तव्य इति सर्वशास्त्राणां यत्नतो विधेयोऽर्थः दुश्चरिताच्चोपरमणं न हि तत्काले शक्यते किंचित्संपादयितुं कर्मणा
नीयमानस्य स्वातंत्र्याभावात् पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेत्युक्तं एतस्य ह्यनर्थस्योपशमोपायविधानाय सर्व
शाखोपनिषदः प्रवृत्ताः न हि तद्विहि[illegible]तोपायानुसेवनं मुक्त्वात्यंतिकोऽस्यानर्थस्योपशमोपायोऽस्ति तस्मात्तद्विहितोप
निषद्विहितोपाये यत्नपरैर्भवितव्यमित्येष प्रकरणार्थः। शाकटवत्संसृतः उत्सर्जन्यातीत्युक्तं किं पुनस्तस्य पर
लोकाय प्रवृत्तस्य पथ्यदनं शाकटिकसंभारार्थस्थानीयं गत्वा वा परलोके यद्भुंक्ते शरीराद्यारंभकं च यत्तत्किमित्युच्यते तं
परलोकाय गच्छंतमात्मानं विद्याकर्मणी विद्या च कर्म च विद्याकर्मणी विद्या सर्वप्रकारा विहिता [illegible] प्रतिषि
द्धा च तथा कर्म विहितं प्रतिषिद्धमविहितमप्रतिषिद्धं च समन्वारभेते सम्यगन्वारभेते अन्वालभेते अनुगच्छते पूर्वप्रज्ञा

वपूर्वानुभवविषया प्रज्ञा पूर्वप्रज्ञातीतकर्मफलानुभववासनेत्यर्थः ॥ ताश्च वासनाः अपूर्वकर्मारंभे कर्मविपाके चो
गानि भवंतितेनता अप्यन्वारंभंते। न हि ताभिर्वासनाभिर्विना कर्म कर्तुं फलं चोपभोक्तुं शक्यते। न ह्यनभ्यस्ते विषये कौ
शलमिंद्रियाणां संभवति पूर्वानुभववासनाप्रवृत्तानां त्विंद्रियाणामिहाभ्यासमंतरेण कौशलमुपपद्यते। दृश्यते च के
षांचित्कासुचित्क्रियासु चित्रकर्मादिलक्षणासु विने वेहाभ्यासेन जन्मत एव कौशलं कासुचिदत्यंतसौकर्ययुक्ता
स्वप्यकौशलं केषांचित् तथा विषयोपभोगेषु स्वभावत एव केषांचित्कौशलाकौशले दृश्येते तदेतत्सर्वं पूर्वप्रज्ञोद्भवानुद्भव
निमित्तं तेन पूर्वप्रज्ञया विना कर्मणि वा फलोपभोगे वा न कस्यचित्प्रवृत्तिरुपपद्यते तस्मादेतत्त्रयं शाकटिसंभारस्थानीयं परलो क
कपथ्यदनं विद्याकर्मपूर्वप्रज्ञाख्यं यस्माद्विद्याकर्मणी पूर्वप्रज्ञा च देहांतरप्रतिपत्त्युपभोगसाधनं। तस्माद्विद्याकर्मादिशु १३६
मेव समाचरेत्तथेष्टदेहसंयोगोपभोगोस्या ताभिरिति प्रकरणार्थः। किमेवं विद्यादिसंभारसंभृतो देहांतरं प्रतिपद्यमानो मु
क्त्वा पूर्वदेहं पक्षीव वृक्षांतरं देहांतरं प्रतिपद्यतेऽथवातिवाहिकेन शरीरांतरेण कर्मफलजन्मदेशं नीयते किंवा तत्रस्थस्यै
व सर्वगतानां करणानां वृत्तिलाभो भवत्याहोस्विच्छरीरस्थस्य संकुचितानि करणानि मृतस्य भिन्नघटप्रदीपप्रकाशवत्सर्वतो
व्याप्य पुनर्देहांतरारंभे संकोचमुपगच्छंति किंवा मनोमात्रं वैशेषिकसमयवद्देहांतरारंभदेशं प्रतिगच्छति किंवा कल्पनांतरमे

व वेदांतसमय इत्युच्यते। त एते सर्व एव समाः सर्वेऽनंता इति श्रुतेः सर्वात्मकानि तावत्करणानि सर्वात्मकप्राणसंश्रया
त्तेषामाध्यात्मिकाधिभौतिकपरिच्छेदः प्राणिकर्मज्ञानभावनानिमित्तोऽतस्तद्वशात्स्वभावतः सर्वगतानामनंतानाम
पि प्राणानां कर्मज्ञानवासनानुरूप्येणैव देहांतरारंभवशात्प्राणानां वृत्तिः संकुचति विकसति च तथा चोक्तं समः प्लुषिणा समो को
मशकेन समो नागेन समो नेन सर्वेणेति तथा चेदं वचनमनुकूलं स यो हैताननंतानुपास्त इत्यादि तं यथा यथोपासत इति च
तत्र वासना पूर्वप्रज्ञाख्या विद्याकर्मतंत्रा जलूकावत्संतता एव स्वप्नकाल इव कर्मकृतं देहाद्देहांतरमारभते हृदयस्थैव पुनर्देहां
तरारंभे देहांतरं पूर्वाश्रयं विमुंचतीत्येतस्मिन्नर्थे दृष्टांत उपादीयते तत्र देहांतरसंचार इदं निदर्शनं यथा येन प्रकारेण तृणज
लायुका तृणजलूका तृणस्यांतमवसानं गत्वा प्राप्यान्यं तृणांतरमाक्रममाक्रम्याक्रम्यत इत्याक्रमस्तमाक्रम्याश्रित्या
त्मानमात्मनो पूर्वावयवमुपसंहरत्यंत्यावयवसंस्थाने एवमेवायमात्मायः संसारी इदं शरीरं पूर्वोपात्तं निहत्य स्वप्नप्रति
पित्सुरिव पातयित्वा विद्यां मेगमयित्वाऽचेतनं कृत्वा स्वात्मोपसंहारेणान्यमाक्रमं तृणांतरमिव तृणजलूका शरीरांतरं गृहीत्वा नरं
प्रसारितया वासनयात्मानमुपसंहरति तत्रात्मभावमारभते यथा स्वप्ने देहांतरस्थ इव शरीरारंभदेशे व्याप्रियमाणोंऽगमेस्था दे हे
वेरेव तत्र स्वकर्मवशात्करणानि लब्धवृत्तीनि संहन्यंते वाह्यं च कुशमृत्तिकास्थानीयं शरीरमारभ्यते तत्र च करणव्यूहमपे

स्य वा गान्धर्वस्य वा प्राजापत्याद्दिदेवताः संश्रयते एवं देहांतरारंभविधि [illegible] देहांतरारंभे नित्योपा
त्तमेवोपादानमुपमृद्योपमृद्य देहांतरमारभते आ संसारमोक्षादपूर्वमेव पुनः पुनरादत्त इत्युच्यते दृष्टांतस्तत्र एतस्मिन्नर्थे य
था पेशस्कारी पेशः सुवर्णं तत्करोतीति पेशस्कारी सुवर्णकारः पेशसः सुवर्णस्य मात्रामपादायापच्छिद्य गृहीत्वान्यत्पू
र्वस्माद्रचनाविशेषा[illegible]न्नवतरमभिनवतरं कल्याणात्कल्याणतरं रूपं तनुते निर्मिनोति एवमेवायमात्मेत्यादि पूर्व
वन्नित्योपात्तानि पृथिव्यादीन्याकाशांतानि पंचभूतानि द्वे वाव ब्रह्मणो रूपे इति चतुर्थे व्याख्यातानि पेशस्थानीयानि ता
न्युपमृद्योपमृद्यान्यदन्यच्च देहांतरं नवतरं कल्याणतरं रूपं संस्थानविशेषं कुरुते देहान्तरमित्यर्थः पित्र्यं वा पितृभ्यो हितं
पितृलोकोपभोगयोग्यमित्यर्थः गांधर्वं गंधर्वाणामुपभोगयोग्यं तथा देवानां दैवं प्रजापतेः प्राजापत्यं ब्रह्मण इदं ब्राह्मं वा
यथाकर्म यथाश्रुतं अन्येषां वा भूतानां संबंधि शरीरांतरं कुरुते इत्यभिसंबध्यते [illegible]स्य बंधनसंज्ञका उपाधिभेदेन तादात्म्य संयुक्तो
स्तन्मयोयमिति विभाव्यते ते पदार्थाः पुंजीकृत्येह एकत्र इति निर्दिश्यंते स वा अयं य एवं संसरत्यात्मा ब्रह्मैव पर एव योऽश
नायाद्यतीतो विज्ञानमयो विज्ञानं बुद्धिस्तेनोपलक्ष्यमाणस्तन्मयः कतम आत्मेति योयं विज्ञानमयः प्राणेष्विति ह्युक्तं
विज्ञानमयो विज्ञानप्रायो यस्मात्तद्धर्मत्वमस्य विभाव्यते ध्यायतीव लेलायतीवेति तथा मनोमयो मनःसन्निकर्षान्म

नोमयस्तथा प्राणमयः प्राणः पंचवृत्तिस्तन्मयो येन चेतनश्चलतीव लक्ष्यते तथा चक्षुर्मयो रूपदर्शनकाले एवं श्रोत्रमयः श्रो
त्रश्रवणकाले एवं तस्य तस्येंद्रियस्य व्यापारोद्भवे तत्तन्मयो भवति एवं बुद्धिप्राणद्वारेण चक्षुरादिकरणमयः संछरीरारं
भकपृथिव्यादिभूतमयो भवति। तत्र पार्थिवशरीरारंभे पृथिवीमयो भवति। तथा वरुणादिलोकेष्वाप्यशरीरारंभे आपोमयो
भवति। तथा वायव्यशरीरारंभे वायुमयो भवति। तथाकाशशरीरारंभे आकाशमयो भवति। एवं तैजसानि देवशरीराणि तेष्वारभ्य
मानेषु तन्मयस्तेजोमयो भवत्यतो व्यतिरिक्तानि पश्वादिशरीराणि नरकप्रेतादिशरीराणि वा तेजोमयानि तान्यपेक्ष्याह अतेजो
मय इति एवं कार्यकरणसंघातमयः सन्नात्मा प्राप्तव्यं वस्त्वंतरं पश्यन्निदं मया प्राप्तं प्राप्तव्यमित्येवं विपरीतप्रत्ययः तदभिला
षः काममयो भवति तस्मिन्कामे दोषं पश्यतस्तद्विषयाभिलाषप्रशमे चित्तं प्रसन्नमकलुषं शांतं भवति। तन्मयोऽकाममयः एवं त
स्मिन्विहते कामे केनचित्स कामः क्रोधत्वेन परिणमते तेन तन्मयो भवेत् क्रोधमयः स क्रोधः केनचिदुपायेन निवर्त्तितो यदा भवति
तदा प्रसन्नमनाकुलं चित्तं सदक्रोध उच्यते ततः तन्मयः एवं कामक्रोधाभ्यामकामक्रोधाभ्यां च तन्मयो भूत्वा धर्ममयो धर्ममयश्च भ
वति। नहि कामक्रोधादिभिर्विना धर्मादिप्रवृत्तिरुपपद्यते। यद्यद्धि कुरुते कर्म तत्तत्कामस्य चेष्टितमिति स्मरणाद्धर्ममयोऽधर्ममय
श्च भूत्वा सर्वमयश्च भवति। समस्तं धर्माधर्मयोः कार्यं यावत्किंचिद्व्याकृतं तत्सर्वं धर्माधर्मयोः फलं तत्प्रतिपद्यमानस्तन्मयो

भवति किं बहुना तदेतत्सिद्धमस्य यदयमिदंमयो गृह्यमाणविषयादिमयस्तस्मादयमदोमयः अद इति परोक्षं। कार्येण गृह्य
माणेनानिर्दिश्यते अनंता हि ते करणात्मभावनाविशेषाः नैव ते विशेषतो निर्देष्टुं शक्यंते। तस्मिंस्तस्मिन्क्षणे कार्यतोऽवगम्य
ते इदमस्य हृदि वर्त्तते अदोऽस्येति गृह्यमाणकार्येणेदंमयतया निर्दिश्यते परोक्षोऽतस्तो व्यवहारोऽयमिदानीमदोमय इति संक्षेप
तस्तु यथाकर्तुं यथाचरितुं शीलमस्य सोऽयं यथाकारी यथाचारी स तथा भवति करणं नाम नियता क्रिया विधिप्रतिषेधादिग
म्या चरणं नामानियतमिति विशेषः साधुकारी साधुर्भवतीति यथाकारीत्यस्य विशेषणं पापकारी पापो भवतीति च यथाचारीत्य
स्य ताच्छील्यप्रत्ययोपादानादत्यंततात्पर्यतैव तन्मयत्वं न तु तत्कर्ममात्रेणेत्याशंक्याह पुण्यः पुण्येन कर्मणा भवति पापः पापे
नेति पुण्यपापकर्ममात्रेणैव तन्मयता स्यान्न तु ताच्छील्यमपेक्षते ताच्छील्ये तु तन्मयत्वातिशय इत्ययं विशेषः तत्र का
मक्रोधादिपूर्विका पुण्यापुण्यकारिता सर्वमयत्वे हेतुः संसरस्य कारणं देहाद्देहांतरसंचारस्य चैतत्प्रयुक्तो ह्यन्यदन्य १३८
द्देहांतरमुपादत्ते तस्मात्पुण्यापुण्ये संसारस्य कारणमेतद्विषयौ हि विधिप्रतिषेधौ अत्र शास्त्रस्य साफल्यमिति अ
त्रान्ये बंधमोक्षकुशलाः खल्वाहुः सत्यं कामादिपूर्वके पुण्यापुण्ये शरीरग्रहणकारणं तथापि कामप्रयुक्तो हि पुरुषः
पुण्यापुण्ये कर्मणी उपचिनोति कामप्रहाणे तु कर्म विद्यमानमपि पुण्यापुण्योपचयकरं न भवति उपचितेऽपि पुण्यापुण्ये

कर्मणी कामशून्ये फलारंभके न भवतः तस्मात्काम एव संसारस्य मूलं तथा चोक्तमाथर्वणे कामान्यः कामयते
मन्यमानः स कामभिर्जायते तत्र तत्रेति। तस्मात्काममय एवायं पुरुषो यदन्यमयत्वं तदकारणं विद्यमानमपीत्यतोऽवधारयति।
काममय एवेति यस्मात्स च काममयः सन्यादृशेन कामेन यथाकामो भवति तत्क्रतुर्भवति स कामः ईषदभिलाषमात्रेणाभिव्य
क्तो यस्मिन्विषये भवति सोऽविहन्यमानः स्फुटीभवन्क्रतुत्वमापद्यते क्रतुर्नाम व्यवसायो निश्चयो यदनंतरा क्रिया प्रवर्त्तते यत्
क्रतुर्भवति यादृक्काम[illegible]कार्येण क्रतुना यथारूपः क्रतुरस्य सोऽयं यत्क्रतुर्भवति तत्कर्म कुरुते यद्विषयः क्रतुस्तत्फलनिर्वृत्तये यद्यो ये
ग्यं कर्म तत्कुरुते निर्वर्त्तयति यत्कर्म कुरुते तदभिसंपद्यते तदीयं फलमभिसंपद्यते तस्मात्सर्वमयत्वेऽस्य संसारित्वे च काम ए
व हेतुरिति तस्मिन्नर्थ एष श्लोको मंत्रोऽपि भवति। तदेवेति तदेव गच्छति सक्तः आसक्तः तत्रोद्भूताभिलाषः सन्नित्यर्थः कथमिति स
ह कर्मणा य[illegible]त्कर्मफलासक्तः सन्नकरोत् इति तेन कर्मणा सहैव तदेति तत्फलमेति किं तत् लिंगं मनो मनःप्रधानत्वाल्लिंगस्य म
नो लिंगमित्युच्यते। अथवा लिंग्यते गम्यते अवगच्छतीत्येन तल्लिंगं तन्मनो यत्र यस्मिन्निषक्तं निश्चयेन सक्तमुद्भूताभिलाष
मस्य तदभिलाषो हि तत्कर्म कृतवान् तस्मात्तन्मनोऽभिषंगवशाद्देवास्य तेन कर्मणा तत्फलप्राप्तिस्तेन तत्सिद्धं भवति। कामो मूलं
संसारस्येति अतः उच्छिन्नकामस्य विद्यमानान्यपि कर्माणि ब्रह्मविदो अबंधप्रसवानि भवंति पर्याप्तकामस्य कृतात्मनश्च इहैव

भवतिकिंबहुनातदेतत्सिद्धमस्ययदयमिदंमयोगृह्यमाणविषयादिमयस्तस्मादयमदोमयः अदइतिपरोक्षं।कार्येणगृह्य
माणेननिर्दिश्यते।अनंताह्यंतःकरणेभावनाविशेषाः नैवतेविशेषतोनिर्देष्टुंशक्यंते।तस्मिंस्तस्मिन्क्षणेकार्यतोवगम्य
तेइदमस्यहृदिवर्त्ततेदोस्येतितेनगृह्यमाणकार्येणेदंमयतयानिर्दिश्यतेपरोक्षोतस्तोव्यवहारायमिदानीमदोमयइतिसंक्षेप
तस्तुयथाकर्तुंयथावाचरितुंशीलमस्यसोयंयथाकारीयथाचारीसतथाभवतिकरणंनामनियताक्रियाविधिप्रतिषेधादिग
म्याचरणंनामानियतमितिविशेषः साधुकारीसाधुर्भवतियथाकारीत्यस्यविशेषंपापकारीपापोभवतीतिचयथाचारीत्य
स्यताच्छील्यप्रत्ययोपादानादत्यंततात्पर्यतैवतन्मयत्वंनतुतत्कर्ममात्रेणेत्याशंक्याहपुण्यः पुण्येनकर्मणाभवतिपापः पापे
नेतिपुण्यपापकर्ममात्रेणैवतन्मयतास्यान्नतुताच्छील्यमपेक्षतेताच्छील्येतुतन्मयत्वातिशयइत्ययंविशेषः तत्रका
मक्रोधादिपूर्विकापुण्यापुण्यकारितासर्वमयत्वेहेतुः संसारस्यकारणंदेहाद्देहांतरसंचारस्यचैतत्प्रयुक्तोह्यन्यदन्य १३८
द्देहांतरमुपादत्तेतस्मात्पुण्यापुण्येसंसारस्यकारणमेतद्विषयौहिविधिप्रतिषेधावत्रशास्त्रस्यसाफल्यमिति।अ
थान्येबंधमोक्षकुशलास्त्वाहुः सत्यंकामादिपूर्वकेपुण्यापुण्येशरीरग्रहणकारणंतथापिकामप्रयुक्तोहिपुरुषः
पुण्यापुण्येकर्मण्युपचिनोतिकामप्रहाणेतुकर्मविद्यमानमपिपुण्यापुण्योपचयकरंनभवत्युपचितेपिपुण्यापुण्ये

कर्मणिकामशून्येफलारंभकेनभवतस्तस्मात्कामएवसंसारस्यमूलंतथाचोक्तमाथर्वणेकामान्यः कामयते
मन्यमानः सकामभिर्जायतेतत्रतत्रेति।तस्मात्काममयएवायंपुरुषोयदन्यमयत्वंतदकारणंविद्यमानमपीत्यतोवधारयति
काममयएवेतियस्मात्सचकाममयः सन्यादृशेनकामेनयथाकामोभवतितत्क्रतुर्भवतिसकामईषदभिलाषमात्रेणाभिव्य
क्तोयस्मिन्विषयेभवतिसोऽविहन्यमानः स्फुटीभवन्क्रतुत्वमापद्यतेक्रतुर्नामव्यवसायोनिश्चयोयदनंतराक्रियाप्रवर्त्ततेयत्
क्रतुर्भवतियादृक्काम[illegible]कार्येणक्रतुनायथारूपः क्रतुरस्यसोयंयत्क्रतुर्भवतितत्कर्मकुरुतेयद्विषयः क्रतुस्तत्फलनिर्वृत्तयेयद्यो ये
ग्यंकर्मतत्कुरुतेनिर्वर्त्तयतियत्कर्मकुरुतेतदभिसंपद्यतेतदीयंफलमभिसंपद्यतेतस्मात्सर्वमयत्वेऽस्यसंसारित्वेचकामए
वहेतुरितितदस्मिन्नर्थएषश्लोकोमंत्रोपिभवति।तदेवेतितदेवगच्छतिसक्तः आसक्तः तत्रोद्भूताभिलाषः सन्नित्यर्थः कथमेतिस
हकर्मणाय[illegible]त्कर्मफलासक्तः सन्नुकरोतितेनकर्मणासहैवैतदेतितत्फलमेतिकिंतत्लिंगंमनोमनः प्रधानत्वाल्लिंगस्यम
नोलिंगमित्युच्यते।अथवालिंग्यतेगम्यतेवगच्छतियेनतल्लिंगंतन्मनोयत्रयस्मिन्निषक्तंनिश्चयेनसक्तमुद्भूताभिलाष
मस्यतदभिलाषोहितत्कर्मकृतवान्तस्मात्तन्मनोभिषंगवशादस्यतेनकर्मणातत्फलप्राप्तिस्तेनेतत्सिद्धंभवति।कामोमूलं
संसारस्येत्यतः उच्छिन्नकामस्यविद्यमानान्यपिकर्माणिब्रह्मविदोवंध्यप्रसवानिभवंतिपर्याप्तकामस्यकृतात्मनइहैव

सर्वंप्रविलीयंतिर्किमादृतिश्रुतेः । किंच प्राप्यान्तं कर्मणः प्राप्य तु त्कांतमवसानं यावत्कर्मणः फलपरिसमाप्तिं कृत्वेत्यर्थः । क
स्य कर्मणो [illegible] त्वं प्राप्येत्युच्यते । तस्य यत्किंच कर्मेह ह्यस्मिंल्लोके करोति निर्वर्त्तयत्ययं तस्य कर्मणः फलं भुक्त्वांतं प्राप्य तस्मा
ल्लोकात्पुनरेत्यागच्छत्यस्मै लोकाय कर्मणेयं हि लोकः कर्मप्रधानस्तेनाह कर्मण इति पुनः कर्मकरणाय पुनः कर्मकृ
त्वा फलासंगवशात्पुनरमुं लोकं यातीत्येवमिति नु एवन्नु कामयमानः संसरति यस्मात्कामयमान एवैवं संसरत्यथत
स्मादकामयमानो न क्वचित्संसरति फलासक्तस्य गतिरुक्ता [illegible] कामस्य हि क्रियानुपपत्तेरकामयमानो मुच्यत एव क
२ थं पुनरकामयमानो भवति यः अकामो भवत्यसावकामयमानः कथमकामतेत्युच्यते यो निष्कामो यस्मान्निर्गताः कामाः
सोयं निःकामः कथं कामा निर्गच्छंतीत्य आप्तकामो भवत्याह यः कामायेन स आप्तकामः कथमाप्यंते कामाः आत्मकामत्वे १३९
न यस्यात्मैव नान्यः कामयितव्यो वस्त्वंतरभूतः पदार्थो भवति आत्मैवानंतरोवाह्यः कृत्स्नः प्रज्ञानघन एकरसो नोर्द्ध्वंति
र्यग्नाधश्चात्मनोन्यत्कामयितव्यं वस्त्वंतरं यस्य यस्मिन्सर्वमात्मैवाभूत्तत्केन कं पश्येच्छृणुयान्मन्वीत विजानीयाद्वा एवं
विजानन्कथं कामयेत ज्ञायमानो ह्यन्यत्वेन पदार्थः कामयितव्यो भवति न चासावन्यो ब्रह्मविदः आप्तकामस्यास्ति य एवा
त्मकामः स निष्कामो कामयमानश्चेति मुच्यते न हि यस्यात्मैव सर्वं भवति तस्यानात्मा कामयितव्योस्ति अनात्मा वान्यः का

कामतयाप्त॰ अकामो॰

नं

यितव्यः सर्वं चात्मैवाभूदिति विप्रतिषिद्धं सर्वात्मदर्शिनः कामयितव्याभावान्न कर्मानुपपत्तिः ये तु प्रत्यवायपरिहारार्थं क
कल्पयंति ब्रह्मविदोपि तेषां नात्मैव सर्वं भवति प्रत्यवायस्य जिहासितव्यस्यात्मनोऽन्यस्याभिप्रेतत्वात् येन चाशनायाद्य
तीतो नित्यं प्रत्यवायासंबंधी विदितः आत्मा तं वयं ब्रह्मविदं ब्रूमो नित्यमेवाशनाद्यतीतमात्मानं पश्यति यस्माज्जिहासितव्यम
मुपादेयं वा यो न पश्यति तस्य कर्म न शक्यत एव संबंद्धुं यस्त्वब्रह्मवित्तस्य भवत्येव प्रत्यवायपरिहारार्थं कर्मेति न विरोधः अ
कामात्भावादकामयमानो न जायते मुच्यत एव तस्यैवमकामयमानस्य कर्माभावे गमनकारणाभावान्न प्राणा वागादयो नोत्क्रा मेत
तिदेहात् । स च विद्वानाप्तकाम आत्मकामतया इहैव ब्रह्मभूतः सर्वात्मनो हि ब्रह्मणो दृष्टांतत्वेन प्रदर्शितं रूपं तद्वाक्यस्यैतदा
कामं आत्मकाममकामं रूपमिति तस्य हि दार्ष्टांतिकभूतोयमर्थः उपसंह्रियते । अथाकामयमान इत्यादिना स कथमेवंभूतो
च्यत इति उच्यते यो हि सुषुप्तावस्थमिव निर्विशेषमद्वैतमलुप्तचिद्रूपज्योतिःस्वभावमात्मानं पश्यति तस्यैवाकामयमानस्य क
र्माभावे गमनकारणाभावात्प्राणा वागादयो नोत्क्रामंति किंतु विद्वान्स इहैव ब्रह्म यद्यपि देहवानिव लक्ष्यते स ब्रह्मैव सन्ब्र
ह्माप्येति यस्मान्न हि तस्याब्रह्मत्वपरिच्छेदहेतवः कामाः संति तस्मादिहैव ब्रह्मैव सन्ब्रह्माप्येति न शरीरपातोत्तरकालं
हि विदुषो मृतस्य भावांतरापत्तिर्जीवतोन्यो भावो देहांतरप्रतिसंधानाभावमात्रेण तु ब्रह्माप्येतीत्युच्यते भावांतरापत्तौ

सर्वं प्रविलीयते इति किं माद्रूतिश्रुतेः। किं च प्राप्यान्तं कर्मणः प्राप्य तु अन्तमवसानं यावत्कर्मणः फलपरिसमाप्तिं इत्यर्थः। क
स्य कर्मणो ऽन्तं प्राप्येत्युच्यते। तस्य यत्किंच कर्म इहास्मिं लोके करोति निर्वर्त्तयति अयं तस्य कर्मणः फलं भुक्त्वांतं प्राप्य तस्मा
ल्लोकात्पुनरेति आगच्छति अस्मै लोकाय कर्मणे। यं हि लोकः कर्मप्रधानस्तेन आह कर्मणे इति पुनः कर्मकरणाय पुनः कर्म कृ
त्वा फलासंगवशात्पुनरमुं लोकं याति इत्येवमिति नु एवं नु कामयमानः संसरति यस्मात्कामयमान एवैवं संसरति अथ त
स्मादकामयमानो न क्वचित्संसरति फलासक्तस्य गतिरुक्ता कामस्य हि क्रियानुपपत्तेरकामयमानो मुच्यत एव क
२ थं पुनरकामयमानो भवति यः अकामो भवत्यसावकामयमानः कथमकामतेत्युच्यते यो निष्कामो यस्मान्निर्गताः कामाः
सोयं निःकामः कथं कामा निर्गच्छंति य आप्तकामो भवति आप्ताः कामा येन स आप्तकामः कथमाप्यंते कामाः आत्मकामत्वे
न यस्यात्मैव नान्यः कामयितव्यो वस्त्वंतरभूतः पदार्थो भवति आत्मैवानंतरो ऽबाह्यः कृत्स्नः प्रज्ञानघन एकरसो नोर्द्ध्वं ति १३८
र्यग्नाधः आत्मनो ऽन्यत्कामयितव्यं वस्त्वंतरं यस्य यस्मिन्सर्वमात्मैवाभूत्तत्केन कं पश्येच्छृणुयान्मन्वीत विजानीयाद्वा एवं
विजानन्कथं कामयेत् ज्ञायमानो ह्यन्यत्वेन पदार्थः कामयितव्यो भवति न चासावन्यो ब्रह्मविदः आप्तकामस्यास्ति य एवा
त्मकामः स निष्कामो ऽकामयमानश्चेति मुच्यते न हि यस्यात्मैव सर्वं भवति तस्यानात्मा कामयितव्यो ऽस्ति अनात्मा चान्यः का

कामतयाप्ता॰ अकामो॰

नर्ष

यितव्यः सर्वं चात्मैवाभूदिति विप्रतिषिद्धं सर्वात्मदर्शिनः कामयितव्याभावात् कर्मानुपपत्तिः ये तु प्रत्यवायपरिहारार्थं क
ल्पयंति ब्रह्मविदो ऽपि तेषां नात्मैव सर्वं भवति प्रत्यवायस्य जिहासितव्यस्यात्मनो ऽन्यस्याभिप्रेतत्वात् येन चाशनायाद्य
तीतो नित्यं प्रत्यवायासंबंधी विदितः आत्मा तं वयं ब्रह्मविदं ब्रूमो नित्यमेवाशनायाद्यतीतमात्मानं पश्यति यस्माज्जिहासितव्यम
मुपादेयं वा यो न पश्यति तस्य कर्म न शक्यत एव संबंद्धुं यस्त्वब्रह्मवित्तस्य भवत्येव प्रत्यवायपरिहारार्थं कर्मेति न विरोधः
कामाभावादकामयमानो न जायते मुच्यत एव तस्यैवमकामयमानस्य कर्माभावे गमनकारणाभावात् प्राणा वागादयो नोत्क्रा
मंति देहात्। स च विद्वानाप्तकाम आत्मकामतया इहैव ब्रह्मभूतः सर्वात्मनो हि ब्रह्मणो दृष्टांतत्वेन प्रदर्शितं रूपं तद्वा अस्यैतदा
प्तकाममात्मकाममकामं रूपमिति तस्य हि दार्ष्टांतिकभूतो ऽयमर्थः उपसंह्रियते। अथाकामयमान इत्यादिना स कथमेवंभूतो
च्यत इति उच्यते यो हि सुषुप्तावस्थमिव निर्विशेषमद्वैतमलुप्तचिद्रूपज्योतिः स्वभावमात्मानं पश्यति तस्यैवाकामयमानस्य क
र्माभावे गमनकारणाभावात्प्राणा वागादयो नोत्क्रामंति किंतु विद्वान्स इहैव ब्रह्म यद्यपि देहवानिव लक्ष्यते स ब्रह्मैव सन्ब्र
ह्माप्येति यस्मान्न हि तस्याब्रह्मत्वपरिच्छेदहेतवः कामाः संति तस्मादिहैव ब्रह्मैव सन्ब्रह्माप्येति न शरीरपातोत्तरकालं
हि विदुषो मृतस्य भावांतरापत्तिर्जीवतो ऽन्यो भावो देहांतरप्रतिसंधानाभावमात्रेणैव तु ब्रह्माप्येतीत्युच्यते भावांतरापत्तौ

मोक्षस्य सर्वोपनिषद्विवक्षितोऽर्थ आत्मैकत्वाख्यः स बाधितो भवेत् कर्महेतुकश्च मोक्षः प्राप्नोतीति तन्नानिमित्तमिति स चानिष्टो
ऽनित्यत्वं च मोक्षस्य प्राप्नोति नहि क्रियानिर्वृत्तो धर्मो नित्यो दृष्टो नित्यश्च मोक्षोऽभ्युपगम्यते एष नित्यो महिमेति मन्त्रवर्णाच्च
स्वाभाविकस्य तावदन्यन्नित्यत्वं कल्पयितुं शक्यं स्वाभाविकश्चेदभ्युष्णवदात्मनः स्वभावः स न शक्यते पुरुषव्यापारानु
भावीति वक्तुं न ह्यग्नेरौष्ण्यं प्रकाशो वाग्निव्यापारा नुभावी स्वाभाविकश्चेति विप्रतिषिद्धं।
ज्वलनव्यापारानुभावित्वमुष्णप्रकाशयोरिति चेन्नानुपलब्धिव्यवधानापगममात्रव्यञ्जकापेक्षत्वात् ज्वलनादिपूर्वमग्नि क
उष्णप्रकाशगुणाभ्यामभिव्यज्यते ततस्त्वाग्न्यपेक्षया किं तर्ह्यन्यदृष्टेरग्नेरौष्ण्यप्रकाशौ धर्मौ व्यवहितौ कस्यचिद्दृष्ट्याऽत्व छि
४० संबध्यमानो ज्वलनापेक्षया व्यवधानापगमे दृष्टेरभिव्यज्येते तदपेक्षया भ्रान्तिरुपजायते ज्वलनपूर्वकावेतावुष्णप्रकाशौ
धर्मजातावितिरुष्णप्रकाशयोरपि स्वाभाविकत्वं न स्यादिति यः स्वाभाविकोऽग्नेर्धर्मस्तमुदाहरिष्यामः नच स्वाभाविको १४
वद धर्म एव नास्ति पदार्थानामिति शक्यं वक्तुं नच निगडभङ्गवदात्मनो मोक्षो बंधननिवृत्तिरूप उपपद्यते। परमात्मैकत्वाभ्यु
पगमादेकमेवाद्वितीयमिति श्रुतेर्नचान्यो बंधोऽस्ति यस्य निगडनिवृत्तिवद्बंधननिवृत्तिर्मोक्षः स्यात् परमात्मव्यतिरेकेणान्य
स्याभावं विस्तरेणावादिष्म अतोऽविद्यानिवृत्तिमात्रे मोक्षव्यवहार इति वाच्यं। रज्ज्वादौ सर्पादिज्ञाननिवृत्तौ सर्पादिनि

तर किं २

वृत्तिवदिति यदप्याचक्षते मोक्षे विज्ञानमानन्दान्तरं वाभिव्यज्यत इति तैर्वक्तव्योऽभिव्यक्तिशब्दार्थः यदि तावल्लौकिक्येवोपलब्धि
ता विषयप्राप्तिरभिव्यक्तिशब्दार्थस्ततो वक्तव्यं विद्यमानमभिव्यज्यतेऽविद्यमानमिति वा विद्यमानं चेद्यस्य मुक्तस्य तद
भिव्यज्यते तस्यात्मभूतमेव तदिति उपलब्धिव्यवधानानुपपत्तेर्नित्याभिव्यक्तत्वान्मुक्तस्याभिव्यज्यत इति विशेषवचन
मनर्थकं स्यात् कदाचित्तु अभिव्यज्यते तदुपलब्धिव्यवधानादनात्मभूतं तदित्यन्यतोऽभिव्यक्तिप्रसंगः तथा चाभिव्यक्तिसाधना
पेक्षता उपलब्धिसमानाश्रयत्वे तु व्यवधानकल्पनानुपपत्तेः सर्वदाभिव्यक्तिर्नवाभिव्यक्तिर्वा न त्वन्तरालकल्पनायां प्रमा
णमस्ति न च समानाश्रयाणामेकस्यात्मभूतानां धर्माणामितरेतरविषयविषयित्वं संभवति ज्ञानसुखयोश्च प्रागभिव्यक्तेः छि
संसारित्वमभिव्यक्त्युत्तरकालं च मुक्तत्वं यस्य सोऽन्यः परस्मान्नित्याभिव्यक्तज्ञानस्वरूपादत्यन्तवैलक्षण्याच्छैत्यमिवौ
ष्ण्यात् परमात्मभेदकल्पनायां च वैदिकः कृतान्तः परित्यक्तः स्यात् मोक्षस्येदानीमिव निर्विशेषत्वे तदर्थाधिकयत्नानुपप
त्तिः शास्त्रवैयर्थ्यं च प्राप्नोत्यातीति चेन्नाविद्याश्रमापोहार्थत्वात् न हि वस्तुतो मुक्तामुक्तत्वविशेषोऽस्त्यात्मनो नित्यैकरूप
त्वात् किं तु तद्विषयाऽविद्यापोह्यते शास्त्रोपदेशजनितविज्ञानेन प्राक्तदुपदेशप्राप्तेस्तदर्थश्च प्रयत्न उपपद्यत एवाविद्याव
तोऽविद्यानिवृत्त्यनिवृत्तिकृतो विशेष आत्मनः स्यादिति चेन्नाविद्याकल्पनाविषयत्वाभ्युपगमाद्रज्जूषरशुक्तिकागग

ले५

नानासर्पादिकरजतमलिनत्वादिवद्दोषइत्यवोचाम तिमिरातिमिरदृष्टिवदविद्याकर्तृत्वात् कर्तृत्वकृतत्वादात्मनोविशे
षःस्यादितिचेन्न ध्यायतीवलेलायतीवेतिश्रुतेः विद्याकर्तृत्वस्यप्रतिषिद्धत्वादनेकव्यापारसन्निपातजनितत्वाच्चाविद्या
त्मस्यविषयत्वोपपत्तेश्च यस्यचाविद्यात्मनोघटादिवद्विविक्तोगृह्यतेसनाविद्यात्मवान् नत्वज्ञानेमुग्धोस्मीतिप्रत्यय
दर्शनादविद्यात्मवत्वमेवेतिचेन्न तस्यापिविवेकग्रहणात्तद्विषयोयस्यविवेकेनगृहीतासतस्मिन्नात्मनि तदित्युच्यते । तस्यैवि २४
वेकग्रहणंतस्मिन्नेववर्त्तमइतिविप्रतिषिद्धं नज्ञानेमुग्धोस्मीतिदृश्यतइतिवद्वीक्षितद्दृशिनिश्चात्ज्ञानंमुग्धरूपताद्
श्यतइतिचतदर्शनस्यविषयंसंभवतिकर्मतामापद्यतइति । तत्कथंकर्मभूतंसत्कर्तृस्वरूपदृशिविशेषणमज्ञानमुग्ध
स्यातामथदृशिविशेषणत्वंतयोः कथंकर्मस्यातां । दृशिनाव्याप्यतेकर्माहिकर्तृक्रिययाव्याप्यमानंभवत्यन्यच्च १४१
याप्यमन्यद्व्यापकंनतेनैवतद्व्याप्यतेवदकथमेवंसत्यज्ञानमुग्धतेदृशिविशेषणेस्यातां नचाज्ञानविवेकदर्शि
नामात्मनःकर्मभूतमुपलभमानः उपलब्धिधर्मत्वेनगृह्णातिशरीरस्यकार्श्यरूपादिवत् । तथासुखदुःखेच्छा
प्रयत्नादीन्सर्वोलोकोगृह्णातीतिचेन्न [illegible] तथाग्रहीतुर्लोकस्याविविक्ततैवाभ्युपगतास्यात्तेभ्यः नज्ञानेदंत्वदुक्तंमु
ग्धएवेतिचेन्न तत्वज्ञोमुग्धोयंत्वेवंदर्शीतंज्ञमुग्धंप्रतिजानीमहेवयंतथाव्यासेनोक्तंइच्छादिकृत्स्नंक्षेत्रीप्रकाशयतीति

पि२

स ५ ५

समंसर्वेषुभूतेषुतिष्ठंतंपरमेश्वरंविनश्यत्स्वविनश्यंतमित्यादिशतशोक्तं । तस्मान्नात्मनःस्वतोबंधमुक्तज्ञानाज्ञानकृतो
विशेषोस्ति सर्वदासमैकरसस्वाभाव्याभ्युपगमात् । येत्वतोन्यथात्मवस्तुपरिकल्प्यबंधमोक्षादिशास्त्रंचार्थवादमापाद
यंतितेउत्सहंतेखेपिशाकुनंपदंद्रष्टुंखंवामुष्टिनाकृष्टुंचर्मवद्वेष्टितुंवयंतुतत्कर्तुमशक्ताः सर्वदासमैकरस [illegible] मद्वैत
मविक्रियमजमजरममृतमभयमात्मतत्वंब्रह्मैवास्मीत्येषसर्ववेदांतनिश्चितोर्थइत्येवंप्रतिपद्यामहेतस्माद्ब्रह्मात्माप्तेतिस्तु
पचारमात्रमेतद्विपरीतग्रहवद्देहसंततेर्विच्छेदमात्रंविज्ञानफलमपेक्ष्यस्वप्नबुद्धांतगमनदृष्टांतस्यदार्ष्टांतिकःसंसारोवर्णि
तःसंसारहेतुश्चाविद्याकर्मपूर्वप्रज्ञावर्णितायैश्चोपाधिभूतैःकार्यकरणलक्षणैर्भूतैःपरिवेष्टितःसंसारित्वमनुभवतितानि
चोक्तानि । तेषांसाक्षात्प्रयोजकोधर्माधर्माविति पूर्वपक्षंकृत्वाकामएवेत्यवधारितंयथाचब्राह्मणेनायमर्थोवधारितए
वंमंत्रेणापीतिबंधंबंधकारणंचोक्त्वोपसंहृतंप्रकरणमितितुकामयमानइतिअथाकामयमानइत्यारभ्यसुषुप्तदृष्टांतस्यदा
र्ष्टांतिकभूतःसर्वात्मभावोमोक्षउक्तः । मोक्षकारणंचात्मकामतयायदाप्तकामत्वमुक्तंनतुसामर्थ्यात्अनात्मज्ञानमंतरेणात्मका म तयाप्त
मत्वमितिसामर्थ्याद्ब्रह्मविद्यैवमोक्षकारणमित्युक्तमतोयद्यपिकामोमूलमित्युक्तं । तथापिमोक्षकारणविपर्ययेणबंधकार
णमविद्येत्यादप्युक्तमेवभवतिअत्रापिमोक्षोमोक्षसाधनंचब्राह्मणेनोक्तंतस्यैवदृढीकरणायमंत्रउदाह्रियतेश्लोकश्चाद्

वाच्यः तस्मिन्नेवार्थेएषश्लोकोमंत्रोभवतियदायस्मिन्कालेसर्वेसमस्ताः कामास्तृष्णाप्रभेदाः प्रमुच्यंते आत्मकामस्य। ब्रह्म
विदः समूलतोविशीर्यंतेयेप्रसिद्धालोकइहामुत्रार्थाः पुत्रवित्तलोकैषणालक्षणाअस्यप्रसिद्धस्यपुरुषस्यहृदिबुद्धौश्रि
ताआश्रिताः अथतदामर्त्योमरणधर्मासन्कामवियोगात्समूलतोमृतोभवतिअर्थादनात्मविषयाः कामाः अविद्याल
क्षणामृत्युरित्येतदुक्तंभवतिअतोमृत्युवियोगोविद्वांजीवंन्नेवामृतोभवत्यत्रास्मिन्नेवशरीरेवर्त्तमानोब्रह्मसमश्नुते
ब्रह्मभावंमोक्षंप्रतिपद्यतइत्यर्थः। अतोमोक्षोनदेशांतरगमनाद्यपेक्ष्यतेतस्माद्विदुषोनोत्क्रामंतिप्राणाः यथावस्थिता
एवस्वकारणेपुरुषेसमवनीयंतेनाममात्रंह्यवशिष्यतइत्युक्तंकथंपुनः समवनीतेषुप्राणेषुदेहेचस्वकारणेप्रलीनेवि
२ द्वान्मुक्तोत्रैवसर्वात्मासन्वर्त्तमानः पुनः पूर्ववद्देहित्वंसंसारित्वलक्षणंनप्रतिपद्यत इत्यत्रोच्यते।तत्रायंदृष्टांतोयथा
लोकेअहिः सर्पस्तस्यनिर्ल्वयनीनिर्मोकः साहिनिर्ल्वयनीवल्मीकेसर्पाश्रयेवल्मीकादावित्यर्थः।प्रत्यस्ताप्रक्षिप्ताना १४२
त्मभावेनसर्प्पेणपरित्यक्ताशयीतवर्त्तेत एवमेवयथायंदृष्टांतइदंशरीरंसर्पस्थानीयेनमुक्तेनानात्मभावेनपरित्यक्तंमृत
मिवशेतेअथेतरः सर्पस्थानीयोमुक्तः सर्वात्मभूतः सर्पव [illegible] त्तत्रैववर्त्तमानोप्यशरीरएवनपूर्ववत्पुनः सश
रीरोभवतिकामकर्मप्रयुक्तेनशरीरात्मभावेनहिपूर्वंसशरीरोमर्त्यश्चतद्वियोगादथेदानीमशरीरोतएवचामृतः प्राणः प्राणितीति

री२

तै२

ति प्राणः प्राणस्यप्राणमितिहिवक्ष्यमाणेश्लोकेप्राणबंधनंहिसोम्यमनइतिचश्रुत्यंतरेप्रकरणवाक्यसामर्थ्याच्चपरएवात्माप्रश
णशब्दः ब्रह्मैवपरमात्मैवकिंपुनस्तत्तेजएवतेजोविज्ञानंज्योतिर्येनात्मज्योतिषाजगदवभास्यमानंप्रज्ञानेत्रं विज्ञानज्योतिष्मत्स
दविक्रियमाणंसदेववर्त्तते यः कामप्रश्नोविमोक्षार्थोयाज्ञवल्क्येनवरोदत्तोजनका[illegible]कायस्सहेतुकोबंधमोक्षार्थलक्षणोदृष्टांतदार्ष्टांतिकरू
पः सएषनिर्णीतः सविस्तरोजनकयाज्ञवल्क्याख्यायिकारूपधारिण्याश्रुत्यासंसारविमोक्षोपायउक्तः प्राणिभ्यइदानींश्रुतिः
स्वयमेवाहविद्यानिष्क्रियार्थंजनकेनैवमुक्तमितिकथंसोहमेवंविमोक्षितस्त्वयाभगवतेतुभ्यंविद्यानिःक्रयार्थंसहस्रंददामीतिहप पं
वंकिलउवाचोक्तवान्जनकोहवैदेहः [illegible]कस्माद्विमोक्षपदार्थेनिर्णीतेविदेहराज्यमात्मानमेवचननिवेदयत्येकदेशोक्ताविव
वसहस्रमेवददातितत्रकोभिप्रायइत्यत्रकेचिद्वर्णयंतिअध्यात्मविद्यारसिकोजनकः श्रुतमप्यर्थंपुनर्मंत्रैः शुश्रूषतेततो
नसर्वमेवनिवेदयतिशुश्रूषाभिप्रेतंयाज्ञव [illegible] त्पुनरंतेनिवेदयिष्यामीतिहिमन्यतेयस्मिन्नेवसर्वंनिवेदयामिनिवृत्ताभि
लाषोयंश्रवणादितितस्माच्छ्लोकानवक्ष्यतीतिचकयात्सहस्रदानंशुश्रूषालिंगज्ञापनायेतिसर्वमप्येतदसत्पुरुषस्य
प्रमाणभूतायाः श्रुतेर्व्याजानुपपत्तेरर्थवादत्वोपपत्तेश्चविमोक्षपदार्थेउक्तेप्यात्मज्ञानसाधनआत्मज्ञानशेषभूतः
सर्वैषणापरित्यागः संन्यासाख्योवक्तव्योर्थविशेषोविद्यतेतस्माल्लोकमात्रशुश्रूषाकल्पनानृज्वीअगतिकाहिग

तै२

ति: पुनरुक्तार्थकल्पनासाम्याद्युक्तासत्यां गतौ न च तत्कृतिमात्रमित्यवोचाम एवं सत्यत ऊर्ध्वं विमोक्षायैवेति वक्तव्यं
न पदोषः। आत्मज्ञानवदप्रयोजकः संन्यासः पक्षे प्रतिपत्तिकर्मवदिति मन्यते संन्यासेन तनुं त्यजेदिति स्मृतेः साधनत्वप
क्षेपि नात ऊर्ध्वं विमोक्षायेति प्रश्नमर्हति मोक्षसाधनभूतात्मज्ञानपरिपाकार्थत्वात्तदा[illegible]कामस्य ब्रह्मविदो मोक्ष इ
त्यतस्मिन्नर्थे मंत्रब्राह्मणोक्तविस्तरप्रतिपादकाः एते श्लोका भवंति। अणुः सूक्ष्मः पंथा दुर्विज्ञेयत्वात् विततो विस्तीर्णो वि
स्तरणहेतुत्वाद्वा वितर इति पाठांतरात् मोक्षसाधनो ज्ञानमार्गः पुराणश्चिरंतनो नित्यश्रुतिप्रकाशितत्वान्न तार्किकबु
द्धिप्रभवकुदृष्टिमार्गवदर्वाक्कालिको मां स्पृष्टो मां स्पृष्टः मया लब्ध इत्यर्थः यो हि येन लभ्यते स तं स्पृशतीव संबध्यते तेना
यं ब्रह्मविद्यालक्षणो मोक्षमार्गो मया लब्धत्वात् मां स्पृष्ट इत्युच्यते न केवलं मया लब्धः किं त्वनुवित्तो मयैवानुवेदनं ना
म विद्यायाः परिपाकापेक्षया फलावसानता निष्ठाप्राप्तिः भुजेरिव तृप्त्यवसानता पूर्वं तु ज्ञानप्राप्तिसंबंधमात्रमेवेति विशेषः वि १४३
मसावेवं मंत्रदृगेको ब्रह्मविद्याफलं प्राप्तो नान्यः प्राप्तवानयेनानुवित्तो मयैवेत्यवधारयति न पदोषोऽस्याः फलमात्मसाक्षि
कमनुत्तममिति ब्रह्मविद्यायाः स्तुतिपरत्वाद्देवं हि कृतार्थात्माभिमानकरमात्मप्रत्ययसाक्षिकमात्मज्ञानं किमतः परमन्यत्स्या
दिति ब्रह्मविद्यां स्तौति। ननु पुनरन्यो ब्रह्मवित्तत्फलं न प्राप्नोतीति। तद्यो यो देवानामिति सर्वार्थश्रुतेः सत्यं बाढं तेन ब्रह्मविद्या

पिंगलमन्ये २

मार्गेण धीराः प्रज्ञावंतोन्येपि ब्रह्मविद इत्यर्थः। अपियंत्यपिगच्छंति ब्रह्मविद्याफलं मोक्षं स्वर्गं लोकं स्वर्गलोकशब्दस्त्रिविष्ट
पवाच्यपि सन्निह प्रकरणान्मोक्षा[illegible]भिधायकः इतोस्माच्छरीरपातादूर्ध्वं जीवंत एव विमुक्ताः संतः तस्मिन्मोक्षसाधनमार्गे
विप्रतिपत्तिर्मुमुक्षूणां कथं तस्मिन् शुक्लं शुद्धं विमलमाहुः केचिन्मुमुक्षवो नीलमन्ये हरितं लोहितं च यथादर्शनं नाड्यस्त्वेताः सु
षुम्नाद्याः श्लेष्मादिरसपूर्णाः शुक्लस्य नीलस्य पिंगलस्येत्याद्युक्तार्थत्वाददादित्यं वा मोक्षमार्गमेवंविधं मन्यंते एष शुक्ल एष
नील इत्यादिश्रुत्यंतराद्दर्शनमार्गस्य च शुक्लादिवर्णासंभवात् सर्वथापि तु प्रकृताद्ब्रह्मविद्यामार्गादन्ये एते शुक्लादयः न तु
शुक्लः शुद्धो द्वैतमार्गो न नीलपीतादिशब्दैर्वर्णवाचकैः सहानुद्रवणान्याद्धक्तादीन्योगिनो मोक्षपदमाहुः न ते मोक्षमार्गाः
संसारविषया एव हि ते च [illegible]स्तुष्ठो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्य इति शारीरदेशा[illegible]न्निःसरणसंबंधात्सूर्यादिलोकप्रा
पका हि ते तस्मादयमेव मोक्षमार्गो य आत्मकामत्वेनाप्तकामतया सर्वकामक्षये तत्रैव गमनानुपपत्तेः प्रदीपनिर्वाणवत् चक्षुरादी
नां कार्यकरणानामत्रैव समवनयः इत्येष ज्ञानमार्गः पंथा ब्राह्मणा परमात्मस्वरूपेणैव ब्राह्मणेन त्यक्तसर्वैषणेनानुवित्तो न त्व
न्यविद्यामार्गेण ब्रह्मविदन्योप्येतीति कीदृशो ब्रह्मवित्तेनेतीत्युच्यते पूर्वं पुण्यकृत्वा पुनस्त्यक्तपुत्राद्येषणः परमात्मतेजस्या
त्मानं संयोज्य तस्मिन्नभिनिर्वृत्तस्तैजसः आत्मभूतः इहैव सर्व[illegible]इदानीं ब्रह्मवित् तेन मार्गेणेति न तु पुनः पुण्यादिसमुच्चयकारि

ण्य हणं विरोधादित्यवोचाम। अपुण्यपुण्योपरमयं पुनरुक्तवनिर्वया:॥ शांता: सन्यासिनो यांति तस्मै मोक्षात्मने नम इति
स्मृते: सत्यधर्ममधर्मं चेत्यादिपुण्यापुण्यत्यागोपदेशान्निराशिषमनारंभं तं निर्नमस्कारमस्तुतिं अक्षीणं क्षीणकर्माणं तं
देवा ब्राह्मणं विदु: एतादृशं ब्राह्मणस्यास्ति वित्तं यथैकताससमता सत्यता च शीलं स्थितिर्दंडनिधानमार्जवं ततस्ततश्चो
परम: क्रियाभ्य इत्यादिस्मृतिभ्यश्च उपदेक्ष्यंति वेहाप्येष नित्यो महिमा ब्राह्मणस्य न वर्द्धते कर्मणा नो कनीयानि
ति कर्मप्रयोजनाभावहेतुमुक्त्वा तस्माद् ब्राह्मण: शांतो दांत इत्यादिना सर्वक्रियोपरमं दर्शयति तस्मादेष यथाव्याख्यात ए
व पुण्यकृत्तमश्च यो ब्रह्मवित्ते तेनैति स पुण्यकृत्तैजसश्चेति ब्रह्मवित्स्तुतिरेषा पुण्यकृति तैजसे च योगिनि माहात्म्य
४ ग्यं प्रसिद्धं लोके ताभ्याम तो ब्रह्मवित्स्तूयते प्रख्यातमाहात्म्यत्वाल्लोके अदर्शनात्मकं तम: संसारनियामकं प्रविशंति प्र
तिपद्यंते के य अविद्यां विद्यातोऽन्यां साध्यसाधनलक्षणामुपासते कर्मानुवर्त्तंत इत्यर्थस्तत स्तस्मादपि भूय इव बहुतरमिव तम: प्र १४४
विशंति के ये उ विद्यायां अविद्यावस्तुप्रतिपादिकायां कर्मार्थायां त्रय्यामेव विद्यायां रता: अभिरता: विधिप्रतिषेधपर एव वेदो
नान्योस्तीत्युपनिषदर्थानपेक्षिण इत्यर्थ: यदिते अदर्शनलक्षणं तम: प्रविशंति को दोष इत्युच्यते। अनंदा अनानंदा असु
खा नाम ते लोकास्तेनांधेनादर्शनलक्षणेन तमसावृता व्याप्तास्ते तस्याज्ञानतमसो गोचरांस्तान् प्रेत्य मृत्वा अभिगच्छंत्यभियांति

के ये अविद्वांस: किं सामान्येनाविद्वत्तामात्रेण नेत्युच्यते अबुधो बुध अवगमार्थस्य धातो: क्विप् प्रत्ययांतस्य रूपं आत्मावग
मवर्जिता इत्यर्थ: जना: प्राकृता एव जननधर्माणो वेत्येतदात्मानं स्वं परं सर्वप्राणिमनीषितज्ञं हृत्स्थमकामकायादि
धर्मातीतं चेद्यदि विजानीयात्सहस्रेषु कश्चिदित्यात्मविद्या दुर्लभत्वं दर्शयति कथमयं पर आत्मा सर्वप्राणिप्रत्यय
साक्षी यो नेति नेत्याद्युक्तो यस्मान्नान्योस्ति द्रष्टा श्रोता मंता विज्ञाता समः सर्वभूतस्थो नित्यशुद्धबुद्धमुक्तस्वभावोस्मीत्यवमी ५८
ति पूरुष: पुरुष: किमर्थं तत्स्वरूपव्यतिरिक्तमन्यत्वस्तु फलभूतं किमिच्छन् कस्य वान्यस्यात्मनो व्यतिरिक्तस्य कामा
य प्रयोजनाय न हि तस्यात्मन एष्टव्यं फलं न वाप्यात्मनोऽन्यास्ति यस्य कामायेच्छति सर्वस्यात्मभूतत्वादत: किमिच्छन् कस्य
वा कामाय शरीरमनुसंज्वरेदनु शरीरोपाधिकृतदु:खमनुदु:खी स्यात् शरीरतापमनुतप्येत अनात्मदर्शिनो हि त
द्व्यतिरिक्तवस्त्वंतरेप्सोर्ममेदं स्यात्पुत्रस्येदं भार्याया इदमित्येवमीहमान: पुन: पुनर्जननमरणप्रबंधारूढ: शरीररोग
मनुज्वरते सर्वात्मदर्शिनस्तु तदसंभव इत्येतदाह। किं च यस्य ब्राह्मणस्यानुवित्तोऽनुपलब्ध: प्रतिबुद्ध: साक्षात्कृत: कथमहम
स्मि परं ब्रह्मेत्येवं प्रत्यगात्मत्वेनावगत: आत्मा अस्मिन् संदेह्ये संदेहे अनेकानर्थसंकटोपचये गहने विषमेऽनेकशतसहस्र
विवेकविज्ञानप्रतिपक्षे विषमे प्रविष्ट: स यस्य ब्राह्मणस्यानुवित्त: प्रतिबोधेनेत्यर्थ: स विश्वकृत् विश्वस्य कर्ता कथं विश्वकृत्त्वं

तस्य किन्नाममात्रमेवेत्याशंक्याह। स हि यस्मात्सर्वस्य कर्त्ता न नाममात्रं न केवलं विश्वकृत्परप्रयुक्तः सन् किं तर्हि तस्य लो
कः सर्वः किमन्यो लोकोन्योसावित्युच्यते। लोकश्चात्मैवात्मोच्यते। तस्य सर्व आत्मा सर्वस्यात्मेत्यर्थः। य एष ब्राह्मणेन प्रत्य
गात्मप्र तिबुद्धतयानुवित्त आत्मानर्थसंकटे गहने प्रविष्टः स न संसारी किंतु पर एव यस्माद्विश्वस्य कर्त्ता सर्वस्यात्मा तस्य चैवा
त्मा परः स एवाद्वितीयः पर एवास्मीति मंत्रव्यवहृतिश्लोकार्थः॥ ॥किंच इहैवानेकार्थसंकुले संतोऽनर्थवंतोऽज्ञानदीर्घनिद्राहिताः स
न्तः कथंचिदिव ब्रह्मतत्त्वमात्मत्वेनाथ विद्मो विजानीमस्तदेतद्ब्रह्म प्रकृतमहो वयं कृतार्था इत्यभिप्रायो यदेतद्ब्रह्म विजानीमः तच्चे
द्विदितवंतो वयं वेदनं वेदो वेदोस्यास्तीति वेदी वेद्येव वेदिः न वेदिरवेदिस्ततोहमवेदिः स्यां यद्यवेदिः स्यां को दोषः स्यात् महती अनंतप
रिमाणा जन्ममरणादिलक्षणा विनष्टिः विनशनमहो वयमस्मान्महतो विनशनान्निर्मुक्ता यदेतद्ब्रह्म विदितवंत इत्यर्थः। य
था वयं ब्रह्म विदित्वास्माद्विनशनाद्विप्रमुक्ता एवं ये तद्विदुरमृतास्ते भवंति ये पुनर्नैवं ब्रह्म विदुस्त इतरे ब्रह्मविद्भ्योन्ये ब्रह्मविद १४५
इत्यर्थः दुःखमेव जन्ममरणादिलक्षणमेवापियंति प्रतिपद्यंते न कदाचिदप्यविदुषां ततो विनिवृत्तिरित्यर्थः। दुःखमेव हि त आत्मत्वे
नोपगच्छंति यदा पुनरेतमात्मानं कथंचित्परमकारुणिकं कंचिदाचार्यं प्राप्य ततो लब्धप्रसादः सन्ननुपश्चात्पश्यति साक्षात्करोति स्वमा
त्मानं देवं द्योतनवंतं दातारं वा सर्वप्राणिकर्मफलानां यथाकर्मानुरूपमंजसा साक्षादीशानं स्वामिनं भूतभव्यस्य कालत्रयस्येत्येतन्

न ततस्तस्मादीशानाद्देवादात्मानं विशेषेण जुगुप्सते गोपायितुमिच्छति सर्वो हि लोक ईश्वराद्गुप्तिमिच्छति एकदर्शी न विभेति कुतश्चना
तो न तदा विजुगुप्सते यदेशानं देवमंजसात्मत्वेन पश्यति न तदा निंदति वा कंचित्सर्वमात्मानं हि पश्यति स एवं पश्यन् कमसौ निंद्यात्॥ ॥
किंच यस्मादीशानादर्वाक् यस्मादन्यविषय एवेत्यर्थः। संवत्सरः कालात्मा सर्वस्य जनिमतः परिच्छेत्तायमपरिच्छिद्यमानोऽर्वागेव वर्त्तते अहोभिः
स्वावयवैरहोरात्रैरित्यर्थः। तं देवा ज्योतिषां ज्योतिरादित्यादिज्योतिषामप्यवभासकत्वादायुरित्युपासते देवा अमृतं ज्योतिरतोन्य
म्रियंते हि ज्योतिः सर्वस्य हि तज्ज्योतिरायुरायुर्गुणेन यस्माद्देवास्तज्ज्योतिरुपासते तस्मादायुष्मंतस्ते तस्मादायुष्कामेनायुर्गुणेनोपा
स्यममृतं ब्रह्मेत्यर्थः॥ ॥किंच यस्मिन्यत्र ब्रह्मणि पंचजनाः गंधर्वादयः पंचैव संख्याताः गंधर्वाः पितरो देवा असुरा रक्षांसि निषादपं
चमा वा वर्णा आकाशश्चाव्याकृताख्यो यस्मिन्सूत्रमोतं च प्रोतं च यस्मिन्प्रतिष्ठित एतस्मिन्नु खल्वक्षरे गार्ग्याकाश इत्युक्तं तमेवात्मा
नममृतं ब्रह्म मन्ये अहं न चाहमात्मानं ततोन्यत्वेन जाने किं तर्हि अमृतोऽहं ब्रह्म विद्वान्सन्न ज्ञानमात्रेण तु मर्त्योहमासं तदपगमाद्विद्वानहम
मृत एव॥ ॥किंच तेन हि चैतन्यात्मज्योतिषावभास्यमानः प्राण आत्मभूतेन प्राणिति तेन प्राणस्यापि प्राणः तं प्राणस्य प्राणं तथा च
क्षुषोपि चक्षुरुत श्रोत्रस्यापि श्रोत्रं ब्रह्मशक्त्यधिष्ठितानां हि चक्षुरादीनां दर्शनादिसामर्थ्यं स्वतः काष्ठलोष्टसमानि हि तानि चैतन्या
त्मज्योतिःशून्यानि मनसोपि मन इति ये विदुश्चक्षुरादिव्यापारानुमितास्तित्वं प्रत्यगात्मानं न विषयभूतं ये विदुस्ते किं निचिक्युर्निश्चयेन

ज्ञानवंतो ब्रह्मपुराणं चिरंतनमग्र्यमग्रे चवं तद्यदात्मविदो विदुरिति ह्याथर्वणे॥ ॥तद्ब्रह्मदर्शने साधनमुच्यते। मनसैव परमार्थ
ज्ञानसंस्कृतेनाचार्योपदेशपूर्वकं चानुद्रष्टव्यं तत्र च दर्शनविषये ब्रह्मणि नेह नानास्ति किंचन किंचिदप्यसति नानात्वे नानात्वमध्या
रोपयत्यविद्यया स मृत्योर्मरणान्मरणं प्राप्नोति कोसौ य इह नानेव पश्यति अविद्याध्यारोपणव्यतिरेकेण नास्ति परमार्थतो द्वैती
यमित्यर्थः॥ यस्मादेवं तस्मादेकधैवैकेनैव प्रकारेण विज्ञानघनैकरसप्रकारेणाकाशवन्निरंतरेणानुद्रष्टव्यं यस्मादेतद्ब्रह्माप्रम
यमप्रमेयं सर्वैकत्वादन्येन ह्यन्यत्प्रमीयते इदं त्वेकमेवातो प्रमेयं ध्रुवं नित्यं कूटस्थमविचालीत्यर्थः॥ ननु विरुद्धमिदमुच्यते अप्रमे
६ यं ज्ञायत इति च ज्ञायत इति प्रमाणैर्मीयत इत्यर्थो प्रमेयमिति च तत्प्रतिषेधो नैष दोषो न्यवस्तुवदनागमप्रमाणप्रमेयप्रतिषेधार्थत्वा
त् यथान्यानि वस्तून्यागमनिरपेक्षैः प्रमा[illegible]णैर्विषयीक्रियंते न तथैतदात्मतत्त्वं प्रमाणांतरैर्विषयीकर्तुं शक्यते सर्वस्यात्म १४६
त्वेके न कं पश्येद्धि जानीयादिति प्रमातृप्रमाणादिव्यापारप्रतिषेधेनैवागमोपि ज्ञापयति न त्वभिधानाभिधेयलक्षणवाक्यध
र्मंगी[illegible]करणेन तस्मान्नागमेनापि स्वर्गमेर्वादिवत्तत्प्रतिपाद्यते प्रतिपादयित्रात्मभूतं हि तत्प्रतिपादयितुः प्रतिपादनस्य प्रति
पाद्यविषयत्वान्न ज्ञेदेहि सति तद्भवति ज्ञानं च तस्मिन्नात्मभावनिवृत्तिरेव न तस्मिन्नसाक्षादात्मभावः कर्त्तव्यो विद्यमानत्वा
दात्मभावस्य नित्योद्यात्मभावः सर्वस्यातद्विषय इव प्रत्यवभासते तस्मादतद्विषयाभासनिवृत्तिव्यतिरेकेण न तस्मिन्नात्म

भावो विधीयते अन्यात्मभावनिवृत्तौ त्वात्मभावः स्वात्मनि स्वाभाविको यः स केवलो भवतीत्यात्मा ज्ञायत इत्युच्यते स्वतस्त्व प्रमे
यः प्रमाणांतरेण न विषयीक्रियत इत्युभयमप्यविरुद्धमेव विरजो विगतरजो नाम धर्माधर्मादिमलस्तद्रहित इत्येतत्परः परो व्यतिरि
क्तः सूक्ष्मो व्यापी वा आकाशाद्व्याकृताख्याद[illegible]जो न जायते जन्मप्रतिषेधादुत्तरेपि भावविकाराः प्रतिषिद्धाः सर्वेषां जन्मादित्वादा
त्मा महान्परिमाणतो महत्तरः सर्वस्माद्ध्रुवो विनाशी तमीदृशमात्मानमेव धीरो धीमान्विज्ञायोपदेशतः शास्त्रतश्च प्रज्ञां शास्त्राचार्यो
पदिष्टविषयां जिज्ञासापरिसमाप्तिकरीं कुर्वीत ब्राह्मणः एवं प्रज्ञाकरणसाधनानि सन्न्यासशमदमोपरमतितिक्षासमाधानानि
कुर्यादित्यर्थः नानुध्यायान्नानुचिंतयेद्बहून्प्रभूता[illegible]न्शब्दान्तत्र बहुत्वप्रतिषेधात्केवलात्मैकत्वप्रतिपादकाः स्वल्पाः श
ब्दा अनुज्ञायंते ओमित्येवं ध्यायथ आत्मानमन्या वाचो विमुंचथेति चाथर्वणे वाचो विग्लापनं विशेषेण ग्लानिकरं श्रमकरं हि यस्मा
त्तद्बहुशब्दाभिधानमिति॥ ॥सहेतुकौ बंधमोक्षावभिहितौ मंत्रब्राह्मणाभ्यां श्लोकैश्च पुनः मोक्षस्वरूपं विस्तरेण प्रतिपादित
मेवमेतस्मिन्नात्मनि विषये सर्वे वेदा यथोपयुक्ता भवंति तत्तथा वक्तव्यमिति तदर्थ यं कंडिकारभ्यते। तत्र यथास्मिन्प्रपाठके विद्वि
तं सप्रयोजनमनूद्यात्रैवोपयोगः कृत्स्नस्य वेदस्य काम्यराशिवर्जितस्येत्येवमर्थ उक्तानुवादः स वा एष इत्यादिः स इत्युक्तपरामर्शः
कोसावुक्तः परामृश्यते तं प्रतिनिर्दिशति य एष विज्ञानमय इत्यतीतान्तर्वाक्योक्तसंप्रत्ययो मा भूदिति य एष कतमः एष इत्युच्यते विज्ञा

नमयः प्राणेष्वित्युक्तवाक्योल्लिंगनं संशयनिवृत्त्यर्थं मुक्तं हि पूर्वं जनकप्रश्नारंभे कतम आत्मेति योयं विज्ञानमयः प्राणेष्वित्यादि
ना इदमुक्तं भवति योयं विज्ञानमयः प्राणेष्वित्यादिना वाक्येन प्रतिपादितः स्वयंज्योतिरात्मा स एष कामकर्माविद्यानामनात्मधर्मत्वप्रतिपा
दनद्वारेण मोक्षितः परमात्मभावमापादितः पर एवायं नान्य इत्येष स साक्षान्महानज आत्मेत्युक्तो योयं विज्ञानमयः प्राणेष्विति यथाव्या
ख्यातार्थ एव य एषोंतर्हृदये हृदयपुंडरीकमध्ये य एष आकाशो बुद्धिविज्ञानसंश्रयः तस्मिन्नाकाशे बुद्धिविज्ञानसहिते शेते ति
ष्ठत्यथवा संप्रसादकाले अंतर्हृदये य एष आकाशः पर एवात्मा निरुपाधिको विज्ञानमयस्य स्वस्वरूपावस्थस्तस्मिन् स्वस्वरूपे परमात्मन्याका
शाख्ये शेते तच्चतुर्थे एतद्व्याख्यातं क्वैष तदाभूदित्यस्य प्रतिवचनत्वेन सर्वस्य वशी इंद्रादेर्वशी सर्वो ह्यस्य वशे वर्त्तते । उक्तं चैतस्य वा
अक्षरस्य प्रशासन इति न केवलं वशी सर्वस्येशान ईशिता च ब्रह्मेंद्रप्रभृतीनामीशितृत्वं च कदाचिज्जातिकृतं यथा राजकुमारस्य बलव
त्तरान्भृत्यान्प्रति तद्वन्मा भूदित्याह । सर्वस्याधिपतिरधिष्ठाय पालयिता स्वतंत्र इत्यर्थः न राजपुत्रवदमात्यादिभृत्यतंत्रः त्रयमप्येतत्त्व
शित्वादि हेतुहेतुमद्रूपं यस्मात्सर्वस्याधिपतिस्ततोसौ सर्वस्येशानो यो हि यमधिष्ठाय पालयति स तं प्रतीष्ट एवेति प्रसिद्धं यस्माच्च स
र्वस्येशानः तस्मात्सर्वस्य वशीति किंचान्यत् स एवंभूतो हृदयांतर्ज्योतिः पुरुषो विज्ञानमयः स न साधुना शास्त्रविहितेन कर्मणा भूया
न्भवति वर्द्धते पूर्वावस्थातः केनचिद्धर्मेण नो एवाशास्त्रप्रतिषिद्धेनासाधुना कर्मणा कनीयानल्पतरो भवति पूर्वावस्थातो न हीयत इत्य १४७

र्थः [stain] सर्वो ह्यधिष्ठानपालनादि कुर्वन्परानुग्रहपीडाकृतेन धर्माधर्माख्येन युज्यते तस्यैव तु कथं तदभाव इत्युच्यते यस्मादेष सर्वेश्व
रः स न कर्मणोपि शितुं भवत्येव शीलमस्य तस्मान्न कर्मणा संबध्यते किंच एष भूताधिपतिः ब्रह्मादिस्तंबपर्यंतानां भूतानामधिपति
रित्युक्तार्थपदं एष भूतानां तेषामेव पालयिता रक्षिता एष सेतुः किंविशिष्ट इत्याह विधरणो वर्णाश्रमादिव्यवस्थायाः विधारयिता त
दाह एषां भूरादीनां ब्रह्मलोकांतानां लोकानामसंभेदाय असंभिन्नमर्यादाये परमेश्वरेण सेतुवद्विधार्यमाणा लोकाः संभिन्नमर्या
दाः स्युः अतो लोकानामसंभेदाय सेतुभूतोयं परमेश्वरो यः स्वयंज्योतिरात्मैवंविद् सर्वस्य वशीत्यादि ब्रह्मविद्यायाः फलमेतन्नि
र्दिष्टं किंज्योतिरयं पुरुष इत्येवमादि षष्ठप्रपाठकविहितायामेतस्यां ब्रह्मविद्यायामेवं फलायां काम्यैकदेशवर्जितं कृत्स्नं कर्मकांडे
तादर्थ्येन विनियुज्यते तत्कथमित्युच्यते तमेतमेवंभूतमौपनिषदं पुरुषं वेदानुवचनेन मंत्रब्राह्मणाध्ययनेन नित्यस्वाध्याय
लक्षणेन विविदिषंति वेदितुमिच्छंति के ब्राह्मणा ब्राह्मणग्रहणमुपलक्षणार्थं अविशिष्टो ह्यधिकारस्त्रयाणां वर्णानामथवा कर्मकां
डेन मंत्रब्राह्मणेन वेदानुवचनेन विविदिषंति कथं विविदिषंतीत्युच्यते यज्ञेनेत्यादि ये पुनर्मंत्रब्राह्मणलक्षणेन वेदानुवचनेन प्रकाश्य
मानं विविदिषंतीति व्याचक्षते तेषामारण्यकमात्रमेव वेदानुवचनं स्यान्न हि कर्मकांडेन परआत्मा प्रकाश्यते तं त्वौपनिषदमिति वि
शेषश्रुतेः वेदानुवचनेनेत्यविशेषितत्वात्समस्तग्राहीदं वचनं न च तदेकदेशोत्सर्गे युक्तः ननु त्वत्पक्षेप्युपनिषद्वर्जमित्येकदे

न२

नात्वंस्यात नाद्य व्याख्यानैर्विरोधादस्मत्पक्षे नैषदोषो भवति यदा वेदानुवचनशब्देन नित्यस्वाध्यायोभिधीयते तदोपनिषदपि गृही
तैवेति वेदानुवचनशब्दार्थैकदेशो न परित्यक्तो भवति यज्ञादिसहपाठाद्य यज्ञादीनि कर्माण्यपि वानुक्रमिष्यन्वेदा नुवचनशब्दप्र
युक्ते तस्मात्कर्मैव वेदानुवचनशब्देनोच्यत इति गम्यते कर्मादि नित्यस्वाध्यायः कथं पुनर्नित्यस्वाध्यायादिभिः कर्मभिरात्मानं विविदि
षंति नैव दितान्यात्मानं प्रकाशयंति यथोपनिषदः नैषदोषः कर्मणां विशुद्धिहेतुत्वात्कर्मभिः संस्कृता हि विशुद्धात्मानः श
क्नुवंत्यात्मानमुपनिषत्प्रकाशितमप्रतिबंधेन वेदितुं तथा ह्याथर्वणे विशुद्धसत्वस्ततस्तु तं पश्यते निष्कलं ध्यायमान इति स्मृतिश्च
ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः इत्यादिः कथं पुनर्नित्यानि कर्माणि संस्कारार्थानीत्यवगम्यते स ह वा आत्मयाजी यो वेद इद
मनेनांगं संस्क्रियत इदं मेनेनांगमुप धीयत इत्यादिश्रुतेः सर्वेषु च स्मृतिशास्त्रेषु कर्माणि संस्कारार्थान्येवाचक्षते। अष्टाचत्वा
रिंशत्संस्कारा इत्यादिगीतासु च यज्ञो दानं तपश्चैव पावनानि मनीषिणां। सर्वेप्येते यज्ञविदो यज्ञक्षपितकल्मषा इति यज्ञेनेति १४८
द्रव्ययज्ञा ज्ञानयज्ञाश्च संस्कारार्थाः संस्कृतस्य च विशुद्धसत्वस्य ज्ञानोत्पत्तिप्रतिबंधो न भविष्यत्यतो यज्ञेन विविदिषंति दानेन
दानमपि पापक्षयहेतुत्वाद्धर्मवृद्धिहेतुत्वाच्च तपसा तप इत्यविशेषेण कृच्छ्रचांद्रायणादिप्राप्तौ विशेषणमनाशकेनेति कामा
नशनमनाशकं न तु भोजननिवृत्तिः भोजननिवृत्तौ म्रियत एव नात्मवेदनं वेदानुवचनयज्ञदानतपःशब्देन सर्वमेव नित्यं कर्मोपलक्ष्यते

९१

एवं काम्यवर्जितं नित्यं कर्मजातं सर्वमात्मज्ञानोत्पत्तिद्वारेण मोक्षसाधनत्वं प्रतिपद्यते एवं कर्मकांडेनास्यैकवाक्यतागतिः
एवं यथोक्तेन न्यायेनैतमेवात्मानं विदित्वा यथाप्रकाशितं मुनिर्भवति मननान्मुनिर्योगी भवतीत्यर्थः
एतमेव विदित्वा मुनिर्भवति नान्यं न च न्यवेदनेपि मुनित्वं स्यात्कथमवधार्यते एतमेवेति वाढमन्यवेदनेपि मुनिर्भवेत् किं त्वन्यवेदनेन मु
निरेव स्यात् किं तर्हि कर्म्यपि भवेत्स एतं चोपनिषदं पुरुषं विदित्वा मुनिरेव स्यान्न तु कर्मी अतो साधारणं मुनित्वं विवक्षितमस्येत्यवधा
र्यत एतमेवेति एतमेव हि विदिते केनकं पश्येदित्येवं क्रियासंभवान्मननमेव स्यात् किं च एतमेवात्मानं स्वं लोकमिच्छंतः प्रार्थयंतः
प्रव्राजिनः प्रव्रजनशीलाः प्र व्रजंति प्रकर्षेण व्रजंति सर्वाणि कर्माणि संन्यसंतीत्यर्थः एतमेव लोकमिच्छंत इत्यवधारणान्न वा
ह्यलोकत्रयेप्सूनां पारिव्राज्येधिकार इति गम्यते न हि गंगाद्वारं प्रतिपित्सुः काशीदेशनिवासी पूर्वाभिमुखः प्रैति तस्माद्बाह्यलोक
त्रयार्थिनो पुत्रकर्मापरब्रह्मविद्याः साधनं पुत्रेणैवायं लोको जय्यो नान्येन कर्मणेत्यादिश्रुतेः। अतस्तदर्थिभिः पुत्रादिसाधनं प्रत्या
ख्याय न पारिव्राज्यं प्रतिपत्तुं युक्तमतत्साधनत्वात्पारिव्राज्यस्य तस्मादेतमेव लोकमिच्छंतः प्रव्रजंतीति युक्तं अवधारणमात्म
लोकप्राप्तिर्ह्यविद्यानिवृत्तौ स्वात्मन्यवस्थानमेव तस्मादात्मानं चेल्लोकमिच्छति यस्तस्य सर्वक्रियोपरम एवात्मलोकसाधनं मुख्य
मंतरं यथा पुत्रादिरेव बाह्यलोकत्रयस्य पुत्रादिकर्मणः आत्मलोकं प्रत्यसाधनत्वा दसंभवेन च विरुद्धत्वमवोचाम तस्मादा

त्मानं लोकमिच्छंतः प्रव्रजंत्येव सर्वक्रियाभ्यो निवर्तेरन्नेवेत्यर्थः यथा च बाह्यलोकत्रयार्थिनः प्रतिनियतानि पुत्रादीनि साध
नानि विहितानि एवमात्मलोकार्थिनः सर्वैषणानिवृत्तिः पारिव्राज्यं ब्रह्मवि[..]दो विधीयत एव कुतः पुनस्त्वात्मलोकार्थि
नः प्रव्रजंत्येवेत्युच्यते। तत्रार्थवादवाक्यरूपेण हेतुं दर्शयति एतद्ध स्म वै तत् [..] एतत्पारिव्राज्ये कारणमुच्यते ह स्म वै कि
ल पूर्वे अतिक्रांतकालीना विद्वांसः आत्मज्ञाः प्रजां कर्मापरब्रह्मविद्यां च प्रजोपलक्षितं त्रितयमेतद्बाह्यलोकत्रयसाधनं नि
र्दिश्यते प्रजामिति प्रजां किं न कामयंते पुत्रादिलोकत्रयसाधनं नानुतिष्ठंतीत्यर्थः॥ ननु च परब्रह्मदर्शनमनुतिष्ठंत्येव तद्बलाद्धि व्यु
त्थानं नापवादात् ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद सर्वं तं परादादित्यपरब्रह्मदर्शनमप्यपवदत्येवापरब्रह्मणापि सर्वं मिथ्या
त्वेन विद्यत्र नान्यत्पश्यतीति च पूर्वापरबाह्यांतर्दर्शनप्रतिषेधाच्चापूर्वमनपरमनंतरमबाह्यमिति तत्केन कं पश्येद्विजानीया १४२
दिति च। तस्मान्नात्मदर्शनव्यतिरेकेणान्यद्व्युत्थानकारणमपेक्ष्यते। किं पुनस्तेषामभिप्रायः इत्युच्यते किं प्रयोजनं फलं सा
ध्यं करिष्यामः प्रजया साधनेन प्रजा हि बाह्यलोकसाधनं निर्ज्ञाता स च बाह्यो लोको नास्त्यस्माकमात्मव्यतिरिक्तः सर्वं ह्य
स्माकमात्मभूतमेव सर्वस्य च वयमात्मभूताः। आत्मा च नः आत्मत्वादेव न केनचित्साधनेनोत्पाद्य आप्यो विकार्यः संस्कार्यो
वा यच्चाप्यात्मयाजिनः संस्कारार्थं कर्मेति तदपि कार्यकरणात्मदर्शनविषयमेव। इदं मे [..]नेनांगं संस्क्रियत इत्यंगांगित्वादिश्रवणान्
त्कि

मनप

[..] वित्ता न ह्यनेकरसेऽनंतरेऽबाह्ये दर्शिनोंगांगिसंस्कारोपधानदर्शनं संभवति तस्मान्न किंचित्प्रजादिसाधनैः करिष्यामः। अविदुषां
हि तत्प्रजादिसाधनैः कर्तव्यं फलं न हि मृगतृष्णिकायामुदकपानाय तदुदकदर्शी प्रवृत्त इति तत्रोषरमात्रमुदकाभावं पश्यतोऽपि
प्रवृत्तिर्युक्ता एवमस्माकमपि परमार्थात्मलोकदर्शिनां प्रजादिसाधनसाध्ये मृगतृष्णिकादिसमेऽविद्वद्दर्शनविषये न प्रवृत्तिर्युक्ते
त्यभिप्रायः। तदेतदुच्यते येषामस्माकं परमार्थदर्शिनां नोऽयमात्मा अशनायादिविनिर्मुक्तः साध्वसाधुभ्यामविकार्योऽयं लोकः फलम
भिप्रेतं न चास्यात्मनः साध्यसाधनादिसर्वसंसारधर्मविनिर्मुक्तस्य साधनैः किंचिदेषितव्यं। साध्यस्य हि साधनान्वेषणा क्रियते असाध्य
स्य साधनान्वेषणायां हि [..] जलबुद्ध्या स्थलइव तरणं कृतं स्यात् खे वा शाकुनपदान्वेषणा। तस्मादेतमात्मानं विदित्वा प्रव्रजे
युरेव ब्राह्मणाः न कर्मारभेरन्नित्यर्थः। तस्मात्पूर्वे ब्राह्मणाः एवं विद्वांसः प्रजामकामयमाना एवं साध्यसाधनव्यवहारं निंदंतो विद्व
दूषयमिति कृत्वा किं कृतवंत इत्युच्यते ते ह स्म किल पुत्रैषणायाश्च वित्तैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंतीत्यादि व्याख्यातं। तस्मादात्म
लोकमिच्छंतः प्रव्रजंतीति प्रव्रजेयुरित्येष विधिर्न हि सा[..]र्थवादस्यास्य लोकस्तुत्याभिमुख्यमुपपद्यते। प्रव्रजंतीत्येतस्यार्थवादरू
पो ह्येतद्ध स्मेत्यादिरुत्तरो ग्रंथः। अर्थवादश्च नार्थवादांतरमपेक्षते अपेक्षते त्वेतद्ध स्मेत्याद्यर्थवादं प्रव्रजंतीत्येतच्च यस्मात्पूर्वे विद्वांसः
प्रजादिकर्मभ्यो निवृत्ताः प्रव्रजितवंत एव तस्मादधुनातना अपि प्रव्रजंति प्रव्रजेयुरित्येवं संबध्यमानं न लोकस्तुत्याभिमुखं जनयितुम्

[illegible]

इति विज्ञानसमानकर्तृत्वोपदेशाद्धित्यवोचाम वेदानुवचनादिसहपाठाच्च यथा आत्मवेदनसाधनत्वेन विदितानां वेदानुवचना
दीनां तथा यत्नमेवनार्थवादत्वं । तथा तैरेव सहपठितस्य पारिव्राज्यस्यात्मलोकप्राप्तिसाधनत्वेनार्थवत्त्वमयुक्तं । फलविशेषोपदे
शाच्च एतमेवात्मानं लोकं विदित्वेत्यन्यस्माद्व्यावृत्ताल्लोकादात्मानं फलांतरत्वेन प्रविभजति । पुत्रेणैवायं लोको जय्यो नान्येन
कर्मणा कर्मणा पितृलोक इति । न च प्रव्रजंतीत्येतद्याज्ञवल्क्यस्तुतिपरं प्रधानवच्छ्रुतेः र्थवादापेक्षं सहश्रुतं स्यान्न तस्माद्व्यतिरेकेणा
त्मलोकस्तुतिपरमिति न चानुष्ठेयेन पारिव्राज्येन स्तुतिरुपपद्यते । यदि पारिव्राज्यमनुष्ठेयमपि सदन्यस्तुत्यर्थं स्यात् । दर्शपूर्णमासादी
नामप्यननुष्ठेयानां स्तुत्यर्थता स्यात् । न चान्यत्र कर्तव्यता तस्माद्विषयान्निर्ज्ञाताय तद्इह स्तुत्यर्थत्वे वेत्र यदि पुनः क्वचिद्विधिः परिकल्प्ये
त पारिव्राज्यस्य सह हेव मुख्यो नान्यत्र संभवति यदप्यनधिकृतविषये पारिव्राज्यं परिकल्प्यते तत्रा वृक्षाद्यारोहणाद्यपि पारिव्राज्यव
त्कल्प्येत कर्तव्यत्वेनानिर्ज्ञातत्वाविशेषात् स्यात्स्तुतित्वगंधोप्यत्र न शक्यते कल्पयितुं यत्र यमात्मा लोक इष्यते किमर्थं तत्प्राप्ति १५०
साधनत्वेन कर्माण्येव नारभ्येरन् किं पारिव्राज्येनेति तत्रोच्यते अस्यात्मलोकस्य कर्मभिरसंबंधात् । यमात्मानमिच्छंतः प्रव्रजे
युः स आत्मा साधनत्वेन वा फलत्वेन वोत्पाद्यत्वादिप्रकाराणामन्यतमत्वेनापि कर्मभिर्न संबध्यते । तस्मात्स एष नेति नेत्यात्मा
गृह्यो न हि गृह्यत इत्यादिलक्षणो यस्मात् तस्मादेवंलक्षण आत्मा कर्मफलसाधनासंबंधी सर्वसंसारधर्मविलक्षणोऽशनायाद्य

मनो १ — एष ६ स्या १ — आत्मत्वेनैव कर्मारंभ उपपद्यते २ — कृतानि ५

तीतोऽस्थूलादिधर्मवानजोऽजरोऽमृतोऽभयः सैंधवघनवद्विज्ञानैकरसस्वभावः स्वयंज्योतिरेकएवाद्वयोऽपूर्वोऽनन्तरोऽबाह्य इत्ये
तदागमतदागमतस्तर्कतश्च स्थापितं विशेषतश्चेह जनकयाज्ञवल्क्यसंवादेऽस्मिं तस्मादेवंलक्षणे आत्मनि विदिते तस्मा
दात्मा निर्विशेषः [illegible] न हि वस्तुष्मान्यथिप्रवृत्तोऽहनि कूपे कंटके वा पतति । कृत्स्नस्य च कर्मफलस्य विद्याफले
ऽतर्भावात् न चायत्नप्राप्ये वस्तुनि विद्वान्प्रयत्नमातिष्ठति अर्के चेन्मधु विंदेत किमर्थं पर्वतं व्रजेत् दृष्टस्यार्थस्य संप्राप्तौ को विद्वान्य
त्नमाचरेत् सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत इति गीतासु चेहापि चैतस्यैव परमानंदस्य ब्रह्मविज्ञानस्यान्यानि भूतानि मात्रामु
पजीवंतीत्युक्तं मतो ब्रह्मविदां न कर्मारंभो यस्मात्सर्वैषणा निवृत्तः स नेति नेत्यात्मानमात्मत्वेनोपगम्य तद्रूपेणैव वर्तते । तस्मा
देतमेवंविदं नेति नेत्यात्मभूतं उ हैवैते वक्ष्यमाणे न तरतो न प्राप्नुतः इतियुक्तमेवेति वाक्यशेषः । के ते इत्युच्यते । अतोऽस्मान्निमित्ता
च्छरीरधारणादिहेतोः पापमपुण्यं कर्म कीदृशं कृतवानस्मि कष्टं खलु मम वृत्तमनेन पापेन कर्मणाऽहं नरकं प्रतिपत्स्य इतियोऽयं पश्चात्ता
पः कर्म कृतवतः परितापः स एनं नेति नेत्यात्मभूतं न तरति तथाऽतः कल्याणं फलविषयकामान्निमित्तायज्ञदानादिनिमित्तं पुण्यं शोभनं
कर्म कृतवानस्मि । अतोऽहमस्य फलं सुखमुपभोक्ष्ये देहांतर इत्येषोऽपि हर्षस्तन्न तरति । उ हैवैते । एष एष । ब्रह्मविदे ते कर्मणी तरति पुण्यपाप
लक्षणे एवं ब्रह्मविदः संन्यासिनः उभे अपि कर्मणी क्षीयेते यैये ते इह जन्मनि कृते च अपूर्वे च नारभ्येते किं चैनं कृताकृते कृतं नित्यानुष्ठानमकृ

पूर्वजन्मनि कृते १

नतस्यैवाक्रियाते अपि कृताकृते। पूर्वंनतपतः नात्मानंहिकृतंफलदानेनाकृतंप्रत्यवायोत्पादनेनतपतौ यतोब्रह्मविदात्मविद्या
ग्निनासर्वाणिकर्माणिभस्मीकरोति। यथैधांसिसमिद्धोग्निरित्यादिस्मृतेः शरीरारंभकयोस्तूपभोगेनैवक्षयोअतोब्रह्मविद
कर्मसंबंधीतदेतद्वस्तुब्राह्मणेनोक्तमृचामंत्रेणाभ्युक्तंप्रकाशितमेषनेतिनेत्यादिलक्षणोनित्योमहिमाऽन्येतुमहिमानः
कर्मकृताइत्यनित्याअयंतुतद्विलक्षणोनेतिनेत्यादिलक्षणोमहिमास्वाभाविकत्वान्नित्योब्रह्मविदोब्राह्मणस्यत्यक्तसर्वैष
णस्यकुतोस्यनित्यत्वमितिहेतुमाह।नकर्मणानवर्द्धतेशुभलक्षणेनवृद्धिलक्षणांविक्रियांनप्राप्नोतितथाशुभेनकर्मणानो
कनीयान्।नाप्यपक्षयलक्षणांविक्रियांप्राप्नोतिउपचयापचयहेतुभूताएवहिसर्वाविक्रियाइत्यतःसर्वांप्रतिषिध्यतेअतोवि
क्रियत्वान्नित्यएषमहिमातस्मात्तस्यैवमहिम्नःस्याद्भवेत्पदवि[illegible]त्पदस्यवेत्तापद्यतेगम्यतेज्ञायतइतिमहिम्नःस्वरूपमेवपदं
तस्यपदस्यवेदितापदस्यवेत्ताकिंतत्पदवेदनेनस्यादित्युच्यतेतंविदित्वामहिमानंनलिप्यतेनसंबध्यतेकर्मणापापकेनधर्माध
र्मलक्षणेनोभयमपिपापकमेवविदुषोयस्मादेवमकर्मसंबंध्येषब्राह्मणस्यमहिमानेतिनेत्यादिलक्षणंतस्मादेवंविच्छां १५१
तोवाह्येंद्रियव्यापारतःउपशांतस्तथादांतोन्तःकरणतृष्णायोनिवृत्तःउपरतःसर्वैषणाविनिर्मुक्तःसन्यासीतितितिक्षुर्द्वंद्वस
हिष्णुःसमाहितइंद्रियांतःकरणचलनरूपाद्व्यावृत्त्यैकाग्ररूपेणसमाहितोभूत्वातदेतदुक्तंपुरस्ताद्बाल्यंचपांडित्यंचनि

र्विद्येति।आत्मन्येवस्वेकार्यकरणसंघातेआत्मानंप्रत्यक्चेतयितारंपश्यतितत्रकिंतावन्मात्रपरिछिन्नंनेत्युच्यते।सर्वंसमस्तमा
त्मानमेवपश्यति।नान्यदात्मव्यतिरिक्तंवालाग्रमात्रमप्यस्तीत्येवंमननान्मुनिर्भवतिजाग्रत्स्वप्नसुषुप्ताख्यंस्थानत्रयंहित्वाएवं
पश्यंतंब्राह्मणंनैनंपाप्मापुण्यपापलक्षणस्तरतिनतरतिनप्राप्नोति।अयंतुब्रह्मवित्सर्वंपाप्मानंतर[illegible]त्यात्मभावेनैवव्याप्नो
त्यतिक्रामतिनैनंपाप्माकृताकृतलक्षणस्तपतिस्वफलप्रत्यवायोत्पादनाभ्यांसर्वंपाप्मानमयंतपतिब्रह्मवित्सर्वात्मदर्शी
नवह्निनाभस्मीकरोतिसएषएवंवित्विपापोविगतधर्माधर्मोविरजोरजःकामोविगतकामःअविचिकित्सौछिन्नसंशयोऽहम २
स्मिसर्वात्मापरंब्रह्मेतिनिश्चितमतिर्ब्राह्मणोभवत्ययंत्वेवंभूतएतस्यामवस्थायांमुख्योब्राह्मणःप्रागेतस्माद्ब्रह्मस्वरूपावस्था
नाद्गौणमस्यब्राह्मण्यंएषब्रह्मलोकोब्रह्मैवलोकोब्रह्मलोकोमुख्योनिरुपचरितःसर्वात्मभावलक्षणःहेसंम्राट्एनंब्रह्म
लोकंपरिप्रापितोस्यनयंनेतिनेत्यादिलक्षणमितिहोवाचयाज्ञवल्क्यःएवंब्रह्मभूतोजनकोयाज्ञवल्क्येनब्रह्मभावमापादितः
प्रत्याहसोहंत्वयाब्रह्मभावमापादितःसन्भगवतेतुभ्यंविदेहान्देहान्ममराज्यंददामिमांचसहविदेहैर्दास्यायेदासकर्मणे
ददामीतिवाक्याध्याहारःसंबध्यतेपरिसमापिताब्रह्मविद्यासहसंन्यासेनसांगासेतिकर्त्तव्यताकापरिसमाप्तःपुरुषार्थःएतावत्पुरुषेण
कर्त्तव्यंएषानिष्ठाएषापरागतिरेतन्निःश्रेयसमेतत्प्राप्यकृतकृत्योब्राह्मणोभवत्येतत्सर्ववेदानुशासनमितियथाजनकयाज्ञ

वल्क्याख्यायिकायां व्याख्यात आत्मा स वै एष महानज आत्मान्नादः सर्वभूतस्थः सर्वान्नानामत्ता वसुदानो वसु धनं
सर्वप्राणिकर्मफलं तस्य कर्मफलस्य दाता प्राणिनां यथाकर्मफलेन योजयितेत्यर्थः। तमेतमजमन्नादं वसुदानमात्मानमन्नाद
वसुदानगुणाभ्यां युक्तं यो वेद सर्वभूतेष्वात्मत्वेनान्नमत्ति विंदते च वसु सर्वकर्मफलजातं लभते सर्वात्मत्वादेव य एवं यथो
क्तं वेद अथवा दृष्टफलार्थिभिरप्येवंगुण उपास्य तेनान्नादो वसोश्च लब्धा दृष्टेनैव फलेनान्नादत्वेन गोअश्वादिना चा
स्य योगो भवतीत्यर्थः। इदानीं समस्तस्यैवारण्यकस्य योर्थ उक्तः स समुच्चित्यास्यां कंडिकायां निर्दिश्यत एतावान्समस्त आ
रण्यकार्थ इति स वा एष महानज आत्मा अजरो न जीर्यत इति न विपरिणमत इत्यर्थः। अमरो यस्माच्चाजरस्तस्मादमरो न म्रियत इ
त्यमरेन यो हि जीर्यते स विनश्यति म्रियते च अयं त्वजत्वादमरत्वाच्चाविनाशी अत एवामृतः यस्माज्जनिप्रभृतिभिस्त्रिभिर्भावविकारै
र्वर्जितस्तस्मादितरैरपि भावविकारैस्त्रिभिस्तत्कृतैश्च कामकर्ममोहादिभिर्मृत्युरूपै [illegible]
[illegible] र्वर्जित इत्येतदनयोः त एव अस्माच्चैवं यथोक्तविशेषणः तस्मादभयवर्जितो
यतं चाविद्याकार्यं तत्कार्यप्रतिषेधेन भावविकारप्रतिषेधेन चाविद्यायाः प्रतिषेधः सिद्धो वेदितव्यः अत [illegible] य आत्मैवंगुणविशि १५२
ष्टः किमसौ ब्रह्म परिवृढं निरतिशयं महदित्यर्थः। अभयं वै ब्रह्म प्रसिद्धमेतल्लोके अभयं ब्रह्मेति तस्माद्युक्तमेवंगुणविशिष्टः आ

त्मा ब्रह्मेति य एवं यथोक्तमात्मानमभयं ब्रह्म वेद सोऽभयं हि वै ब्रह्म भवति एष सर्वस्या उपनिषदः संक्षिप्तोर्थ उक्तः। एतस्यैवार्थस्य स
म्यक्प्रबोधायोत्पत्तिस्थितिप्रलयादिकल्पना क्रियाकारकफलाध्यारोपणा चात्मनि कृता तदपोहेन च नेति नेतीत्यध्यारोपितवि
शेषापनयद्वारेण पुनस्तत्त्वमावेदितं। यथा एकप्रभृत्या परार्द्धसंख्यास्वरूपपरिज्ञानाय रेखाध्यारोपणं कृत्वा एकेयं रेखा द
शेयं शतेयं सहस्रेयमिति ग्राहयति अवगमयति। संख्यास्वरूपं केवलं न तु संख्याया रेखात्मत्वमेवं यथा वा अकारादी
न्यक्षराणि विजिग्राहयिषुः पत्रमषिलेखादिसंयोगोपायमास्थाय वर्णानां सतत्त्वमावेदयति न पत्रमष्याद्यात्मतामक्षराणां
ग्राहयति तथा चेहोत्पत्त्याद्यनेकोपायमास्थायैकं ब्रह्मतत्त्वमावेदितं पुनस्तत्कल्पितोपायजनितविशेषपरिशोधनार्थं ने
ति नेतीति तत्त्वोपसंहारः कृतस्तदुपसंहृतं पुनः परिशुद्धं केवलमेव सफलं ज्ञानमेतस्यां कंडिकायामिति॥ ॥षष्ठस्य चतुर्थं ब्रा
ह्मणं॥ ॥आगमप्रधानेन मधुकांडेन ब्रह्मतत्त्वं निर्द्धारितं पुनस्तस्यैवोपपत्तिप्रधानेन याज्ञवल्कीयेन कांडेन पक्षप्रतिपक्ष
परिग्रहं कृत्वा विगृह्यवादेन विचारितं शिष्याचार्यसंबंधेन च षष्ठे प्रश्नप्रतिवचनन्यायेन सविचार्योपसंहृतं अथेदानीं निगमस्था
नीयं मैत्रेयिब्राह्मणमारभ्यते अयं च न्यायो वाक्यकोविदैः परिगृहीतो हेतुव्यपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनमिति अ
थवा आगमप्रधानेन मधुकांडेन यदमृतत्वसाधनं ससंन्यासमात्मज्ञानमभिहितं तदेव तर्केणाप्यमृतत्वसाधनं ससन्यासमात्म

विज्ञानं

स्व१

ज्ञानमधिगम्यते तर्कप्रधानं हि याज्ञवल्कीयं कांडं तस्मात्तर्कतः कर्त्तव्यं निश्चितमेतद्यदेतदात्मज्ञानं सर्वं [illegible] त्यमृतत्वसा
धनमिति तस्मात् कृद्भाव क्रिरमृतत्वप्रतिपित्सुभिरेतत्प्रतिपत्तव्यमिति आगमोपपत्तिभ्यां हि निश्चितोर्थः श्रद्धेयो भवति ५
चारादिति वाक्यार्थः अक्षराणां तु चतुर्थयथा व्याख्यातोर्थस्तथा प्रतिपत्तव्योत्रापि यान्यक्षराण्यव्याख्यातानि तानि व्या
ख्यास्यामः ॥ अथेति हेतूपदेशानंतर्यप्रदर्शनार्थो हेतुप्रधानानि हि वाक्यान्यतीतानि तदनंतरमागमप्रधानेन प्रतिज्ञातोर्थो
निगम्यते मैत्रेयीब्राह्मणेन ह याज्ञवल्क्यस्य ऋषेः किल द्वे भार्ये पत्न्यौ बभूवतुरास्तां मैत्रेयी च नामतः
एका परा कात्यायनी नामतः तयोर्भार्ययोर्मैत्रेयी ह किल ब्रह्मवादिनी ब्रह्मवदनशीला बभूवासीत् स्त्रीप्रज्ञा स्त्रियाः यो
३ चिता प्रज्ञा सा स्त्रीप्रज्ञा सैव यस्याः प्रज्ञा गृहप्रयोजनान्वेषणालक्षणा सा स्त्रीप्रज्ञा एव तर्हि तस्मिन्काले आसीत् कात्यायनी अ
थैवं सति ह किल याज्ञवल्क्यः पूर्वस्माद्गार्हस्थ्यलक्षणाद्वृत्तात् पारिव्राज्यलक्षणं वृत्तं उपाकरिष्यनुपाचिकीर्षुः सन् ह मैत्रेयीति १५३
ज्येष्ठां भार्यामामंत्रयामास आमंत्र्य चोवाच ह प्रव्रजिष्यन् पारिव्राज्यं करिष्यन् वै अरे मैत्रेयि अस्मात्स्थानाद्गार्हस्थ्यादहमस्मि
त्वा मैत्रेय्यनुजानीहि मां हंत ते इच्छसि यदि ते अनया कात्यायन्यांतं करवाणीत्यादि व्याख्यातं ॥ ॥ सैवमुक्ता होवाच मैत्रेयी सर्वेयं पृ
थिवी वित्तेन पूर्णा स्यात् किमहं वित्तसाध्येन कर्मणामृता अहो न स्यामिति नेति होवाच याज्ञवल्क्यः इत्यादि समानमन्यत्र ॥ ॥

उ१

ऋ४ — ध२

स होवाच प्रिये वत पूर्वं खलु नो अस्मभ्यं भवती भवंती सती प्रियमेवाहं हृदि तवती निर्द्धारितवती त्यस्यतः तुष्टोहं हंत ते इच्छसि चेदमृतत्व
साधनं ज्ञातुं हे भवति ते तुभ्यं तदमृतत्वसाधनं व्याख्यास्यामि ॥ ॥ आत्मा निरवलु अरे मैत्रेयि दृष्टे कथं दृष्ट आत्मनीतु च्य
ते पूर्वमाचार्यागमाभ्यां श्रुत्वा पुनस्तर्केणोपपत्त्या मत्वा विचारिते श्रवणं त्वागममात्रेण मतमुपपत्त्या पश्चात् विज्ञात एवमेतन्नान्य
थेति निर्द्धारिते किं भवतीत्युच्यते इदं सर्वं विदितं भवति इदं सर्वमिति यदात्मनोन्यदात्मव्यतिरेकेण नावाभवर्षेणाद्ध निश्वासे
नेव लोकाद्यर्थनिश्वासः सामर्थ्यादुक्तो भवतीति पृथक्त्वोक्तः इह तु सर्वत्रास्त्रार्थोपसंहार इति हेत्वार्थप्राधान्यार्थः स्यष्टीकर्त्त
व्य इति पृथगुच्यते सर्वकार्यप्रलये विद्यानिमित्ते सैंधवघनवदनंतरोबाह्यः कृत्स्नप्रज्ञानघनः एक आत्मावतिष्ठते पूर्वं तु
भूतमात्रासंसर्गविशेषाल्लब्धविशेषविज्ञानः सम्प्रविलापिते विद्याविशेषज्ञाने तन्निमित्ते च भूतसंसर्गे न प्रेत्य संज्ञास्तीत्ये
वं याज्ञवल्क्येनोक्ता सा होवाच ॥ अत्रैव मा भगवानेतस्मिन्नेव वस्तुनि प्रज्ञानघन एव न प्रेत्य संज्ञास्तीति मोहान्तं मोहमध्यं आपी
पिप [illegible] गमितवानसि संमोहितवानसीत्यर्थः अतो नैव अहमिममात्मानमुक्तलक्षणं विज्ञानामि विवेकतः स होवाच न वा इति२
अहं मोहं ब्रवीमीत्याह याज्ञवल्क्यः अविनाशी वा अयमात्मा यतः विनष्टुं शीलमस्येति विनाशी न विनाशी अविनाशी विनाशशब्देन विक्रिया अ
विनाशीत्यविक्रिय आत्मेत्यर्थः ॥ अरे मैत्रेय्ययमात्मा प्रकृतोनुच्छित्तिधर्मा उच्छित्तिरुच्छेदः उच्छेदो ते विनाशा उच्छित्तिधर्मास्येत्युच्छि

क्रि१ — अविनाशी२

त्विधर्मा न तच्छित्तिधर्मा अनुच्छित्तिधर्मा नापि विक्रियालक्षणो नाप्युच्छेदलक्षणो विनाशोऽस्य विद्यत इत्यर्थः चतुर्थेपि ब्राह्मणे षष्ठे
क आत्मा तुल्यो निर्द्धारितः परंब्रह्म उपायविशेषस्तु तस्याधिगमेऽन्यस्त्वान्यस्योपेयस्तु स एवात्मा यश्च तुर्थे अथात आदेशो ने
ति नेतीति निर्दिष्टः स एव पंचम ब्राह्मणे पत्न्योपन्यासेन शाकल्ययाज्ञवल्क्यसंवादे निर्द्धारितः पुनः पंचमसमाप्तौ पुनर्जनक
याज्ञवल्क्यसंवादे पुनरिहोपनिषत्समाप्तौ चतुर्णामपि प्रपाठकानामेतदात्मनिष्ठता नान्यात्रान्तराले कश्चिदपि विवक्षितोऽर्थ इत्ये
तत्प्रदर्शनायांत उपसंहारः स एष नेति नेत्यादिर्यस्मात्पुकारशातेनापि निरूप्यमाणे तत्त्वे नेति नेत्यात्मैव निष्ठानान्यापलभ्यते
ते केणावगमेन वा तस्मादेतदेवामृतत्वसाधनं यदेतन्नेति नेत्यात्मपरिज्ञानं ससन्यासमित्येतमर्थमुपसंजिहीर्षन्नाह एता
वदेतावन्मात्रं यदेतन्नेति नेत्यद्वैतात्मदर्शनमिदं चान्यत्सहकारिकारणनिरपेक्षमरे मैत्रेय्यमृतत्वसाधनं यत्पृष्टवत्यसि यद
वरुगन्तेच्छत देवमेविदुषम्तत्त्वसाधनमिति तदेतावदेवेति विज्ञेयं त्वया इति ह एवं किलामृतत्वसाधनमात्मज्ञानं पृष्टयावेला १५४
यै यैउक्त्वा याज्ञवल्क्यः किं कृतवानन्यत्पूर्वं प्रतिज्ञानं प्रव्रजिष्यन्नस्मीति तच्चकार विजहार प्रव्रजितवानित्यर्थः परिसमाप्ता
ब्रह्मविद्या ससंन्यासपर्यवसाना एतावाननुपदेशः एतद्वेदानुशासनं एषा परमा निष्ठा एष पुरुषार्थः कर्त्तव्यता चेति॥ ॥इदानीं वि
चार्यते शास्त्रार्थविवेकप्रतिपत्तये यतः आकुलानि हि वाक्यानि दृश्यन्ते यावज्जीवमग्निहोत्रं जुहुयात् यावज्जीवं दर्शपूर्णमासाभ्यां

यजेत कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः एतद्वै जरामर्यं सत्रं यदग्निहोत्रमित्यादीन्यैकाश्रमप्रतिपादकानि अन्यानि
चाश्रमान्तरप्रतिपादकानि वाक्यानि विदित्वा व्युत्थाय प्रव्रजंति ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेद्यदि वेतरथा
ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वेति द्वावेव पंथानावनुनिःक्रांततरौ क्रियापथश्चैव पुरस्तात्संन्यासश्च तयोः सन्यास ए
वातिरेचयतीति न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरित्यादीनि तथा स्मृतयश्च ब्रह्मचर्यवान्प्रव्रजति अविशी
र्णब्रह्मचर्योयमिच्छेत्तमावसेत् तस्याश्रमविकल्पं एके ब्रुवते वेदानधीत्य ब्रह्मचर्येण पुत्रपौत्रानिच्छेत्पावनार्थं पितॄणां
अग्नीनाधाय विधिवदिष्ट्वा यज्ञैर्वनं प्रविश्याथ मुनिर्बुभूषेत् प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणामात्मन्यग्नीन्समारोप्य
ब्राह्मणः प्रव्रजेद्गृहादित्यादि एवं व्युत्थानविकल्पक्रमयथेष्टाश्रमप्रतिपत्तिप्रतिपादकानि हि श्रुतिस्मृतिवाक्यानि शत
श उपलभ्यन्ते इतरेतरविरुद्धानि आचारश्च तद्विदां विप्रतिपत्तिश्च शास्त्रार्थप्रतिपत्तॄणां बहुविदामप्येतान्वाक्यतो शास्त्रा
र्थमिदं बुद्धिमद्भिर्विवेकेन प्रतिपत्तुं परिनिष्ठितशास्त्रन्यायबुद्धिभिरेव ह्येषां वाक्यानां विषयविभागः शक्यतेवधारयितुं तस्मा
देषां विषयविभागज्ञापनाय यथाबुद्धिसामर्थ्यं विचारयिष्यामः यावज्जीवश्रुत्यादिवाक्यानामन्यार्थासंभवात् किं यावसान
एव वेदार्थः स्याद्यत्तपात्रैर्दहंतीत्येकर्मश्रवणात् जरामर्यश्रवणाच्च लिंगाच्च तस्मात् संशारीरिभिर्तिन हि पारिव्राज्यपक्षे तस्मात्

ताशरीरस्यस्यात्तत्सुतेष्वनिषेकादिश्मसानांतो मंत्रैर्यस्योदितो विधिः। तस्य शास्त्रेऽधिकारोऽस्मिन्ज्ञेयो नान्यस्य कस्यचिदिति। स
मंत्रकं हि यत्कर्म वेदेन विधीयते तस्य श्मशानांततां दर्शयति अधिकारार्थं च प्रदर्शनाद्वास्पत्तमेव श्रुत्यधिकाराच्चावो कर्मणो गम्य
ते। अभ्युद्वासनायवादाद्धवीरहावापवदेवानां योऽग्निमुद्वासयति न तद्व्युच्छानादिविधाना द्वैकल्पिकं क्रियावसानत्वं वेदा
र्थस्य नान्यार्थत्वाद्व्युच्छानादिश्रुतीनां यावज्जीवमग्निहोत्रं जुहोति यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेत्येवमादीनां श्रुती
नां जीवनमात्रनिमित्तत्वात् यदा न शक्यते न्यार्थता कल्पयितुं तदा व्युच्छानादिवाक्यानां कर्मानधिकृतविषयत्वसंभवान् कु
५ र्वन्नेवेह कर्माणि जिजीविषेच्छतं समा इति च मंत्रवर्णात् जरया ह्येवास्मान्मुच्यते मृत्युना वेति च जरामृत्युभ्यामन्यत्र कर्म
वियोगस्याशिष्टत्वासंभवात् कर्मिणां श्मशानांतत्वं न वैकल्पिकं। काणकुंटादयोऽपि कर्मण्यनधिकृताः अनुग्राह्या एव श्रुत्येति व्यु १५५
च्छानाद्याश्रमांतरविधानं नानुपपन्नं पारिव्राज्यक्रमविधानस्यानवकाशत्वमिति चेन्न विश्वजित्सर्वमेधयोर्यावज्जीवविध्यपवा
दत्वात्। यावज्जीवाग्निहोत्रादिविधेर्विश्वजित्सर्वमेधयोरेवापवादस्तत्र च क्रमप्रतिपत्तिसंभवो ब्रह्मचर्यं समाप्य गृही भवेत् गृहा
द्वनी भूत्वा प्रव्रजेदिति विरोधानुपपत्तेर्नह्येवंविषयत्वे पारिव्राज्यक्रमविधानवाक्यस्य कश्चिद्विरोधः क्रमप्रतिपत्तेरन्यविषयकल्पना।

यांतु यावज्जीवविधानश्रुतिः स्वविषयात्संकोचिता स्यात् क्रमप्रतिपत्तेस्तु विश्वजित्सर्वमेधविषयत्वान्न कश्चिद्विरोधः॥ ॥ नात्मज्ञा
नस्यामृतत्वहेतुत्वाभ्युपगमात् यत्तावदात्मेत्येवोपासीतेत्यारभ्य स एष नेति नेतीत्येतदंतेन ग्रंथेनाभ्युपसंहृतमात्मज्ञानं तदमृतत्व
साधनमित्यभ्युपगतं भवति एतावद्वा अमृतत्वसाधनमन्यनिरपेक्षमित्येतन्न मृष्यते तन्न भवत्तं पृच्छामि किमर्थमात्मज्ञानं मर्षयति भ
वानिति शृणु कारणं यथा स्वर्गकामस्य स्वर्गप्राप्त्युपायमज्ञानतोऽग्निहोत्रादि स्वर्गप्राप्तिसाधनं ज्ञापयति तथेहाप्यमृतत्वप्रतिपि
त्सोरमृतत्वप्राप्त्युपायमजानतो यदेव भगवान्वेत्थ तदेव मे विब्रूहीत्येवमाकांक्षितममृतत्वसाधनं एतावदरे इत्येवमादौ वेदे
न ज्ञाप्यत इति। एवं तर्हि यथा ज्ञापितमग्निहोत्रादि स्वर्गसाधनमभ्युपगम्यते तथेहाप्यात्मज्ञानं यथा ज्ञाप्यते तथाभूतमेवामृ
तत्वसाधनमात्मज्ञानमभ्युपगंतुं युक्तं तुल्यप्रमाणत्वादुभयत्र यद्येवं किं स्यात् सर्वकर्महेतूपमर्दकत्वादात्मज्ञानस्य विद्योदये कर्म
निवृत्तिः स्यात् दाराग्निसंबंधानां तावदग्निहोत्रादि कर्मणो त्वेदबुद्धिविषयसंप्रदानकारकसाध्यत्वमन्यबुद्धिपरिछेद्याग्न
न्यादिदेवतां संप्रदानकारकभूतामंतरेण न हि तत्कर्म निर्वर्त्यते यथा हि संप्रदानकारकबुध्या संप्रदानकारकं कर्मसाधनत्वे
नोद्दिश्यते सेह विद्यया निवर्त्यते अन्योऽसावन्योऽहमस्मीति न स वेद देवास्तं परादुर्योऽन्यत्रात्मनो देवान्वेद मृत्योः स मृत्युमाप्नो
ति य इह नानेव पश्यति एकधैवानुद्रष्टव्यं सर्वमात्मानं पश्यतीत्यादिश्रुतिभ्यः न च देशकालनिमित्ताद्यपेक्षत्वं व्यवस्थि

तावस्तुविषयत्वात् आत्मज्ञानस्य तथा यास्तु पुरुषतंत्रत्वात्स्याद्देशकालनिमित्तापेक्षत्वं ज्ञानं तु वस्तुतंत्रत्वान्न दे
शकालं निमित्ताद्यपेक्षते यथाग्निरुष्ण आकाशोमूर्त्त इति तथात्मविज्ञानमपि नन्वेवं सति प्रमाणजं तस्य कर्मविधे
र्निरोधः स्यान्न तुल्यप्रमाणयोरितरेतरनिरोधो युक्तः नस्वाभाविकत्वेदबुद्धिमात्रविरोधकत्वात् न हि विध्यंतरनिरो
धकमात्मज्ञानं स्वाभाविकत्वेदबुद्धिमात्रं निरुणद्धि तथापि हेत्वपहारात्कर्मानुपपत्तेर्विधिनिरोध एव स्यादिति चेन्न का
मप्रतिषेधात्कांप्रवृत्तिनिरोधवत्त्वदोषात् यथा स्वर्गकामो यजेतेति स्वर्गसाधनयागे प्रवृत्तस्य कामप्रतिषेधविधिः
कामे विहते काम्ययागानुष्ठानप्रवृत्तिर्निरुध्यते न चैतावता काम्यविधिर्निरुद्धो भवति कामप्रतिषेधविधिना काम्यवि
धेरनर्थत्वज्ञानान्प्रवृत्त्यनुपपत्तेर्निरुद्ध एव स्यादिति चेद्भवत्वेवं कर्मविरोधोपि यथा कामप्रतिषेधे काम्यविधेस्त १५९
थाप्रमाण्यानुपपत्तिरिति चेदननुष्ठेयत्वेनुष्ठातुरज्ञावादनुष्ठानविध्यानर्थक्यादप्रामाण्यमेव कर्मविधीनामिति चेन्न
प्रागात्मज्ञानात्प्रवृत्त्युपपत्तेः स्वाभाविकस्य क्रियाकारकफलभेदविज्ञानस्य प्रागात्मज्ञानात्कर्महेतुत्वमुपपद्यत एव यथा का
मविषये दोषज्ञानोत्पत्तेः प्राक्काम्यकर्मप्रवृत्तिहेतुत्वं स्यादेव स्वर्गादीच्छायाः स्वाभाविक्याः तद्वत् तथा सत्यनर्थार्थविद इति चे

धिनि ४

न्नार्थानर्थयोरात्मप्रायतंत्रत्वात् मोक्षमेकं वर्जयित्वान्यस्याविद्याविषयत्वात् पुरुषार्थाप्तिप्रायतंत्रो ह्यर्थानर्थो मरणा
दिकाम्येष्टिदर्शनात् तस्माद्यावदात्मज्ञानविधेरात्मिमुख्यं तावदेव कर्मविधयस्तस्मान्नात्मज्ञानसहत्वाविर्त्वं कर्म
णा मिलतः सिद्धमात्मज्ञानमात्रमेतावदरे खल्वमृतत्वमिति कर्मनिरपेक्षत्वाल्लानस्यानविदुषस्तावत्पारिव्राज्यं
सिद्धं संप्रदानादिकर्मकारकशात्यादिशून्याविक्रियब्रह्मात्मदृढप्रतिपत्तिमात्रेण वचनमंतरेण व्युत्थानमुपायतः तथा च
व्याख्यातमेतत् येषां नोयमात्मायं लोक इति हेतुवचनेन पूर्वे विद्वांसः प्रजामकामयमाना व्युत्तिष्ठंतीति पारिव्राज्यं विदुषा
मात्मलोकावबोधादेव तथा विविदिषोरपि सिद्धं पारिव्राज्यमेतमात्मानं लोकमिच्छंतः प्रव्रजंतीति वचनात् कर्मणां चावि
द्वद्विषयत्वमवोचाम तथा विद्याविषयेवोन्यथ्यापि विकारसंस्कारार्थानि कर्माणीत्यतः आत्मसंस्कारद्वारेणात्मज्ञानसा
धनत्वमपि कर्मणामवोचाम यज्ञादिभिर्विविदिषंतीति तथैवं सत्यविद्वद्विषयाणामाश्रमकर्मणां बलाबलविचारणाय
मात्मज्ञानोत्पादनं प्रति यमप्रधानानामहिंसादीनां मानसानां च ध्यानज्ञानवैराग्यादीनां संनिपत्योपकारकत्वं हिंसारागादि
दोषदिवाडूत्यात् बहुदृष्ट कर्मविमिश्रितो इतः पारिव्राज्यं मुमुक्षूणां प्रशंसितित्याग एव हि सर्वेषां मुक्तानामपि कर्मणां

[illegible]

नियम २ समाप्ति

...राग्यंपुनरेतस्यमोक्षस्यपरमोविधिः।किंतेधनेनकिमुवंधुभिस्तेकिंतेदारैर्ब्राह्मणयोमरिष्यसि।आत्मानमन्विच्छगुहांप्र
विष्टंपितामहास्तेक्वगतःपिताच।एवंसांख्ययोगशास्त्रेषुवसनात्।सोज्ञानंप्रतिप्रत्यासन्नउच्यतेकामप्रवृत्त्यसत्वाच्च
कामप्रवृत्तेर्हिज्ञानप्रतिकूलतासर्वशास्त्रेषुप्रसिद्धा।तस्माद्विरक्तस्यमुमुक्षोर्विनापिज्ञानेनब्रह्मचर्यादेवप्रव्रजेदित्याद्युपपन्नं
ननुसावकाशत्वादनधिकृतविषयमेतदित्युक्तंयावज्जीवश्रुत्यनुपरोधाच्चेषदोषोनितरांसावकाशत्वाद्यावज्जीवश्रुतीनाम
विरक्तकामिकर्तव्यतांह्येवोचामसर्वकर्मणांननुनिरपेक्षमेवजीवननिमित्तमेवकर्तव्यंकर्मप्रायेणहिपुरुषाःकामबहुलाः
कामश्चानेककर्मसाधनसाध्यश्चानेकफलसाधनानिचवैदिकानिकर्माणिदाराग्निसंबंधपुरुषकर्तव्यानिपुनःपुनश्चानु
ष्ठीयमानानिबहुफलानि।कृष्यादिवद्दर्शप...तसमाप्तीनिचगार्हस्थ्येवारण्येवातस्तदपेक्षयायावज्जीवश्रुतयः।कुर्वन्ने १५७
वेहकर्माणीतिचमंत्रवादस्तस्मिंश्चपक्षेविश्वजित्सर्वमेधयोःकर्मपरित्यागः।यस्मिंस्तुपक्षेयावज्जीवानुष्ठानंतदान्तमन्त्रा
नात्तत्वंतस्मात्तत्रास्वशरीरस्येतरवर्णापेक्षयाचयावज्जीवश्रुतिः।नहिक्षत्रियवैश्ययोःपारिव्राज्यप्रतिपत्तिरस्ति।तथामंत्रे
र्यस्योदितोविधिरैकाश्रम्यंत्वाचार्यइत्येवमादीनांक्षत्रियवैश्यापेक्षत्वंतस्मात्पुरुषसामर्थ्यज्ञानवैराग्यकामाद्यपेक्षयाव्यु

त्थानविकल्पक्रमपारिव्राज्यप्रतिपत्तिप्रकारानविरुध्यंतेअनधिकृतानांचपृथग्विधानात्पारिव्राज्यस्य।स्नातकोवाऽस्नातकोवोत्स
न्नाग्निरनग्निकोवेत्यादिना।तस्मात्सिद्धान्याश्रमांतराण्यधिकृतानामेव।अथानंतरंयाज्ञवल्कीयस्यवंशआरभ्यतेयथामधुकांड
स्यवंशोव्याख्यानंतुपूर्ववत्ब्रह्मस्वयंभुब्रह्मणेनमःॐमिति।। ।।गोविंदभगवत्पूज्यपादशिष्यस्यपरमहंसपरिव्राजकस्यश्रीशंक
रभगवतःकृतावृहदारण्यकटीकायांषष्ठोध्यायःसमाप्तः।। ।।पूर्णमदइत्यादिखिलकांडमारभ्यतेऽध्यायचतुष्टयेनयदेवसा
क्षादपरोक्षाद्ब्रह्मयआत्मासर्वांतरोनिरुपाधिकोऽशनायाद्यतीतोनेतिनेतिव्यपदेश्योनिर्धारितोयद्विज्ञानंकेवलममृतत्वसाधनमधु
नातस्यैवात्मनःसोपाधिकस्यशब्दार्थादिव्यवहारविषयापन्नस्यपुरस्तादनुक्तान्युपासनानिकर्मभिरविरुद्धानिप्रकृष्टाभ्युदयसा
धनानिक्रममुक्तिफलानिचवक्तव्यानीतिपरःसंदर्भः।सर्वोपासनशेषत्वेनॐकारोदमंदानंदयामित्येतानिचविधित्सितानि
पूर्णमदःपूर्णनकुतश्चिद्व्यावृत्तंव्यापीत्येतन्निष्ठाचकर्तरिद्रष्टव्या।अदइतिपरोक्षाभिधायिसर्वनामतत्परंब्रह्मेत्यर्थः।तत्सं
पूर्णमाकाशवद्व्यापिनिरंतरंनिरुपाधिकंच।तदेवेदंसोपाधिकंनामरूपस्थंव्यवहारापन्नंपूर्णंस्वेनरूपेणपरमात्मनाव्याप्येव
नोपाधिपरिच्छिन्नेनविशेषात्मनातदिदंविशेषापन्नंकार्यात्मकंब्रह्मपूर्णात्कारणादात्मनउदच्यतेउद्रिच्यतेउद्गच्छतीत्ये
तत्यद्यपिकार्यात्मनोद्रिच्यतेतथापियत्स्वंस्वरूपंपूर्णत्वंपरमात्मभावंनजहातिपूर्णमेवोद्रिच्यतेपूर्णस्यकार्यात्मनोब्रह्म

एषः पूर्णात्पूर्णत्वमादाय गृहीत्वात्मस्वरूपैकरसत्वमापाद्य विद्ययाविद्याकृतं भूतमात्रोपाधिसंसर्गजमन्यत्वावभासं ति
रस्कृत्य पूर्णमेवानंतरमबाह्यं प्रज्ञानघनैकरसस्वभावं केवलं ब्रह्मावशिष्यते यदुक्तं ब्रह्म वा इदमग्र आसीत्तदात्मानमे
वावेत्तस्मात्तत्सर्वमभवदित्येषोस्य मंत्रवर्णस्यार्थः तत्र ब्रह्मेत्यस्यार्थः पूर्णमद इति इदं पूर्णमिति। ब्रह्म वा इदम
ग्र आसीदित्यर्थः। तथा च श्रुत्यंतरं यदेवेह तदमुत्र यदमुत्र तदन्विहेति अतो अदः शब्दवाच्यं पूर्णं ब्रह्म तदेवेदं पूर्णं कार्यस्थं
नामरूपोपाधिसंयुक्तमविद्ययोद्रिक्तं तस्मादेव परमार्थस्वरूपात् अन्यदिव प्रत्यवभासमानं तदात्मानमेव परं पूर्णं ब्रह्म वि
दित्वाहमदः पूर्णं ब्रह्मास्मीत्येवं पूर्णमादाय तिरस्कृत्य अपूर्णस्वरूपतामविद्याकृतां नामरूपोपाधिसंपर्कजामेतया ब्रह्मवि
द्यया पूर्णमेव केवलमवशिष्यते तथा चोक्तं तस्मात्तत्सर्वमभवदिति। यः सर्वोपनिषदर्थः ब्रह्म स एषोनेन मंत्रेणानूद्यते उत्तरसंबं
धार्थं ब्रह्मविद्यासाधनत्वेन हि वक्ष्यमाणानि साधनान्योंकारदमदानदयाख्यानि विविधिन्सितानि खिलप्रकरणसंबंधात्सर्वो १५८
पासनांगभूतानि च। अत्रैके वर्णयंति पूर्णात्कारणात्पूर्णं कार्यमुद्रिच्यते उद्रिक्तं कार्यं वर्तमानकालेपि पूर्णमेव परमार्थवस्तु
भूतं द्वैतरूपेण पुनः प्रलयकाले पूर्णस्य कार्यस्य पूर्णतामादायात्मनि धित्वा पूर्णमेवावशिष्यते कारणरूपं एवमुत्पत्तिस्थितिप्रल
येषु त्रिष्वपि कालेषु कार्यकारणयोः पूर्णतैव सा चैव पूर्णता कार्यकारणयोर्भेदेन व्यपदिश्यते। एवं च द्वैताद्वैतात्मकमेकं

ब्रह्म यथा किल समुद्रो जलतरंगफेनबुद्बुदाद्यात्मकः एवं यथा च जलं सत्यं तदुद्भवाश्च तरंगफेनबुद्बुदादयः। समुद्रात्मभूता ए
वाविर्भावतिरोभावधर्मिणः परमार्थसत्या एव एवं सर्वमिदं द्वैतं परमार्थसत्यमेव जलतरंगादिस्थानीयं समुद्रजलस्थानीयं
तु परं ब्रह्म एवं च किल द्वैतस्य सत्यत्वे कर्मकांडस्य प्रामाण्यं। यदा पुनर्द्वैतमिवाविद्याकृतं मृगतृष्णिकावदनृतमद्वैतमेव प
रमार्थतस्तदा किल कर्मकांडं विषयाभावान्न प्रमाणं भवति। तथा च विरोध एव स्याद्वेदैकदेशभूतोपनिषत्प्रमाणं। परमा
र्थाद्वैतवस्तुप्रतिपादकत्वादप्रमाणं कर्मकांडमसद्द्वैतविषयत्वात्तद्विरोधपरिजिहीर्षया श्रुत्यैतदुक्तं कार्यकारणयोः सत्य
त्वं समुद्रवत्पूर्णमद इत्यादिनेति। तदसद्विशिष्टविषयापवादविकल्पयोरसंभवान्नहीयं सुविवक्षिता कल्पना कस्मात् यथा
क्रियाविषयेत्सर्गप्राप्तस्यैकदेशेऽपवादः क्रियते। यथाहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्य इति हिंसा सर्वभूतविषयोत्सर्गेण निवा
रिता तीर्थविशिष्टविषये अग्नीषोमादावनुज्ञायते न च तथा वस्तुविषय इहाद्वैतं ब्रह्मोत्सर्गेण प्रतिपाद्य पुनस्तदेकदेशोपवदि
तुं शक्यते। ब्रह्मणोद्वैतत्वादेवैकदेशानुपपत्तेस्तथा विकल्पानुपपत्तेश्च। यथातिरात्रे षोडशिनं गृह्णातिनातिरात्रे षोडशि
नं गृह्णातीति ग्रहणाग्रहणयोः पुरुषाधीनत्वाद्विकल्पो भवति न त्विह तथा वस्तुविषये द्वैतं वा स्यादद्वैतं वेति विकल्पः संभवत्य
पुरुषतंत्रत्वादात्मवस्तुनो विरोधाच्च द्वैताद्वैतत्वयोरेकस्य तस्मान्न सा विवक्षितेयं कल्पना श्रुतिन्यायविरोधाच्च सैंधवघनवत्

नानेकरसघनंनिरंतरंपूर्वापरबाह्याभ्यंतरभेदवर्जितंसबाह्याभ्यंतरमजंनेतिनेत्यस्थूलमनंजरममजयममृतमित्येवमा
द्याः श्रुतयोनिश्चितार्थाः संन्यायपर्यासान्निराकरहिताः सर्वाः समुद्रेप्रक्षिप्ताः स्युः किंविलक्षणत्वात्तथान्यायविरोधोपिसा
वयवस्यानेकात्मकस्यक्रियावतोनित्यत्वानुपपत्तेः नित्यत्वंचात्मनः स्मृत्यादिदर्शनादनुमीयते। तद्विरोधश्चप्राप्नोति। अनि
त्यत्वेचकल्पनानर्थक्यंचस्फुटमेवचास्मिन्पक्षेकर्मकांडानर्थक्यमकृताभ्यागमकृतविप्रणाशप्रसंगात्। नतुब्रह्मणोद्वै ताद्वै
२ तात्मकत्वेसमुद्रादिदृष्टांताविद्यंतेकथमुच्यतेएवंतैकस्यद्वैताद्वैतत्वंविरुद्धमिति। नान्यविषयत्वान्नित्यनिरवयववस्तुविष
यंविरुद्धत्वमवोचामद्वैताद्वैतस्यनकार्यविषयेसावयवेतस्मात्तच्छ्रुतिस्मृतिन्यायविरोधादनुपपन्नेयंकल्पनाअस्याःक
ल्पनायावरमुपनिषत्परित्यागएव। अध्येयत्वाच्चनशास्त्रार्थेयंकल्पनानहिजननमरणानर्थशतसहस्रभेदसमाकुलं
समुद्रवनादिवत्सावयवमेकरसंब्रह्मध्येयत्वेनविज्ञेयत्वेनवाश्रुत्योपदिश्यतेप्रज्ञानघनंतंचोपदिशतिएकधैवानुद्रष्टव्य १५८
मितिविनानेकधादर्शनापवादाच्चमृत्योः समृत्युमाप्नोतियइहनानेवपश्यतीतियच्चश्रुत्यानिंदितंतन्नकर्तव्यंयच्चनक्रियतेन
सशास्त्रार्थोब्रह्मणोनैकरसत्वमनेकधात्वंद्वैतरूपंनिंदितत्वान्नद्रष्टव्यमतोनशास्त्रार्थःएकरसत्वंब्रह्मणस्तुद्रष्टव्यत्वाच्छा
स्त्रत्वाच्चशास्त्रार्थत्वंविनुमर्हतियत्तूक्तंवेदैकदेशस्याप्रामाण्यंकर्मविषयेद्वैताभावादद्वैतत्वप्रामाण्यमिति। तन्नयथाप्राप्तमुप

देशार्थत्वान्नहिद्वैतम...मद्वैतंवावस्तुजातमात्रमेवपुरुषंज्ञापयित्वापश्चात्कर्मवाब्रह्मविद्यांवोपदिशतिशास्त्रं
...नचोपदेशार्हंद्वैतंजातमात्रप्राणिबुद्धिगम्यत्वात्नचद्वैतस्यानृतत्वबुद्धिः प्रथममेवकस्यचित्स्यात्येनाद्वैतस्यसत्य
त्वमुपदिश्यपश्चादात्मनः प्रामाण्यंप्रतिपादयेच्छास्त्रंनापिपाखंडिभिरपिप्रस्थापिताः शास्त्रस्यप्रामाण्यंनगृह्णीयु
स्तस्माद्यथाप्राप्तमेवद्वैतमविद्याकृतंस्वाभाविकमुपादायस्वाभाविक्यैवाविद्यययुक्तायरागद्वेषादिदोषवतेयथाभिमत
पुरुषार्थसाधनंकर्मोपदिशत्यग्रेपश्चात्प्रसिद्धक्रियाकारकफलस्वरूपदोषदर्शनवतेतद्विपरीतौदासीन्यस्वरूपावस्था
नफलार्थिनेतदुपायस्ततआत्मैकत्वदर्शनात्मिकांब्रह्मविद्यामुपदिशतिअथैवंसतितदौदासीन्यस्वरूपावस्थानेफलेप्रा
प्तेशास्त्रस्यप्रामाण्यंप्रत्यर्थित्वंनिवर्ततेतदभावाच्छास्त्रस्यापिशास्त्रत्वंतंप्रतिनिवर्ततएवतथाप्रतिपुरुषंपरिसमाप्तंशास्त्रमि
तिनशास्त्रविरोधगंधोप्यस्यद्वैतज्ञानावसानत्वाच्छास्त्रशिष्यशासनादिद्वैतमेतदस्यान्यतमावस्थानेहिविरोधः स्यादवस्थि
तस्येतरेतरापेक्षत्वाच्चशास्त्रशिष्यशासनानांनान्यतमोप्यवतिष्ठतेसर्वसमाप्तौकस्यविरोधआशंक्येताद्वैतेकेवले
शिवेसिद्धेनापिविरोधतातावदेवंयथाप्युपन्यस्तमूमः। द्वैताद्वैतात्मकत्वेपिशास्त्रविरोधस्यतुल्यत्वाद्यदापिसमुद्रादिवद्द्वैताद्वै द्वैता
तात्मकमेकंब्रह्माभ्युपगच्छामोनान्यद्वस्त्वंतरंतदापितद्वदुक्ताच्छास्त्रविरोधान्नमुच्यामहेकथमेकंहिपरंब्रह्माद्वैतात्मकं[illegible]

कर्केरु

त्तच्छोकमोहाद्यतीतत्वादुपदेशानाकांक्षति न चापदेष्टान्यो ब्रह्मणोऽद्वैताद्वैतरूपस्य ब्रह्मण एकस्यैवाभ्युपगमात् यद्द्वैतविषय
स्यानेकत्वादन्योन्योपदेशो न ब्रह्मविषय उपदेश इति तदद्वैताद्वैतात्मकं च ब्रह्म नान्यदस्तीति विरुध्यते यस्मिं द्वैतविषयेन्यो
न्योपदेशः सान्योऽद्वैतवान्यदेवेति समुद्रदृष्टांतो विरुद्धः न च समुद्रोदके वह्निज्ञानेकत्वे ब्रह्मणोन्यत्रोपदेशग्रहणादिकल्पनासं
भवति न हि हस्ताद्विद्वैतात्मके देवदत्ते वाक्कर्णयोर्देवदत्तैकदेशभूतयोर्वागुपदेष्ट्री कर्णः केवलं उपदेशस्य ग्रहीता देवदत्तस्तु
नोपदेष्टा नाप्युपदेशस्य ग्रहीतेति कल्पयितुं शक्यते। समुद्रेकोदकात्मकत्ववदेकविज्ञानवत्वाद्देवदत्तस्य तस्माच्छ्रुतिन्याय
विरोधश्चाभिप्रेतार्थासिद्धिश्चैवं कल्पनायां स्यात् तस्माद्यथा व्याख्यात एवास्माभिः पूर्णमद इत्यस्य मंत्रस्यार्थः॥ ॥ॐ खं ब्र
ह्मेति मंत्रोयं चान्यत्राविनियुक्त इह ब्राह्मणेन ध्यानकर्मणि विनियुज्यते अत्र च ब्रह्मेति विशेष्याभिधानं खमिति विशेषणं
विशेषणविशेष्ययोश्च सामानाधिकरण्येन निर्देशो नीलोत्पलवत् खं ब्रह्मेति ब्रह्मशब्दो बृहद्वस्तुमात्रास्पदो विशेषि १६०
तातो विशेष्यते खं ब्रह्मेति यत्तत्खं ब्रह्म तदोंशब्दवाच्यं शब्दस्वरूपमेव वा उभयथापि सामानाधिकरण्यमविरुद्धमि
दं च ब्रह्मोपासनसाधनार्थमोंशब्दः प्रयुक्तः तथा च श्रुत्यंतरेषु एतदालंबनं श्रेष्ठमेतदालंबनं परं ओमित्यात्मानं युंजीत ओमित्ये
तेनैवाक्षरेण परं पुरुषमभिध्यायीत ओमित्येवं ध्यायथ आत्मानमित्यादि अन्यार्थासंभवाच्छास्त्रोपदेशस्य यथान्यत्रोमिति शंसत्यो मि त्यु

ऽयतीत्येवमादौ स्वाध्यायारंभापवर्गयोश्चोंकारप्रयोगो विनियोगादवगम्यते न च तथार्थांतरमिहावगम्यते तस्माद्ध्यानसा
धनत्वेनैव चोंकारस्योपदेशः। यद्यपि ब्रह्मात्मादिशब्दा ब्रह्मणो वाचकास्तथापि श्रुतिप्रामाण्याद्ब्रह्मणो नेदिष्टमभिधान न्न
मोंकारोत एव ब्रह्मप्रतिपत्ताविदं परं साधनं तच्च द्विप्रकारेण प्रतीकत्वेनाभिधानेन च प्रतीकत्वेन यथा विष्ण्वादिप्रतिमाभे
ति देनैवमोंकारो ब्रह्मेति प्रतिपत्तव्यः तथा ह्योंकारालंबनस्य ब्रह्म प्रसीदति। एतदालंबनं श्रेष्ठं एतदालंबनं परं। एतदालंबनं ज्ञात्वा ब्र मे
ह्मलोके महीयत इति श्रुतेः तत्र खमिति कोतिके खप्रतीतिर्माभूदित्याह। खं पुराणं चिरंतनं खं परमात्माकाशमित्यर्थः।
यत्तत्परमात्माकाशं पुराणं तच्चक्षुराद्यविषयत्वान्निरालंबनमशक्यं ग्रहीतुमिति श्रद्धाभक्तिभ्यां भावविशेषेणोंका
रआविवेशयति यथा विष्णुगाकितायां शैलादिप्रतिमायां विष्णुं लोक एवं वायुरं खं वायुरस्मिन्निवेद्यत इति वायुरं खं मंत्रे खमि
त्युक्तेन पुराणं खमित्येव माह स्म कौरव्यायणीपुत्रो वायुरे हि खमुख्यः खशब्दव्यवहारः तस्मान्मुख्यसंप्रत्ययो युक्त
इति मन्यते तत्र यद्यपि पुराणं खं ब्रह्म निरुपाधिस्वरूपं यदि वा वायुरं खं सोपाधिकं ब्रह्म सर्वथाप्योंकारः प्रतीकत्वेनैव प्रतिमा
वत्साधनत्वं प्रतिपद्यते एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकार इति श्रुत्यंतरात् केवलं खशब्दार्थविप्रतिपत्तिः। वेदोयमोंकारो
वेदविज्ञानात्यनेन यद्वेदितव्यं। तस्माद्वेद ॐकारो वाचकोभिधानं तेनाभिधानेन यद्वेदितव्यं ब्रह्म प्रकाशमानमभिधीय

मानंवेदसाधनंकोविजानात्युपलभते । तस्माद्वेदोयमितिब्राह्मणाविदुस्तस्माद्ब्राह्मणानामभिधानत्वेनसाधनत्वमभि
प्रेतमोंकारस्य अथवावेदोयमित्याद्यर्थवादः कथमोंकारोब्रह्मणः प्रतीकत्वेनविहितः ॐखंब्रह्मेतिसामानाधिकरण्यात्
तस्यस्तुतिरिदानीवेदत्वेनसर्वोह्ययंवेदॐकारएवतदात्मकः सर्वंह्यदःॐ सामादिलक्षणंभिन्नएषॐकारस्तद्यथाशंकुनास
र्वाणिपर्णानीत्यादिश्रुत्यंतरादितस्मादयंवेदॐकारोयस्माद्वेदितव्यंयत्तत्सर्वमोंकारेणैववेदेनेनानेनातोयमोंकारोवेदःइ
तरस्यापिवेदस्यवेदत्वमतएवतस्माद्विशिष्टोयमोंकारसाधनत्वेनप्रतिपत्तव्यइतिवाअथवावेदः सः कोसौयंब्राह्मणा
विदुरोंकारंब्राह्मणानांह्यसौप्रणवोद्गीथादिविकल्पैर्विज्ञेयस्तस्मिन्हिप्रयुज्यमानेसाधनत्वेनसर्वोवेदः प्रयुक्तोभवतीति
सप्तमस्यप्रथमंब्राह्मणं । अधुनादमादिसाधनत्रयविधानार्थोयमारंभः त्रयास्त्रिसंख्याकाः प्राजापत्याः प्रजापतेरपत्यानिप्रा
जापत्यास्तेकिंप्रजापतौपितरिब्रह्मचर्यंशिष्य[illegible]वृत्तेब्रह्मचर्यस्यप्राधान्याच्छिष्याः संतोब्रह्मचर्यमूषुरुषितवंतइत्यर्थः केते १६१
विशेषतोदेवामनुष्याअसुराश्चतेचोषित्वाब्रह्मचर्यंकिमकुर्वन्नित्युच्यतेतेषांदेवाऊचुः पितरंप्रजापतिंकिमितिब्रवीतुकथयतुनो
स्मभ्यमनुशासनंभवानितितेभ्यएवमर्थिभ्योहैतदक्षरंवर्णमात्रमुवाच । दइति उक्त्वाचतान्प्रपच्छपिताकिंव्यज्ञासिष्टाइतिमयो
पदेशार्थमभिहितस्याक्षरस्यार्थंविज्ञातवंतः आहोस्विन्नेतिदेवाऊचुर्व्यज्ञासिष्मेतिविज्ञातवंतोवयंयद्येवमुच्यतांकिमयोक्तमिति

धर्मणी४

अतो ।

देवाऊचुर्दाम्यतयूयंस्वभावतः अदांतायतोदांताभवतेतिनोस्मानात्थकथयसि । इतरओमितिसम्यग्व्यज्ञासिष्टेतिसमानम
न्यत्सर्वंनावत्तोलुब्धायूयमतोयथाशक्तिसंविभजतदत्तेतिनोस्मानात्थकिमन्यद्ब्रूयान्नोहितमितिमनुष्याः तथासुरादयध्वमि
तिक्रूरायूयंहिंसापराअतोदयध्वंप्राणिषुदयांकुरुतेतितदेतत्प्रजापतेरनुशासनमद्याप्यनुवर्त्ततएवयः पूर्वंप्रजापतिर्देवा
दीनन्वशात्सोद्याप्यनुशास्त्येवदैव्यास्तनयित्नुलक्षणयावाचाकथमेषाश्रूयतेदैवीवाक्कासौस्तनयित्नुर्ददद इतिदाम्यतदत्तद
यध्वमित्येषांवाक्यानामुपलक्षणाययत्त्रिर्दकारउच्चार्यतेअनुकृतिः नतुस्तनयित्नुशब्दस्त्रिरेवसंख्यानियमस्यलोकेऽप्रसिद्ध
त्वात् । यस्मादद्यापिप्रजापतिर्दाम्यतदत्तदयध्वमित्यनुशास्त्येवतस्मात्कारणादेतत्त्रयंकिंतत्त्रयमित्युच्यतेदमंदानंदयामि
तिशिक्षेदुपाददीतप्रजापतेरनुशासनमस्माभिः कर्त्तव्यमित्येवंमतिंकुर्यात्तथाचस्मृतिः त्रिविधंनरकस्येदंद्वारंनाशनमात्मनः का
मः क्रोधस्तथालोभः तस्मादेतत्त्रयंत्यजेदस्यद्विविधः शेषः पूर्वस्तुचापिदेवादीनुद्दिश्यकिमर्थंदकारत्रयमुच्चारितवान्प्रजाप
तिः पृथगनुशासनार्थिभ्यः सर्वेषांकथंविवेकेनप्रतिपन्नाः प्रजापतेर्मनोगतंसमानेनैवदकारवर्णमात्रेणेतिपराभिप्रायज्ञानविकल्प्यं
ति । लोकेआहुः अदांतत्वाददातृत्वाद्दयालुत्वैरपराधित्वमात्मनोमन्यमानाः शंकिताएवप्रजापतावूषुः किंनोवक्ष्यतीतिते
षांदकारश्रवणमात्रादेवात्मानंकाकवशेनतदर्थप्रतिपत्तिरभूत् । लोकेपिहिप्रसिद्धंपुत्राः शिष्याश्चानुशास्याः संतोदोषान्निव

र्त्तयितव्यांइतिअतोयुक्तंप्रजापतेर्दकारमात्रोच्चारणंदमादित्रयेषुदकारान्वयादात्मनोदोषानुरूप्येणदेवादीनांविवेकेनप्रतिपत्तुं
चेतिफलंत्वेतदात्मदोषज्ञानेसतिदोषान्निवर्त्तयितुंशक्यतेऽल्पेनाप्युपदेशेनयथादेवादयोदकारमात्रेणेतिनन्वेतत्त्रयाणांदेवा
२ दीनामनुशासनंदेवादिभिरप्येकैकमेवोपादेयमद्यत्वेपिनतुयंत्रेमनुष्यैःशिक्षितव्यमितिअत्रोच्यते।पूर्वैर्देवादिभिर्विशिष्टै
रनुष्ठितमेतत्त्रयंतस्मान्मनुष्यैरेवशिक्षितव्यमितितत्रदयालुत्वस्यानुष्ठेयत्वंप्रसंगात्।कथमसुरैरप्रशस्तैरनुष्ठितत्वादि
तिचेन्नतुल्यत्वात्।त्रयाप्रजापतेःपुत्रादेवादयःत्रयःपुत्रेभ्यश्चहितमेवपित्रोपदेष्टव्यंप्रजापतिश्चहितज्ञोनान्यथोपदि
शतितस्मात्पुत्रानुशासनंप्रजापतेःपरममेतद्धितमतोमनुष्यैरेवैतत्त्रयंशिक्षितव्यमितिअथवानदेवाःअसुरावान्येके
चनविद्यंतेमनुष्येभ्योमनुष्याणामेवादांतानप्पन्यैरुत्तमैर्गुणैःसंपन्नास्तेदेवाःलोभप्रधानामनुष्यास्तथाहिंसपराःक्रूरा १५५ १६२
असुरास्तएवमनुष्याअदांतत्वादिदोषत्रयमपेक्ष्यदेवादिशब्दभाजोभवंतिइतरांश्चगुणान्सत्वरजस्तमांस्यपेक्ष्यातोमनु
ष्यैरेवशिक्षितव्यमेतत्त्रयमितितदपेक्षयैवप्रजापतिनोपदिष्टत्वात्तथाहिमनुष्याअदांतालुब्धाःक्रूराश्चदृश्यंतेतथाचस्मृतिः
कामःक्रोधस्तथालोभस्तस्मादेतत्त्रयंत्यजेदिति।। ।।दम[illegible]दिसाधनत्रयंसर्वोपासनशेषंविहितंदांतोलुब्धोदयालुःसन्सर्वोपा
सनेष्वधिकृतइतितत्रनिरूपाधिकस्यब्रह्मणोदर्शनमतिक्रांतमथाधुनासोपाधिकस्यतस्यैवाभ्युदयफलानिवक्तव्यानी

समाप्तंचद्वितीयंब्राह्मणं।।

देवां स्त

प२

त्येवमर्थीयमारंभःएषप्रजापतिर्यद्धृदयंप्रजापतिःरनुशास्तीत्यनंतरमेवाभिहितंकःपुनरसावनुशास्ताप्रजापतिरित्युच्यते। रि
एषप्रजापतिःकोसौयद्धृदयंहृदमितिहृदयस्थाबुद्धिरुच्यतेयस्मिन्शाकल्यब्राह्मणांतेनामरूपकर्मणामुपसंहारउक्तोदिग्वि
भागद्वारेणतदेतत्सर्वभूतप्रतिष्ठंसर्वभूतात्मभूतंहृदयंप्रजापतिःप्रजानांस्रष्टाएतद्ब्रह्मबृहत्त्वात्सर्वात्मत्वाच्चब्रह्मएतत्सर्वमुक्तं
पंचमाध्यायेहृदयस्यसर्वत्वंतत्सर्वंयस्मात्तस्मादुपास्यंहृदयंब्रह्मतत्रहृदयनामाक्षरविषयमेवतावदुपासनमुच्यते।तदेतत्
हृदयमितिनामत्र्यक्षरंत्रीण्यस्यतित्र्यक्षरंकानिपुनस्तानित्रीण्यक्षराणीत्युच्यतेहृइत्येकमक्षरमभिहरंतिहृतेराहृतिकर्मणो
हृइत्येतद्रूपमितियोवेदतस्माद्धृदयायब्रह्मणेस्वाश्चेंद्रियाण्यन्येवविषयाःशब्दादयःस्वंस्वंकार्यमभिहरंतिहृदयंचभोक्त्र
र्थमभिहरंत्यातोहृदयनाम्नोहृइत्येतदक्षरमितियोवेदास्मैविदुषेऽभिहरंतिस्वाश्चज्ञातयोन्येवासंबद्धावलिमितिवाक्यशेषःवि
[illegible]ज्ञानानुरूप्येणैतत्फलंतथादइत्येतदप्येकमक्षरमेतदपिदानार्थस्यददातेर्दरूपंहृदयनामाक्षरत्वेननिर्दिष्टमत्रापिहृद
दयायब्रह्मणेस्वाश्चकरणान्यन्येवविषयाःस्वंस्वंवीर्यंददतिहृदयंचभोक्त्रेददातिस्वंवीर्यमतोदकारइत्येवंयोवेदास्मैददति
स्वाश्चान्येचतथायमित्येतदप्येकमक्षरमिणोगत्यर्थस्यएतद्रूपमस्मिन्नाम्नीतिब्रह्मइतियोवेदसःस्वर्गलोकमेतिएवं
नामाक्षरादपीदृशंविशिष्टफलंप्राप्नोतिकिमुवक्तव्यंहृदयस्वरूपोपासनादितिहृदयस्यतत्येनामाक्षरोपन्यासः।[illegible]

त्रि२

त्येतद्रू४

यत्तत्सत्यं ब्रह्म प्रथमजं किमसौ सः कोऽसावादित्यः कः पुनरसावादित्यो य एष एतस्मिन्नादित्यमण्डले पुरुषोऽभिमानी
सोऽसौ सत्यं ब्रह्म यश्चाध्यात्मं योऽयं दक्षिणेऽक्षन्नक्षिणि पुरुषश्चशब्दात्स च सत्यं ब्रह्मेति संबंधः तावेतावादित्याक्षिस्थौ पुरु
षावेकस्य सत्यस्य ब्रह्मणः संस्थानविशेषौ यस्मात्तस्मादन्योन्यस्मिन्नितरेतरस्मिन्नादित्यश्चक्षुषि च चक्षुरादित्ये प्रतिष्ठि
तावध्यात्माधिदैवतयोरन्योन्योपकार्योपकारकत्वात्कथं प्रतिष्ठितावित्युच्यते रश्मिभिः प्रकाशेनानुग्रहं कुर्वन्नेष आदि
त्योऽस्मिंश्चक्षुष्यध्यात्मं प्रतिष्ठितः अयं च चाक्षुषः प्राणैरादित्यमनुगृह्णन्नमुष्मिन्नधिदैवं प्रतिष्ठितः सोऽस्मिंछरीरे विज्ञान
मयो भोक्ता यस्मिन्काले उत्क्रमिष्यन्भवति तदा सोऽयं चाक्षुषः आदित्यपुरुषो रश्मीनुपसंहृत्य केवलेनोदासीनेन रूपेणाव्य
वतिष्ठते तदायं विज्ञानमयः पश्यति शुद्धमेव केवलं विरश्म्यतमं डलं चंद्रमंडलमिव तदेतदरिष्टदर्शनं प्रासंगिकं प्रदर्श्यते क
थंनाम पुरुषः करणीये यत्नवान्स्यादिति न एनं चाक्षुषं पुरुषमभीकृत्य तं प्रत्यनुग्रहाय ते रश्मयः स्वामिकर्त्तव्यवशात्पूर्वमा १६४
गच्छंतोऽपि पुनस्तत्कर्मक्षयमनुरुध्यमाना इव नोपयंति न प्रत्यागच्छंत्येनमतोऽवगम्यते परस्परोपकारकत्वाच्च तस्यैवै
कस्यात्मनोंऽशावेताविति तत्र योऽसौ कोऽयं एष एतस्मिन्मंडले पुरुषः सत्यनामा तस्य व्याहृतयोऽवयवाः कथं भूरितियं व्या
हृतिः सा तस्य शिरः प्राथम्यात्तत्र सामान्यं स्वयमेवाह श्रुतिरेकमेकं संख्यायुक्तं शिरस्त एतदक्षरमेकं भूरिति भुव इति बाहू द्वित्व

श्रि

वृ॰ ५

सामान्यात्तथा स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे पते अक्षरे प्रतिष्ठे पादौ प्रतितिष्ठंत्याभ्यामिति तस्यास्य व्याहृत्यवयवस्य सत्यस्य ब्रह्मणः
उपनिषद्रहस्यमभिधानं येनाभिधानेनाभिधीयमानं तद्ब्रह्माभिमुखीभवति लोकवत्का सावित्यहरिति चेतद्रूपं हंति जहाति चेति
ति यो वेद संहतिजहातिच पाप्मानं य एवं वेद। एवं योऽयं दक्षिणेऽक्षन्पुरुषस्तस्य भूरिति शिर इत्यादि सर्वं समानं तस्योपनिषदहमि
ति प्रत्यगात्मभूतत्वात्पूर्ववत्तर्जहाति चेति॥ ॥पंचमं ब्राह्मणं॥ ॥ उपाधीनामनेकत्वात् अनेकविशेषत्वाच्च तस्यैव प्रकृतस्य ब्र
ह्मणो मनउपाधिविशिष्टस्योपासनमभिधीयन्नाह। मनोमयो मनः प्रायो मनस्युपलभ्यमानत्वान्मनसा चोपलभ्यत इति मनोम
योऽयं पुरुषो भाःसत्यो भा एव सत्यं सद्भावः स्वरूपं यस्य सोऽयं भाः सत्यो भास्वर इत्येतन्मनसः सर्वार्थावभासकत्वान्मनोमय
त्वाच्चास्य भा स्वरत्वं तस्मिन्नंतर्हृदये हृदयस्यांतस्तस्मिन्नित्येतद्यथा व्रीहिर्वा यवो वा परिमाणत एवं परिमाणस्तस्मि
न्नंतर्हृदये योगिभिर्दृश्यत इत्यर्थः स एष सर्वस्येशानः सर्वस्य स्वभेदजातस्येशानः स्वामी स्वामित्वेऽपि सति कश्चिदमात्या
दितंत्रोऽयं तु न तथा किं तर्ह्यधिपतिरधिष्ठाय पालयिता सर्वमिदं प्रशास्ति यदिदं किंच यत्किंचिदपि सर्वं जगत्सर्वं प्रशास्ति एवं मनोम
यस्योपासनात्तथारूपापत्तिरेष फलं तं यथा यथोपासते तदेव भवंतीति॥ ब्राह्मणं षष्ठं॥ तथैवोपासनांतरं सत्यस्य ब्रह्मणो
विशिष्टफलमारभ्यते विद्युद्ब्रह्मेत्याह विद्युद्ब्रह्मणो निर्वचनमुच्यते विदानाद्वखंडनात्तमसो मेघांधकारं विदार्य हि अवभास

३

ततो विद्युद्वेवंगुणं विद्युद्ब्रह्मेति यो वेदासौ विद्यत्यवखंडयति विनाशयति पाप्मानमनात्मानं प्रतिप्रतिकूलिभूताः पाप्मानो ये
तान्सर्वान्पाप्मनोऽवखंडयतीत्यर्थः। य एवं वेद विद्युद्ब्रह्मेति तस्यानुरूपं फलं विद्युतद्धि यस्माद्ब्रह्म॥ ॥सप्तमं ब्राह्मणं॥ ॥
पुनरुपासनांतरं तस्यैव ब्रह्मणः वागिति वाक्शब्दस्त्रयी तां वाचं धेनुं धेनुरिव धेनुर्यथा धेनुश्चतुर्भिः स्तनैः स्तन्यं पयः क्षरति वत्साय एवं वा
ग्धेनुर्वक्ष्यमाणैः स्तनैः पय इवान्नं क्षरति देवादिभ्यः के पुनस्ते स्तनाः के वा ते येभ्यः क्षरति तस्यैतस्या वाचो धेन्वा द्वौ स्तनौ देवा उप
जीवंति वत्सस्थानीयाः कौ स्वाहाकारं च वषट्कारं चाभ्यां हि हविर्दीयते देवेभ्यः हंकारं मनुष्याः हंतेति हि मनुष्येभ्योऽन्नं प्रयच्छंति न
स्वधाकारं पितरः स्वधाकारेण हि पितृभ्यः स्वधां प्रयच्छंति तस्या धेन्वा वाचः प्राण ऋषभः प्राणेन हि वाक्प्रसूयते म
नो वत्सो मनसा हि प्रस्राप्यते मनसा ह्यालोचिते विषये वाक्प्रवर्तते तस्मान्मनो वत्सस्थानीयम् एवं वाग्धेनूपासकस्तादात्म्य
मेव प्रतिपद्यते॥ ॥अयमग्निर्वैश्वानरः पूर्ववदुपासनांतरम् अयमग्निर्वैश्वानरः कोऽयमग्निरित्याह योऽयमंतः पुरुषे किं शरी १९४
रारंभको नेत्युच्यते येनाग्निना वैश्वानराख्येनेदमन्नं पच्यते किं तदन्नं यदिदमद्यते भुज्यते तेन प्रजाभिः जाठरोऽग्निरित्यर्थः त
स्य साक्षादुपलक्षणार्थमिदमाह तस्याग्नेरन्नं पचतो जाठरस्यैष घोषो भवति कोऽसौ यं घोषमेतदिति क्रियाविशेषणं कर्णावि
पिधायांगुलीभ्याम् अपिधानं कृत्वा शृणोति स प्रजापतिमुपासीत वैश्वानरमग्निमत्रापि तादात्म्यं फलं तत्र प्रासंगिकमिदमरिष्टलक्ष

णमुच्यते। सोऽत्र शरीरे भोक्ता यदोत्क्रमिष्यन्भवति नैनं घोषं शृणोति॥ ॥नवमं ब्राह्मणं॥ ॥सर्वेषामस्मिन्प्रकरणउपासनानां
गतिर्नियं फलं वोच्यते। यदा वै पुरुषो विद्वानस्माल्लोकात्प्रैति शरीरं परित्यजति स तदा वायुमागच्छत्यंतरिक्षे तिर्यतो वायुस्ति
मितो भेद्यस्तिष्ठति। स वायुः तत्र स्वात्मनि तस्मै संप्राप्ताय विजिहीते आत्मावयवान्विगमयति छिद्रीकरोत्यात्मानमित्यर्थः
किंपरिमाणं छिद्रमित्युच्यते यथा रथचक्रस्य खं छिद्रं प्रसिद्धं प्रसिद्धं परिमाणं तेन छिद्रेण स विद्वानूर्ध्व आक्रमते ऊर्ध्वः सन्गच्छति न६
स आदित्यमागच्छति। आदित्यो ब्रह्मलोकं जिगमिषोर्मार्गनिरोधं कृत्वा स्थितः सोऽप्येवंविद उपासकाय द्वारं प्रयच्छति तस्मै स
तत्र विजिहीते यथा लंबरस्य खं वादित्रविशेषस्य छिद्रपरिमाणं तेन स ऊर्ध्व आक्रमते स चंद्रमसमागच्छति सोऽपि तस्मै त
त्र विजिहीते यथा दुंदुभेः खं प्रसिद्धं तेन ऊर्ध्व आक्रमते स लोकं प्रजापतिमागच्छति किं विशिष्टम् अशोकं मानसेन दुःखेन विव
र्जितमित्येतदहिमं हिमवर्जितं शारीरदुःखवर्जितमित्यर्थः तं प्राप्य तस्मिन्वसति शाश्वतीर्नित्याः समाः संवत्सरानित्यर्थः।
ब्रह्मणो बहून्कल्पान्वसतीत्येतत्॥ ॥दशमं ब्राह्मणं॥ ॥एतद्वै परमं तपः किं तत् यद्व्याधितो ज्वरादिपरिगृहीतः सन्यत्तप्यते त
देतत्परमं तप इत्येवं चिंतयेद्दुःखसामान्यात् तस्यैवं चिंतयतो विदुषः कर्मक्षयहेतुस्तदेव तपो भवत्यनिंदतोऽविषीदतः स एव तेन

तपसादग्धकिल्बिषः परमंहैवलोकंजयतियएवंवेदतथामुमूर्षुरादावेवकल्पयतिकिमेतद्वैपरमंतपोयंप्रेतंमांग्रामादरण्यं
हरंतिमृत्विजोन्त्यकर्मणेतद्ग्रामादरण्यागमनसामान्यात्परमंममतत्तपोभविष्यतिग्रामादरण्यगमनंपरमंतपइतिहिप्रसि
द्धंपरमंहैवलोकंजयतियएवंवेदतथेतद्वैपरमंतपोयंप्रेतमग्नावभ्यादधतिअग्निप्रवेशसामान्यात्परमंहैवलोकंजयतियएवंवे
द॥ ॥एकादशंब्राह्मणं॥ ॥अन्नंब्रह्मेतितथैवतदुपासनांतरंविधित्सन्नाहान्नंब्रह्मान्नमद्यतेयत्तद्ब्रह्मेतिएकेआचार्याआहु
स्तन्नतथाग्रहीतव्यमन्नंब्रह्मेतिअन्येआहुःप्राणोब्रह्मेतितच्चयथानग्रहीतव्यंकिमर्थंपुनरन्नंब्रह्मेतिनग्राह्यंयस्मात्पूयतिह्य
द्यतेपूतिभावमापद्यतेऋतेप्राणात्तत्कथंब्रह्मादिनामतद्यद्विनाशिअस्तुतर्हिप्राणोब्रह्मनैवं।यस्माच्छुष्यतिवैप्राणःशोष
मुपैतिऋतेन्नादत्ताहिप्राणोतोन्नेनाद्येनविनानशक्नोत्यात्मानंधारयितुंतस्माच्छुष्यतिप्राणऋतेन्नात्।अतएकैकस्यब्रह्म
तानोपपद्यते।यस्मात्तस्मादेतेहत्वेवअन्नप्राणेदेवतेएकधात्र्यमेकधाभावंभूत्वागत्वापरमतांपरमत्वंगच्छतोब्रह्मत्वंप्राप्नुत १६६
स्तदेतदेव।मध्यवस्यहस्माहप्रातृदोनामपितरमात्मनःकिंस्वित्स्विदितिविकल्पयामयाब्रह्मपरिकल्पितमेवंविदुषेकिं
स्विन्नूकुर्यांसाधुशोभनंपूजांकांत्वस्मैपूजांकुर्यामित्यभिप्रायःकिमेववास्मैएवंविदुषेअसाधुकुर्यांकृतकृत्योसावित्यभिप्रायो
अन्नप्राणौसहभूतौब्रह्मेतिविद्वान्नासावसाधुकरणेनखंड्यतेभवतिनापिसाधुकरणेनमहीकृतस्तमेवंवादिनंसपिताहस्म

आहपाणिनाहस्तेननिवारयन्माप्रातृदमैवंवोचः।कस्त्वेनयोरन्नप्राणयोरेकधात्र्यंभूत्वापरमतांकस्तुगच्छतिनकश्चिद
पिविद्याननेनब्रह्मदर्शनेनपरमतांगच्छति।तस्मान्नैवंवक्तुमर्हसिकृतकृत्योसावितियद्येवंब्रवीतुभवानेकंपरमतांगच्छती
तितस्मैएतद्वक्ष्यमाणंवचउवाचकिंतन्नविइतिकिंतद्विइत्युच्यते।अन्नंवैविअन्नेहियस्मादिमानिसर्वाणिभूतानिविष्टान्याश्रि
तान्यतोन्नंविइत्युच्यतेकिंचरमितिचोक्तवान्पिताकिंपुनस्तद्रंप्राणोवैरंकुतइत्याह।प्राणेहियस्माद्बलाश्रयेसतिसर्वाणिभूतानि
रमंतेतोरंप्राणःसर्वभूताश्रयगुणमन्नंसर्वभूतरतिगुणश्चप्राणोनहिकश्चित्अनायतनोनिराश्रयोरमतेनाप्यसत्यप्यायतने
प्राणेदुर्बलोरमतेयदाबलायतनवान्प्राणीबलवांश्चभूतार्थमात्मानंमन्यमानोरमतेलोकःयुवास्यात्साधुयुवाध्यायकइत्यादिश्रु
तेःइदानीमेवंविदःफलमाह।सर्वाणिवैहअस्मिन्भूतानिविशंत्यन्नगुणज्ञानात्सर्वाणिभूतानिरमंतेप्राणगुणज्ञानाद्यए
वंवेदः॥द्वादशंब्राह्मणं॥ ॥उक्थंतथोपासनांतरमुक्थंशास्त्रंतद्धिप्रधानंमहाव्रतेक्रतौकिंपुनस्तदुक्थंप्राणोवाउक्थंप्राणश्चप्रधा
नःउक्थंचसर्वशास्त्राणामतउक्थमित्युपासीतकथंप्राणउक्थमित्याहप्राणोहियस्मादिदंसर्वंसमुत्थापयतिउत्थापनादुक्थंप्रा
णोनामप्राणःकश्चिदुत्तिष्ठतितदुपासनफलमाहउद्धास्मादेवंविदउक्थविद्प्राणविद्वीरःपुत्रउत्तिष्ठतिहदृष्टमेतत्फलमदृ
ष्टंउक्थस्यसायुज्यंसलोकतांजयतियएवंवेदयजुरितिचोपासीतप्राणंप्राणोवैयजुःकथंयजुःप्राणःप्राणेहियस्मात्सर्वाणिभू

भूतानियुज्यंतेनचासतिप्राणेकेनचित्कस्यचिद्योगसामर्थ्यमतोयुनक्तीतिप्राणोयजुः एवंविदःफलमाह युज्यंतेउद्यमतइत्य
र्थः ह्यस्मैएवंविदेसर्वाणिभूतानिश्रैष्ठ्यंश्रेष्ठत्वायतस्मैश्रैष्ठ्यायायंनःश्रेष्ठोभवेदितियजुषःप्राणस्यसायुज्यमित्यादिसर्वं
समानं॥ ॥सामेतिचोपासीतप्राणंप्राणोवैसामकथंप्राणःसामप्राणेहियस्मात्सर्वाणिभूतानिसम्यंचिसंगच्छंतेसंगमना
त्साम्यतापत्तिहेतुत्वात्सामप्राणःसम्यंचिसंगच्छतिह्यस्मैसर्वाणिभूतानिनकेवलंसंगच्छतएवश्रैष्ठ्यायवास्मैकल्पंते
समर्घ्यतेसाम्नःसायुज्यमित्यादिपूर्ववत्॥ ॥तंप्राणंक्षत्रमित्युपासीतप्राणोवैक्षत्रंप्रसिद्धमेतत्प्राणोहिवैक्षत्रंकथंप्रसि
द्धमित्याह। त्रायतेहैनंपिंडंदेहंप्राणःक्षणितोःत्राःस्त्रादिहिंसितात्पुनर्मांसेनापूरयतियस्मात्ततत्राणात्प्रसिद्धंक्षत्रत्वंप्राण
स्यविद्वत्फलमाह। क्षत्रमंनत्रायतेन्येनकेनचिदित्यत्रंक्षत्रंप्राणस्तमत्रप्राणंप्राप्नोतीत्यर्थः काण्वांतरेवापाठात्क्षत्रमात्रंप्रा १६२
प्नोतिप्राणोभवतीत्यर्थः। क्षत्रस्यसायुज्यंसलोकतांजयतियएवंवेद॥ ॥ब्रह्मणोहृदयघनेकोपाधिविशिष्टस्योपासनमु
क्तंअथेदानींगायत्र्युपाधिविशिष्टस्योपासनंवक्तव्यमित्यारभ्यतेसर्वच्छंदसांहिगायत्रीछंदःप्रधानभूतंतत्प्रयोक्तृगय
त्राणाद्गायत्रीतिहिवक्ष्यतिनचान्येषांछंदसांप्रयोक्तृप्राणत्राणसामर्थ्यंप्राणात्मभूतावसासर्वछंदसांवात्माप्राणःप्राण
श्चक्षतत्राणात्क्षत्रमित्युक्तंप्राणश्चगायत्रीतस्मात्तदुपासनमेवविधित्स्यातद्विजोत्तमजन्महेतुत्वाच्चगायत्र्याब्राह्मणम

स्तत्रतत्सृष्टुस्ताराजन्यंजगत्यावैश्यमितितद्विजोत्तमाख्यंहिद्वितीयंजन्मगायत्रीनिमित्तंत स्मात्प्रधानंगायत्रीब्राह्मणाव्युत्थायब्रा
ह्मणाभिवदंति। सब्रह्मणोविपापोविरजोविचिकित्सोब्राह्मणोभवतीत्युत्तमपुरुषार्थसंबंधब्राह्मणस्यदर्शयति। तत्रब्राह्मणंगाय
त्रीजन्ममूलमतोवक्तव्यंगायत्र्याःसतत्त्वंगायत्र्याह्यियःसृष्टोद्विजोत्तमोनिरंकुशएवोत्तमपुरुषार्थसाधनेधिक्रियतेतस्तन्मूलःपरमपुरु
षार्थसंबंधस्तस्मात्तदुपासनविधानायाह। भूमिःअंतरिक्षंद्यौः इत्यष्टावक्षराणिअष्टाक्षराण्यष्टाक्षरमष्टाक्षराणियस्यतदिदम
ष्टाक्षरंदेप्रसिद्धावद्योतकोएवंप्रथमंगायत्र्येगायत्र्याःपदंकारेणेवाष्टत्वपूरणमेतत्तउहएवमेतदेवास्याःगायत्र्याःपदंपादःप्रथमो
भूम्यादिलक्षणेस्त्रैलोक्यात्माष्टाक्षरत्वसाम्यादेवमेतत्त्रैलोक्यात्मकंगायत्र्याःप्रथमंपदंवेदतस्येतत्फलंसविद्वान्यावत्किंचिदेषुलो
केषुजेतव्यंतावत्सर्वंहजयतियोस्याएतदेवंपदंवेद। तथाऋचोयजूंषिसामानीतित्रैविद्यानामाक्षराणिएतान्यपिअष्टावेवतथैवाष्टाक्षरंह्वा
एकंगायत्र्येपदंद्वितीयमेतदुहैवास्याएतत्ऋग्यजुःसामलक्षणमष्टाक्षरत्वसामान्यादेवसयावतीयंत्रयीविद्यात्रय्याविद्यया
यावत्फलजातमाप्यतेतावद्धजयतियोस्याएतद्गायत्र्यास्त्रैविद्यालक्षणंपदंवेद॥ ॥तथाप्राणःअपानःवियानःएतान्यपिप्राणा
द्यभिधानाक्षराण्यष्टौतथागायत्र्यास्तृतीयंपदंयावदिदंप्राणिजातंतावद्धजयतियोस्याएतदेवंगायत्र्यास्तृतीयंपदंवेद। अथा
नंतरंगायत्र्यास्त्रिपदायाःशब्दात्मिकायास्तुरीयंपदमुच्यते। अभिधेयभूतमथास्याःप्रकृतायागायत्र्याःएतदेववक्ष्यमाणंतु
रीयंदर्शतंपदंपरोरजायएषतपतितुरीयमित्यादिवाक्यपदार्थस्वयमेवव्याचष्टेश्रुतिर्यद्वैचतुर्थंप्रसिद्धंलोकेतदिहतुरीयशब्देनाभि

अतिरिक्तोषो येषां मुपरिष्टान्नविनादृरूपनेतद्विषयएवसर्वग्राह्यःस्यादित्या यंकाभिप्रा

धीयतेदर्शतंपदमित्यस्यकार्थइत्युच्यते। दं दृश्यतइवहि एषमंडलांतर्गतःपुरुषःअतोदर्शतंपदमुच्यते परोरजाइत्यस्यपदस्यको
र्थइत्युच्यतेसर्वंसमस्तंउद्धि एवेषमंडलस्थपुरुषः रजोरजोजातंसमस्तंलोकमित्यर्थः। उपर्युपर्याधिपत्यभावेनसर्वंलोकंरजोजातंतपति
उपर्युपरीतिवीप्सासर्वलोकाधिपत्यख्यापनार्थंननुसर्वत्राहैवसिद्धत्वाद्वीप्सानर्थिकेतिस्याद्वामुष्मात्परांचोल्लोकास्तेषांचेष्टेदेवकामानां
चेतिश्रुत्यंतरात्तस्मात्सर्वविरोधार्थवीप्सायथावासौसवितासर्वाधिपत्यलक्षणया श्रियायशसाचख्यात्यातपतिएवंहैवश्रिया
यशसाचतपतियोस्याएतदेवंतुरीयंदर्शतंपदंवेद॥ सैषात्रिपदोक्तायात्रैलोक्यत्रैविद्यप्राणलक्षणा गायत्री एतस्मिंश्चतुर्थेतुरी
येदर्शतेपदे। परोरजसिप्रतिष्ठितामूर्त्तामूर्त्तरसत्वादादित्यस्यरसापायेहिवस्तुनीरसमप्रतिष्ठितंभवति यथाकाष्ठादिदग्धासा
ε रंभवतितद्वत्तथामूर्त्तामूर्त्तात्मिकंजगत्त्रिपदागायत्री आदित्येप्रतिष्ठितादृसत्वान्सहत्रिभिःपादैःसतदेतुरीयंपदंसत्येप्रतिष्ठितंकिंपु
नस्तत्सत्यमित्युच्यतेचक्षुर्वैसत्यंकथंचक्षुःसत्यमित्याहप्रसिद्धमेतच्चक्षुर्हिवैसत्यंकथंप्रसिद्धतेत्याह। तस्माद्यद्यदिदानीमेवद्वौ
विवदमानौविरुद्धंवदमानावेयातामागच्छेयातामहमदर्शंदृष्टवानस्मीत्यन्यआहाहमश्रौषंयत्त्वयादृष्टंननथातदस्तीतितयोर्य १६५
म एवंब्रूयादहमदर्शमितितस्माएवश्रद्दध्याम। नपुनर्योब्रूयादहमश्रौषमितिश्रोतुर्मृषाश्रवणमपिसंभवतिनतुचक्षुषोमृषादर्शनंतस्मान्न
श्रौषमित्युक्तवतेश्रद्दधामतस्मात्सत्यप्रतिपत्तिहेतुत्वात्सत्यंचक्षुस्तस्मिन्सत्येचक्षुषिसहत्रिभिरितरैःपादैस्तुरीयंपदंप्रतिष्ठितमि

त्यर्थः। उक्तंचसआदित्यःकस्मिन्प्रतिष्ठितइतिचक्षुषीतितदेतुरीयपदाश्रयंसत्यंबलेप्रतिष्ठितंकिंपुनस्तद्बलमित्याहप्राणोवैबलं
तस्मिन्प्राणेबलेप्रतिष्ठितंसत्यंतथाचोक्तंसूत्रेतदोतंप्रोतमितियस्माद्बलेसत्यंप्रतिष्ठितंतस्मादाहुर्बलंसत्यादोगीयइत्योजीयःउज्जस्तरमित्य
र्थः। लोकेहियस्मिन्हियदाश्रितंतद्भवति। तस्मादाश्रितादाश्रयस्यबलवत्तरत्वंप्रसिद्धंनहिदुर्बलंबलवतःक्वचिदाश्रयंदृष्टमेवमुक्तन्या
येन एषागायत्र्यध्यात्मंप्राणेप्रतिष्ठितासैषागायत्रीप्राणोनामगायत्र्यांजगत्प्रतिष्ठितंयस्मिन्प्राणेसर्वेदेवाःएकंभवंतिसर्वेवे
दाःकर्माणिफलंचसैवंगायत्रीप्राणरूपासतीजगतःआत्मासादेषागयांस्तत्रेतेत्रायतेकिंपुनर्गयाःप्राणावागादयोवैगयाःशब्दक
रणात्तांस्तत्रेसैषागायत्रीतत्रत्रयद्यस्माद्गयांस्तत्रेतस्माद्गायत्रीनामगयत्राणाद्गायत्रीप्रथितासआचार्योउपनीयमाणवकमष्टवर्षं
यामेवाभूंसावित्रींसवितृदेवताकामन्वाहपच्छोर्द्धर्चशःसमस्तांचएषैवसासाक्षात्प्राणोजगतआत्मामाणवकायसमर्पिताइहेदा
नींव्याख्यातानान्यासआचार्योयस्मैमाणवकायान्वाहानुवक्तितस्यमाणवकस्यगयान्प्राणांस्त्रायतेनरकादिपतनात्तामेतां
सावित्रींहएकेशाखिनोनुष्टुभमनुष्टुप्छंदस्कामन्वाहुरुपनीतायतदभिप्रायमाहुर्वागनुष्टुप्वाक्सरस्वतीतामेवहिवाचं
सरस्वतीमाणवकायानुब्रूमइत्येतद्वदंतःनतथाविद्याद्यत्तेआहुर्मृषैवतत्नूकिंतर्हिगायत्रीमेवसावित्रीमनुब्रूयात्कस्मात्
यस्मात्प्राणोगायत्रीत्युक्तंप्राणउक्तेवाक्चसरस्वतीअन्येचप्राणाःसर्वंमाणवकायसमर्पितंभवतिकिंचेदंप्रासंगिकमुक्त्वा

गायत्रीविदंस्तौतियदिहवैअपिएवंविद्बह्विवनहितस्यसर्वात्मनोबहुनामास्तिकिंचित्सर्वात्मकत्वाद्विदुषःप्रतिगृह्ण
तिनहैवतत्प्रतिग्रहजातंगायत्र्याएकंचनैकमपिपदंप्रतिपर्याप्तं।सयइमांस्त्रीन्सयोगायत्रीवित्इमान्भूरादीन्हिरण्या
दिधनपूर्णान्लोकान्प्रतिगृह्णीयात्सप्रतिग्रहःअस्यागायत्र्याएतत्प्रथमंपदंयद्व्याख्यातंतदाप्नुयात्प्रतिग्रहःप्रथमपदवि
ज्ञानफलंतेननतुकृत्स्नात्त्वधिकदोषोत्पादकःसप्रतिग्रहःअथपुनर्यावतीइयंत्रयीविद्यायस्तावत्प्रतिगृह्णीयात्सोस्याएत
द्द्वितीयंपदमाप्नुयाद्द्वितीयपदविज्ञानफलंतेननुक्तंस्यात्तथायावदिदंप्राणियस्तावत्प्रतिगृह्णीयात्सोस्याएतत्तृतीयंपदमा
२ प्नुयात्तेनतृतीयपदविज्ञानफलंभुक्तंस्यात्कल्पयित्वेदमुच्यतेपादत्रयसममपियःकश्चित्प्रतिगृह्णीयात्तत्पादत्रयविज्ञा
नफलस्यैवक्षयकारणंनत्वन्यस्यदोषस्यकर्तृत्वेसमानेएवंदाताप्रतिग्रहीतावागायत्रीविज्ञानस्तुतयेकल्प्यतेदाताप्रतिग्र
हीताचयद्यप्येवंसंभाव्यतेनासौप्रतिग्रहोपराधक्षमःकस्माद्यतोभ्यधिकमपिपुरुषार्थविज्ञानमवशिष्टमेवचतुर्थपादवि
षयंगायत्र्याःतद्दर्शयतिअथास्याएतदेवतुरीयंदर्शतंपदंपरोरजायएषतपतितद्वैतन्नैवकेनचनकेनचिदपिप्रतिग्रहेणा
प्यंनैवप्राप्यमित्यर्थः।यथापूर्वोक्तानित्रीणिपदानियेतान्यपिनैवाप्यानिकेनचित्कल्पयित्वैवमुक्तंपरमार्थतःकुतःउपता १६८
वत्प्रतिगृह्णीयात्त्रैलोक्यादिसमंतस्माद्गायत्र्येवंप्रकारोपास्येत्यर्थः।तस्याउपस्थानंतस्यागायत्र्याःउपस्थानंउपेत्यस्था

नंनमस्करणंअनेनमंत्रेणकोसौमंत्रइत्याहहेगायत्रिअसित्वंभवसित्रैलोक्यपादेनैकपदीत्रैविद्यारूपेणद्वितीयेनद्विप
दीतृतीयेनत्रिपद्यसिचतुर्थेनतुरीयेणचतुष्पद्यसिएवंचतुर्भिःपदैरुपासकैःपद्यसेज्ञायसेअतःपरंपरेणनिरुपाधिकेन
स्वेनात्मनापदसिअविद्यमानंपदंयेनपद्यसेसात्वमपदसियस्मान्नहिपद्यसेनेतिनेत्यात्मकत्वात्अतोव्यवहारविषयायन
मस्तेतुरीयायदर्शतायपदायपरोरजसेअसौशत्रुःपाप्मात्वत्प्राप्तिविघ्नकरःअदःतदात्मनःकार्यंयत्त्वत्प्राप्तिविघ्नकर्तृत्वंमा
प्रापतमैवप्राप्नोतुइतिमंत्रपरिसमाप्त्यर्थः।यंद्विष्यात्यंप्रतिद्वेषंकुर्यात्त्वियंविद्वांस्तंप्रत्यनेनोपस्थानेनअसौशत्रुःअमुकनामे
तिनामगृह्णीयादस्मैयज्ञदत्तायाभिप्रेतःकामोमासमृद्धिसमृद्धिंमाप्राप्नोत्वितिवोपतिष्ठतेअदोदेवदत्ताभिप्रेतंमाप्रापमितिवो
पतिष्ठतेअसावदोमाप्रापदित्यादित्रयाणांमंत्रपादानांयथाकामंविकल्पः।गायत्र्यामुखविधानार्थोयंवादउच्यतेएतद्धवैकि
लवैस्मर्यतेतत्रगायत्रीविज्ञानविषयेजनकोवैदेहःवुडिलंनामतोश्वतराश्वस्यापत्यमाश्वतराश्विमूकिलोक्तवानुयत्तुइतिवि
तर्केहोअहोयत्त्वमेतत्तदात्थगायत्रीविदब्रूथागायत्रीविदस्मीतियद्ब्रूथाःकिमिदंतस्यवचसोननुरूपमथकथंयद्गायत्रीवि
द्प्रतिग्रहदोषेणहस्तीभूत्वावहसीतिसप्रत्याह।राज्ञास्मारितःमुखंगायत्र्याःहियस्मादस्याहेसम्राट्नविदांचकारेतिनवि
ज्ञातवानस्मीतिहउवाच।एकांगविकलत्वाद्गायत्रीविज्ञानंममाफलंजातंशृणुतर्हितस्याःगायत्र्याःअग्निरेवमुखंयदिहवैअपिव
ह्विवेधनंअग्नावभ्यादधतिलौकिकाःसर्वमेवतत्संदहत्येवंधनमग्निर्मुखमित्येवंवित्स्वयंगायत्र्यात्माग्निमुखःसन्यद्यपिबह्वि

वपापं कुरुते प्रतिग्रहादिदोषं तत्सर्वं पापजातं संभक्षयित्वा शुद्धोऽग्निवत्पूतः तस्मात्प्रतिग्रहदोषाद्गायत्र्यात्माजरोऽमृत
श्च संभवति॥ ॥ चतुर्दशं ब्राह्मणं॥ ॥ योऽज्ञानकर्मसमुच्चयकारी सोऽन्तकाल आदित्यं प्रार्थयत्यस्ति च संप्रसंगो गायत्र्यास्तुरीयः
पादो हि सः तदुपस्थानं प्रकृतं मतः स एव प्रार्थ्यते हिरण्मयेन ज्योतिर्मयेन पात्रेण यथा पात्रेणेष्टं वस्त्वपिधीयते एवमिदं सत्याख्यं
ब्रह्म ज्योतिर्मयेन मंडलेनापिहितमिवासमाहितचेतसां अदृश्यत्वात्तदेतदुच्यते। सत्यस्यापिहितं मुखं मुख्यं स्वरूपं तत्तदपिधा
नं पात्रमपिधानमिव दर्शनप्रतिबंधकारणं तत्त्वं हे पूषन् जगतः पोषणात्पूषा सविता अपावृणु अपावृतं कुरु दर्शनप्रतिबंधका
रणमपनयेत्यर्थः। सत्यधर्माय सत्यं धर्मोऽस्य ममसोऽहं सत्यधर्मा तस्मै तदात्मभूतायेत्यर्थः। दृष्टये दर्शनाय पूषन्नित्यादीनि ना
मान्यामंत्रणार्थानि सवितुः एकर्षे एकश्चासावृषिश्च एकर्षिर्दर्शनादृषिः स हि सर्वस्य जगतः आत्मा चक्षुश्च सन् सर्वं पश्य
त्येको वा गच्छतीत्येकर्षिः सूर्य एकाकी चरतीति मंत्रवर्णाद्यम सर्वं हि जगतः संयमनं त्वत्कृतं सूर्यः सुष्ठु ईरयते रसान्रश्मीन्प्रा १२०
णान् धियो वा जगत इति प्राजापत्य प्रजापतेरीश्वरस्यापत्यं हिरण्यगर्भस्य वा हे प्राजापत्य व्यूहापनय रश्मीन्समूह
संक्षिपात्मनस्तेजो येनाहं शक्नुयां द्रष्टुं तेजसा ह्यपहृतदृष्टिर्न शक्नुयां त्वत्स्वरूपमंजसा द्रष्टुं विद्योतन इव रूपाणामतउप
संहर तेजो यत्ते तव रूपं सर्वकल्याणानामतिशयेन कल्याणतमं तत्ते पश्यामि। पश्यामो वयं वचनव्यत्ययेन। योऽसौ भूर्भुवः

म

स्वर्व्याहृत्यवयवः पुरुषाकृतित्वात्पुरुषः सोऽहमस्मि भवामि अहरहमिति चोपनिषदुक्तत्वात् आदित्यचाक्षुषयोस्तदेवेदं प
राम्नृयते सोऽहमस्म्यमृतमिति संबंधो ममामृतस्य सत्यस्य शरीरपाते शरीरस्थो यः प्राणो वायुः सोऽनिलं वायुमेव प्रतिगच्छ
तु तथान्या देवताः स्वां स्वां प्रकृतिं गच्छंतु अथेदमपि भस्मान्तं सत्पृथिवीं यातु शरीरमथेदानीमात्मनः संकल्पभूतां मनसि व्यवस्थितां
४ मग्निदेवतां प्रार्थयति ॐमिति क्रतो इति संबोधनार्था ओंकारप्रतीकत्वादोमनोमयत्वाच्च क्रतुः हे क्रतो स्मर स्मर्तव्यमंतका
ले हि त्वत्स्मरणवशादिष्टा गतिः प्राप्यते ततः प्रार्थ्यते यन्मया कृतं तत्स्मर पुनरुक्तिरादरार्था किं च हे अग्ने नय प्रापय सुपथा शोभनेन
मार्गेण राये धनाय कर्मफलप्राप्तय इत्यर्थः न दक्षिणेन कृष्णेन पुनरावृत्तियुक्तेन। किं तर्हि शुक्लेनैव सुपथा स्याः विश्वानि सर्वाणि हे दे
व वयुनानि प्रज्ञानानि सर्वप्राणिनां विद्वान् किं च युयोधि अपनय वियोजय अस्मदस्मत्तो जुहुराणं कुटिलमेनः पापं पापजातं स
र्वं तेन पापेन वियुक्ता वयमेष्यामः उत्तरेण पथा त्वत्प्रसादात् किं तु वयं तुभ्यं कर्तुं न शक्नुमो भूयिष्ठां बहुतमां ते तुभ्यं नमउक्तिं नमस्का
रवचनं विधेम नमस्कारेणापरिचरेम इत्यर्थो अन्यत्कर्तुमशक्ताः संतः गोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकस्य इति श्री
शंकरभगवतः कृतायां बृहदारण्यकटीकायां सप्तमोऽध्यायः समाप्तः॥ ॥ ॐ नमो नारायणाय॥ ॥ प्राणो गायत्रीत्युक्तं क
स्मात्पुनः कारणात्प्राणत्वो गायत्र्याः न पुनर्वागादित्वमिति यस्मात् ज्येष्ठश्च श्रेष्ठश्च प्राणो न वागादयो ज्येष्ठश्च श्रेष्ठश्च त्वं ना

छ

ज्ञः कथं ज्येष्ठत्वं श्रेष्ठत्वं च प्राणस्येति तन्निर्दिधारयिषयेदमारभ्यते। अथवा उक्थयजुःसामक्षत्रादिभावैः प्राणस्यैवोपा
सनमभिहितं सकृच्चाप्यन्येषु वाक्चक्षुरादिषु तत्र हेतुमात्रमिहानन्तर्येण संबध्यते ननुः पूर्वत्रैषताविवक्षिता खिलत्वादस्यका
ण्डस्य पूर्वत्र यदनुक्तं विशिष्टं फलं प्राणविषयमुपासनं वक्तव्यमिति यः कश्चिन्ह वै इत्यवधारणार्थो यो ज्येष्ठश्रेष्ठगुणं
वक्ष्यमाणं यो वेद सो ज्येष्ठश्च श्रेष्ठश्च एवं फलेन प्रलोभितः तज्ज्ञानायाभिमुखीभूतः तस्मा आह प्राणो वै ज्येष्ठश्च
श्रेष्ठश्चेति कथं पुनरवगम्यते। प्राणो वै ज्येष्ठश्च श्रेष्ठश्चेति यस्मान्निषेककाल एव प्राणवृत्तिः शोणितसंबन्धः प्राणादिकलापस्य
विशिष्टस्य यापि नाप्राणं शुक्रं विरोहतीति प्रथमो वृत्तिलाभः प्राणस्य चक्षुरादिभ्यो ततो ज्येष्ठो वयसा प्राणो निषेककालादार
भ्य गर्भं पुष्यति प्राणः प्राणे हि लब्धवृत्तौ पश्चाच्चक्षुरादीनां वृत्तिलाभो ततो युक्तं प्राणस्य ज्येष्ठत्वं चक्षुरादिषु। भवति कश्चित्कु
ले ज्येष्ठो गुणहीनत्वात्तु न श्रेष्ठो मध्यमः कनिष्ठो वा गुणाढ्यत्वाद्भवेच्छ्रेष्ठो न ज्येष्ठो यथा न तथेत्याह प्राण एव तु ज्येष्ठश्च श्रेष्ठश्च १२१
कथं पुनः श्रैष्ठ्यमवगम्यते प्राणस्य तदिह संवादेन दर्शयिष्यामः सर्वथापि तु प्राणं ज्येष्ठश्रेष्ठगुणं यो वेदोपास्ते स स्वानां ज्ञाती
नां ज्येष्ठश्च श्रेष्ठश्च भवति श्रेष्ठगुणोपासनसामर्थ्यात् स्वव्यतिरेकेणापि च येषां मध्ये ज्येष्ठश्च श्रेष्ठश्च भविष्यामीति बुभूष
ति भवितुमिच्छति तेषामपि ज्येष्ठः प्राणदर्शी ज्येष्ठश्च श्रेष्ठश्च भवति। ननु वयो निमित्तं ज्यैष्ठ्यं तदिच्छातः कथं भवतीत्युच्यते नैष दोषः

त्रि

प्राण वृत्तिलाभकृत एवेह ज्येष्ठत्वस्य विवक्षितत्वात्। यो ह वै वसिष्ठं वेद वसिष्ठः स्वानां भवति दर्शनानुरूपेण फलं येषां च ज्ञाति
व्यतिरेकेण वसिष्ठो भवितुमिच्छति तेषां च वसिष्ठो भवत्युच्यतां तर्हि कोऽसौ वसिष्ठ इति। वाग्वै वसिष्ठा वासयत्यतिशयेन वस्ते वे
ति वसिष्ठा वाग्मिनो हि धनवन्तो वसन्त्यतिशयेनाच्छादनार्थस्य वा वसेर्वसिष्ठा अभिभवन्ति हि वाचा वाग्मिनोऽन्यान् तेन वसिष्ठगु
णवत्त्वरिज्ञानाद्वसिष्ठगुणो भवतीति दर्शनानुरूपं फलं। यो ह वै प्रतिष्ठां वेद प्रतितिष्ठत्यनयेति प्रतिष्ठा तां प्रतिष्ठां गुणवतीं यो
वेद तस्यैतत्फलं प्रतितिष्ठति समे देशे काले च तथा दुर्गे विषमे च देशे दुर्गमने च देशे दुर्भिक्षादौ वा काले विषमे यद्येवमुच्यतां का
सौ प्रतिष्ठा चक्षुर्वै प्रतिष्ठा कथं चक्षुषः प्रतिष्ठात्वमित्याह। चक्षुषा हि समे च दुर्गे च दृष्ट्वा प्रतितिष्ठति यतोऽतो नुरूपं फलं प्रतितिष्ठ पं
ति समे प्रतितिष्ठति दुर्गे य एवं वेदेति। यो ह वै संपदं वेद संपद्गुणयुक्तं यो वेद तस्मै तत्फलं अस्मै विदुषे संपद्यते ह किं यं कामं
कामयते स कामः किं पुनः संपद्गुणकं श्रोत्रं वै संपत्कथं पुनः श्रोत्रस्य संपद्गुणत्वमित्युच्यते श्रोत्रे सति हि यस्मात्सर्वे वेदाः
अधिसंपन्नाः श्रोत्रेन्द्रियवतो ध्ययत्वात् वेदविहितकर्मायत्ताश्च कामास्तस्मात् श्रोत्रं संपदतो विज्ञानानुरूपं फलं सं हास्मै पद्यते
संपद्यते ह अस्मै यं कामं कामयते य एवं वेद यो ह वा आयतनं वेदायतनमाश्रयस्तं यो वेदायतनं स्वानां भवत्यायतनं जनानामन्येषा
मपि किं पुनस्तदायतनमित्युच्यते मनो वा आयतनं आश्रयः इन्द्रियाणां विषयाणां च मनआश्रिता हि विषया आत्मनो भोग्यत्वं प्रति
आ

पद्यंतेमनःसंकल्पवशानिंद्रियाणिप्रवर्त्तंतेनिवर्त्तंतेचातोमनआयतनमिंद्रियाणांमनोदर्शनानुरूपेणफलमायतनंस्वानांभ
वत्यायतनंजनानांयएवंवेद प्रजायतेहप्रजयापशुभिः प्रजयापशुभिश्चसंपन्नोभवतिरेतोवैप्रजातीरेतसाप्रजननेंद्रियमुपलक्ष्यते।
तद्विज्ञानानुरूपंफलंप्रजायतेहप्रजयापशुभिर्यएवंवेद।तेहमेप्राणावागादयःअहंश्रेयसेअहंश्रेयानित्येतस्मैप्रयोजनायवि
वदमानाविरुद्धंवदमानाब्रह्मजग्मुर्ब्रह्मगतवंतोब्रह्मशब्दवाच्यंप्रजापतिंगत्वाचतद्धोचुर्हउक्तवंतः कःनोस्माकंमध्येवसिष्ठः
वसतिवासयतिवा।तद्ब्रह्मोक्तःपृष्टंसन्हउवाचउक्तवान्यस्मिंवोयुष्माकंमध्येउत्क्रांतेशरीरादिदंशरीरंपूर्वस्मादतिशयेनपापीयः
पापतरंमन्यतेलोकः।शरीरंहिनामानेकाशुचिसंघातत्वाज्जीवतोपिपापमेवततोपिकष्टतरंयस्मिन्नुत्क्रांतेभवतिवैराग्यार्थमिदमुच्य
२ तेपापीयइतिसवोयुष्माकंमध्येवसिष्ठोभविष्यतिजानन्नपिवसिष्ठंप्रजापतिर्नाब्रवीदयंवसिष्ठइति।इतरेषामप्रियपरिहारायतएव
मुक्त्वाब्रह्मणाप्राणाआत्मनोवीर्यपरिक्षणायक्रमेणोच्चक्रमुःसहवागेवप्रथमंहअस्माच्छरीरादुच्चक्रामउत्क्रांतवती।सावोत्क्रम्य १२३
संवत्सरंप्रोष्यप्रोषिताभूत्वापुनरागत्योवाचकथमशकतयूयंमदृतेमांविनाजीवितुमिति।तएवमुक्ताऊचुर्यथालोकेक
लाम्मूकाअवदंतोवाचाप्राणंतःप्राणेनव्यापारंकुर्वंतःप्राणेनपश्यंतोदर्शनव्यापारंचक्षुषाकुर्वंतः।तथाशृण्वंतःश्रोत्रेणविद्वांसो
मनसाकार्याकार्यादिविषयं।प्रजायमानारेतसापुत्रानुत्पादयंत।एवमजीविष्मवयमित्येवंप्राणैर्दत्तोत्तरावागात्मनोस्मि

न्नवसिष्ठत्वंबुद्ध्वाप्रविवेशहवाक्।चक्षुर्होच्चक्रामेत्यादिपूर्ववच्छ्रोत्रंमनः।प्रजापतिरित्यर्थः।अथप्राणोहोच्चिक्रमिषन्नुत्क्र
मणंकरिष्यन्सन्तदानीमेवसंस्थानात्प्रचलितावागादयःकिमिवेत्युच्यतेयथालोकेमहान्सुहयःमहांश्चासौशोभनोहयःसुहयःल
क्षणोपेतोमहान्परिमाणतःसिंधुदेशोद्भवःसैंधवोऽभिजनतःपड्वीशशंकून्पादबंधनशंकून्पड्वीशशब्दवाच्यांस्तान्संवृहे
दुद्यच्छेत्युगपदुत्खनेदश्वारोहेआरूढपरीक्षणाय।एवंहएवइमान्वागादीन्प्राणान्संववर्होद्यतवान्स्वस्थानाद्भ्रंशितवान्ते
वागादयःहऊचुःहेभगवोभगवन्मोत्क्रमीर्यस्मान्नशक्ष्यामस्त्वदृतेत्वांविना।जीवितुमिति।यद्येवंममश्रेष्ठताविज्ञाताभवद्भि
र्हमत्रश्रेष्ठस्तस्यमेममबलिंकरंकुरुतकरंप्रयच्छेत इत्ययंप्राणसंवादःकल्पितोविदुषःश्रेष्ठपरिक्षणप्रकारोपदेशः।अनेनहि
प्रकारेणविद्वान्कोनुखल्वत्रश्रेष्ठइतिपरीक्षणंकरोतिसएषपरीक्षणप्रकारःसंवादभूतःकथ्यतेनह्यन्यथासंहत्यकारिणांस
तामेषामंजसैवसंवत्सरमात्रमेकैकनिर्गमनाद्युपपद्यतेतस्माद्विद्वानेवानेनप्रकारेणविचारयतिवागादीनांप्रधानबुभुत्सुरुप
स्तनायबलिंप्रार्थिताःसंतःप्राणस्तथेतिप्रतिज्ञातवंतःसावाक्प्रथमंबलिदानायप्रवृत्ताहउवाचउक्तवतीयद्वैअहंवसिष्ठा
स्मियदहंवसिष्ठत्वंतत्त्वंतेनवसिष्ठगुणेनत्वंतद्वसिष्ठोसीतियदहंप्रतिष्ठास्मित्वंतत्प्रतिष्ठोसियाममप्रतिष्ठासात्वमसीति
चक्षुःसमानमन्यत्संपदायतनप्रजापतित्वगुणान्क्रमेणसमर्पितःपठत्वंसाधुबलिंदत्तवंतोवक्तवंतोब्रूत।तस्यमेएवंगुणविशि

२ पीयतेऽपि २

इस्य किमन्नं किं वा सद् इति आकुरितरे यदिदं लोके किं वा त्वमप्याश्वभ्यः आकृमिभ्यः आकीटपतंगेभ्यः स्ततेन्नं यच्च कृम्यन्नं
कीटपतंगान्नं तेन सह सर्वमेव व यत्किंचिदिदं प्राणिभिरद्यमानं तत्सर्वं तवान्नं सर्वप्राणस्यान्नमिति दृष्टिरत्र विहिता सर्वभक्षणे
दोषाभावं वदंति प्राणान्नविदः तस्य शास्त्रांतरेण प्रतिषिद्धत्वान्नास्य विकल्प इति चेन्न विधायकत्वादस्यानन्नं जग्धं भवती ग्धः २
ति सर्वप्राणस्यान्नमित्येतस्य विज्ञानस्य विहितस्य स्तुत्यर्थमेतन्न तेनैकवाक्यतापत्तेर्न तु स्वतंत्रविहितस्य बाधने सामर्थ्यमन्य
परत्वादस्य प्राणमात्रस्य सर्वमन्नमित्येतद्दर्शनमिह विधित्सितं ननु सर्वभक्षये दिति यच्च सर्वभक्षणे दोषाभावज्ञानं तस्मिन्नेव प्रमा
णाभावाद्धि इष्टः प्राणत्वात्सर्वान्नत्वोपपत्तेः सामर्थ्याद्दोष एवेति चेन्नादोषान्नत्वानुपपत्तेः सत्यं यद्यपि विद्वान्प्राणो येन कार्यक
रणसंघातेन विशिष्टस्य विदुषस्तेन कार्यकरणसंघातेन कृमिकीटदेवाद्यन्नदोषान्नलक्षणेनोपपद्यते तेन तत्रादोषान्नलक्षणेदो
षाभावज्ञापनमनर्थकमप्राप्तत्वाददोषान्नलक्षणदोषस्य ननु प्राणः सन्भक्षयत्येव कृमिकीटाद्यन्नमपि बाढं किंतु न तु तद्विषयः १२३
प्रतिषेधोऽस्ति तस्माद् [illegible] तत्र दोषाभावः ननु कार्यकरणसंघातसंबंधेन प्रतिषेधः क्रियते तत्संबंधेन त्विहानेव प्रतिप्र
सवोऽस्ति तस्मात्प्रतिषेधातिक्रमदोष एव स्यादन्यविषयत्वात्
ब्राह्मणादिशरीरस्य सर्वान्नत्वदर्शनमिह विधीयते किंतु प्राणमात्रस्यैव यथा च सामान्येन सर्वान्नप्राण

२ [illegible] प्राणस्य दोषान्नभक्षणदोषाभावज्ञापनमनर्थकमप्राप्तत्वाद्दोषान्नभक्षणदोषस्य २

स्य किंचिदन्नजातं कस्यचिज्जीवनहेतुः यथा विषं विषजस्य कृमेस्तदेवान्यस्य प्राणान्नमपि सद्दृष्टमेव दोषमुत्पादयति मरणादिलक्ष
णं तथा सर्वान्नस्यापि प्राणस्य प्रतिषिद्धान्नलक्षणे ब्राह्मणत्वादिदेहसंबंधाद्दोष एव स्यात्तस्मान्मिथ्याज्ञानमेवाभक्ष्यभक्षणे दोषा
भावज्ञानं आपो वास इत्यापो भक्ष्यमाणा वासस्थानीयास्तं वा तत्प्राणस्यापो वास इत्येतद्दर्शनं विधीयते न तु वासःकार्यं आपो विनियुक्ताः
ताभ्यः तस्माद्यथाप्राप्तभक्षणदर्शनमात्रकर्तव्यं न हि वेत्तस्य सर्वप्राणस्यान्नमित्येवंविदः अनन्नमन्नदनीयं जग्धं भुक्तं भवतीत्यद्यप्य
नेनानदनीयं भुक्तं मदनीयमेव स्यान्न नु तत्कृतदोषेण लिप्यत इति विद्यास्तुतिरि[illegible] यो वा मतथा नानन्नं प्रतिगृहीतं यद्यप्यप्रति
ग्राह्यं हस्त्यादि प्रतिगृहीतं स्यात्तदप्यन्नमेव स्यात्तत्राप्यप्रतिग्राह्यप्रतिग्रहदोषेण न लिप्यत इति स्तुत्यर्थमेव य एवमेतदन्नस्य प्राण
स्यान्नं वेद फलं तु प्राणात्मभाव एव नेत्वेतत्फलाभिप्रायेण किं तर्हि स्तुत्यभिप्रायेण [illegible] तदेव फलं कस्मान्न भवति न प्राणात्मदर्शि
नः प्राणात्मभाव एव फलं तत्र च प्राणात्मभूतस्य सर्वात्मनोऽनदनीयमप्याद्यमेतथाप्यप्रतिग्राह्यमपि प्रतिग्राह्यमिति यथाप्राप्तमे
वापादाय विद्या स्तूयते नानेन फलविधिसरूपता वाक्यस्य यस्माच्चापो वासः प्राणस्य तस्माद्विद्वांसो ब्राह्मणाः श्रोत्रियाः अधीतवे
दाः अशिष्यंतोऽश्नंतो भुञ्जमानाः आचामंत्यपः अशित्वा चामंति भुक्त्वा चोत्तरकालमपोऽश्नंतीति तत्रैषामाचामतां कोऽभिप्राय इत्या
ह एतमेवान्नं प्राणमनग्नं कुर्वंतो मन्यते अस्ति हि वेतद्यो यस्मै वासो ददाति स तमनग्नं करोमीति हि मन्यते प्राणस्य वापो वास इति हु

क्षं यदपः पिबामि। तत्प्राणस्य वासो दधामीति विज्ञानं कर्तव्यमित्येवमर्थमेव तन्न तु वक्ष्यमाणो भुक्तवांश्च प्रयतोऽनविष्यामी
त्याचामति तत्र च प्राणस्यानग्नताकरणार्थत्वे च हि कार्यताचमनस्य स्यान्न तु कार्यद्वयमाचमनस्यैकस्य युक्तं यदि प्रायश्चित्ता
र्थं नानग्नतार्थमथानग्नतार्थं न प्रायश्चित्तार्थं यस्मादेवं तस्माद्द्वितीयमाचमनं तत्प्राणस्यानग्नताकरणायैव तु। न क्रियाद्वि
त्वोपपत्तेर्द्वैधे न क्रियेत वक्ष्यमाणस्य भुक्तवतश्च यदाचमनं स्मृतिविहितं तत्प्रायश्चित्तार्थं भवति क्रियामात्रमेव न तु तत्प्रायश्चित्तं दर्श
नाद्यपेक्षते तत्र चाचमनांगभूतास्वप्सु वासो विज्ञानं प्राणस्येति कर्तव्यतया चोद्यते न तु तस्मिन्क्रियमाणे आचमनस्य प्रायश्चित्तार्थ
ता बाध्यते क्रियांतरत्वादाचमनस्य तस्माद्वक्ष्यमाणस्य भुक्तवतश्च यदाचमनं तत्राप्सु वासः प्राणस्येति दर्शनमात्रं विधीयते ऽप्र
प्तत्वात् अन्यतः॥ ॥अष्टमस्य प्रथमं ब्राह्मणं॥ ॥श्वेतकेतुर्ह वा आरुणेय इत्यस्य संबंधः। खिलाधिकारोऽयं तत्र यदनुक्तं तदुच्यते स
प्तमाध्यायांते ज्ञानकर्मसमुच्चयकारिणाग्नेर्मार्गयाचनं कृतमग्ने नय सुपथेति तत्रानेके पथां सद्भावो मंत्रेण सामर्थ्यात्प्रदर्शि
तः सुपथेति विशेषणात्। तज्ज्ञानस्य कृतविपाकप्रतिपत्तिमार्गो वक्ष्यतीति च यत्कृत्वेत्यादिना केवलकर्मविपाकप्रतिपत्तिमार्गा इति सर्व
संसारगत्युपसंहारार्थोऽयमारंभः। एतावती हि संसारगतिरेतावान्कर्मणो विपाकः स्वाभाविकस्य त्वशास्त्रीयस्य च सविज्ञानस्येति पश्च
विद्ययाह प्राजापत्या इत्यत्र स्वाभाविकः पाप्मास्पृष्टितो ननु तस्येदं कार्यमिति विपाकः प्रदर्शितः शास्त्रीयस्यैव तु विपाकः प्रदर्शितः स्वय ११४

न्नात्मत्वप्रतिपत्त्यंतेन ब्रह्मविद्यासंनिधौ तद्वैराग्यस्य विवक्षितत्वात् तत्रापि केवलेन कर्मणा पितृलोको विद्यया विद्यासंयुक्तेन च कर्म
णा देवलोक इत्युक्तं। तत्र केन मार्गेण पितृलोकं प्रतिपद्यते केन वा देवलोकमिति नोक्तं तदिह खिलप्रकरणेऽशेषतो वक्तव्यमि
त्यारभ्यते ऽन्ते च सर्वोपसंहारः शास्त्रार्थस्य। अपि चैतावदमृतत्वमित्युक्तं न कर्मणामृतत्वाशास्तीति च तत्र हेतुर्नोक्तस्तद
र्थश्चायमारंभो यस्मादियं कर्मणो गतिर्नानिर्दिष्टमृतत्वे व्यापारोऽस्ति तस्मादेतावदेवामृतत्वसाधनमिति सामर्थ्याद्धेतुः संपद्य
ते। अपि चोक्तमग्निहोत्रे न त्वेवैनयोस्त्वमुत्क्रांतिं न गतिं प्रतिष्ठां न तृप्तिं न पुनरावृत्तिं न लोकं प्रत्युत्थायिनं वेत्थेति तत्र प्रतिवचने
न ते वा एते आहुती हुते उत्क्रामतः इत्यादिना आहुतेः कार्यमुक्तं तत्र तत्कर्तुराहुतिलक्षणस्य कर्मणः फलं न हि कर्तारमनाश्रि
त्याहुतिलक्षणस्य कर्मणः स्वातंत्र्येणोत्क्रांत्यादिकार्यारंभ उपपद्यते कर्त्रर्थत्वात्कर्मणः कार्यारंभस्य कर्त्राश्रयत्वाच्च कर्मणः स
त्वाग्निहोत्रस्तुत्यर्थत्वादग्निहोत्रस्यैव कार्यमित्युक्तं षट्प्रकारमपि तत्तु तदेव कर्तुः फलमित्युपदिश्यते। षट्प्रकारमपि कर्मफल
विज्ञानस्य विवक्षितत्वात् तद्द्वारेण च पंचाग्निदर्शनमिहोत्तरमार्गप्रतिपत्तिसाधनं विधित्सितमेव मन्त्रोऽयं संसारगत्युपसंहारः का
ण्डस्यैषा निष्ठेत्येतमर्थं दिदर्शयिषुराख्यायिकां प्रणयति। श्वेतकेतुर्नामतोऽरुणस्यापत्यमारुणिस्तस्यापत्यमारुणेयः ह वा इत्यै
तिह्यार्थः। पित्रानुशिष्टः सन्नात्मनो यशः प्रथनाय पंचालानां परिषदमाजगाम पंचालाः प्रसिद्धास्तेषां परिषदमागत्य जित्वा राज्ञो

प्यि पर्षदं जेष्यामिति गर्वेण स आजगाम जीवलस्यापत्यं जैवलिः पंचालराजं प्रवाहणनामानं स्वभृत्यैः परिचारयमाणमा
त्मनः परिचरणकारयंतमित्येतत् स राजा पूर्वमेव तस्य विद्याभिमानगर्वं श्रुत्वा विनेतव्योयमिति मत्वा तमुदीक्ष्योत्प्रेक्ष्या तमा
त्रमेवाभ्युवादाभ्युक्तवान् कुमाराइ इति संबोध्य भर्त्सनार्था प्लुतिः एवमुक्तः स प्रतिशुश्राव भो३ इत्यप्रतिरूपमपि क्षत्रियं प्रत्युक्त
वान् क्रुद्धः सन् अनु त्वा शिष्टोनुशासितवानसि किं पित्रा इत्युवाच राजा प्रत्याहेतरः उमिति बाढमनुशिष्टोस्मि यदि संज्ञाय
स्ति वेत्थ विजानासि किं यथा येन प्रकारेण इमाः प्रजाः प्रयत्यो म्रियमाणाः विप्रतिपद्यांता३ इति विप्रतिपद्यंते विचारणार्था प्लुतिः स
मानेन मार्गेण गच्छंतीनां मार्गद्वैविध्यं यत्र भवति तत्र काश्चित् प्रजा अन्येन मार्गेण गच्छंति काश्चिदन्येनेति विप्रतिपत्तिर्यथा ताः प्रजाः
विप्रतिपद्यंते तत् किं वेत्थेत्यर्थः। नेति होवाचेतरो यद्येवं वेत्थ उ यथा इमं लोकं पुनरापद्यंता३ पुनरापद्यंते यथा पुनरागच्छंती मं लोकं ने
ति होवाच श्वेतकेतुः वेत्थ उ यथासौ लोकः एवं प्रसिद्धेन न्यायेन पुनः पुनः असकृत्प्रयद्भिर्म्रियमाणैर्यथा येन प्रकारेण न संपूर्यते सौ लोकः १२५
तं किं वेत्थ नेति होवाच वेत्थ यथा पंचम्यामाहुत्यामाहुतायामापः पुरुषवाचः पुरुषस्य याः वाक् सैव यासां ता पुरुषवाचः पुरुषवाकाः
पुरुषवाचो भूत्वा पुरुषशब्दवाच्या वा भूत्वा यदा पुरुषाकारपरिणतास्तदा पुरुषवाचो भवंति समुद्धर्तय सम्यगुक्ता याहुताः स
त्या वदंति इति नेति होवाच यद्येवं वेत्थ उ देवयानस्य पथो मार्गस्य प्रतिपदं प्रतिपद्यते येन सा प्रतिपत् तां प्रतिपदं पितृयाणस्य

वा प्रतिपदं प्रतिपद्यते वा यमर्थमाह। यत्कर्म कृत्वा यथाविशिष्टं कर्म कृत्वेत्यर्थः। देवयानं वा पंथानं मार्गं प्रतिपद्यंते पितृयाणं वा य
त्कृत्वा प्रतिपद्यते तत्कर्म प्रतिपद्यते तां प्रतिपदं किं वेत्थ देवलोकपितृलोकप्रतिपत्तिसाधनं किं वेत्थेत्यर्थः। अप्यत्रास्यार्थस्य प्रका
शकमृषेर्मंत्रस्य वचो वाक्यं नः श्रुतमस्ति मंत्रोप्यस्यार्थस्य प्रकाशको विद्यत इत्यर्थः कोसौ मंत्र इत्युच्यते द्वे सृती इति मार्गौ विश्रुत
वानस्मि तयोरेका पितृणां प्रापिका पितृलोकसंबद्धा तया सृत्या पितृलोकं प्राप्नोतीत्यर्थः अहमश्रृणवमिति व्यवहितेन संबंधः दे
वानां संबंधिन्यन्या देवान्प्रापयति सा के पुनरुभाभ्यां पितृदेवाश्च गच्छंतीत्युच्यते ते उत अपि मर्त्यानां मनुष्याणां संबंधिनी मनुष्या ए
व हि सृतिभ्यां गच्छंतीत्यर्थः। ताभ्यां सृतिभ्यामिदं विश्वं समस्तमेजद्गच्छत् समेति संगच्छते ते द्वे सृती यदंतरा मध्ये पितरं मा
तरं च मातापित्रोरंतरा मध्य इत्यर्थः। कौ तौ मातापितरौ द्यावापृथिव्यावंडकपाले इयं वै माता असौ पितेति हि व्याख्यातं ब्राह्मणेना
उकपालयोर्मध्ये संसारविषय एवैते सृती नात्यंतिकामृतत्वगमनायेत्यभिप्रायः। अतो ऽस्मात्प्रश्नसमुदायादेकं चनैकमपि दिवा नाहं वे
देति होवाच श्वेतकेतुरथानंतरमपनीयविद्याभिमानगर्वमेनं प्रकृतं श्वेतकेतुं वसत्यापयोजनेनोपमंत्रयांचक्रे इह वसंत्वेवं
तः पाद्यमर्घ्यं चायतामित्युपमंत्रणं कृतवान्। ज्ञात्वा अनादृत्य तां वसतिं कुमारः श्वेतकेतुः प्रदुद्राव प्रगतवान्पितरं प्रति स आजगा
म पितरमागत्य चोवाच तं कथमिति वाव वाव किल एवं किल नो ऽस्मान्भवान्पुरा समावर्तनकालेनुशिष्टान् सर्वाभिर्विद्याभिर्वोचो

वोचदितिसोपालंभं पुत्रस्य वचः श्रुत्वाह पिता कथं केन प्रकारेण तव दुःखमुपजातं हे सुमेधः शोभना मेधा अस्येति सुमेधः श्रृ
णु मम यथावृत्तं पंच पंच संख्याकान् प्रश्नान्मां राजन्यबंधू राजन्या बंधवो ऽस्येति परिजनवचनमेतन्नं राजन्यबंधुरिति। अप्राक्षीत् पृष्टवांस्त
तस्तस्मान्न एकं चन एकमपि न वेद न विज्ञातवानस्मि कतमे ते राज्ञा पृष्टाः प्रश्ना इति एवमिमे ते ह इति प्रतीकानि प्रश्नानामुदाजहार उदा
हृतवान् स होवाच पिता पुत्रं क्रुद्धमुपशामयन्। तथा तेन प्रकारेण नो ऽस्मान् त्वं हे तात वत्स जानीथा यथा यदहं किंच वि
ज्ञानं जाने तद्वेद सर्वं तत्तुभ्यमवोचमित्येवं जानीथाः। को ऽन्यो मम प्रियतरो ऽस्ति यत्त्वत्तो यदर्थं रक्षिष्ये ऽहमप्येतन्न जानामि यैस्ते राज्ञा पृष्टं तस्मा ५
त्प्रेत्यागच्छ तत्र राज्ञि प्रतीत्य गत्वा ब्रह्मचर्यं वत्स्यावो विद्यार्थमिति स चाह भवानेव गच्छत्विति तेनाहं तस्य मुखं निरीक्षितुमुत्सहे
स आजगाम गौतमो गोत्रतो गौतमः आरुणिर्यत्र प्रवाहणस्य जैवलेरास आसनमास्थायिका तस्मै गौतमायाभ्यागताया स
नमनुरूपमाहृत्योदकं च तस्यै राजाहारयांचकार च यदस्मादस्मै अर्घ्यं पुरोधसा कृतवान्मंत्रवन्मधुपर्कं च कृत्वा चैवं पूजा १२
तं होवाच। वरं च ते गौतम मानुष्यं दद्म इति गोस्वादिलक्षणं स होवाच गौतमः प्रतिज्ञातो मे ऽष वरस्त्वया अस्याः प्रतिज्ञायां दृढीकुर्वा
त्मानं या तु वाचं कुमारस्य मम पुत्रस्यान्ते समीपे वाचमभाषथाः प्रश्नरूपां तामेव मे ब्रूहि स एव नो वरः स होवाच राजा दैवेषु वरेषु
तद्धे गौतम यत्त्वं प्रार्थयसे मानुषाणामन्यतमं प्रार्थय वरं स होवाच गौतमो भवतापि विज्ञायते ममास्ति सः। न तेन प्रार्थितेन

गो

कृत्यं मम यत्त्वं दित्ससि मानुषं वरं यस्मान्ममाप्यस्ति हिरण्यस्य प्राप्तस्यापात्तं प्राप्तं गोअश्वानामयानमस्तीति सर्वं चानुषंगो दासीनां प्र
वाराणां परिधानस्य च यन्मम विद्यमानं त्वत्तः प्रार्थनीयं त्वया वा देयं प्रतिज्ञातश्च वरस्त्वया त्वमेव जानीषे यदत्र युक्तं प्रतिज्ञा रक्षणीया
न वेति मम पुनरयमभिप्रायो मा भून्नो ऽस्मानभि अस्मानेव केवलान्प्रति सर्वत्र वदान्यो ऽभूत्वा वदान्यो मा भूत्कदर्यो मा भूदित्यर्थः। बहो
रनंतस्यानंतस्यानंतफलस्येत्येतदपर्यंतस्यापरिसमाप्तिकस्य पुत्रपौत्रादिगामिकस्येत्येतदीदृशस्य वित्तस्य मां प्रत्येव केवलमदाता
मा भूद्भवान्न चान्यन्नादेयमस्ति भवतः एवमुक्तः आह स त्वं वै हे गौतम तीर्थेन न्यायेन शास्त्रविहितेन विद्यामत्त इच्छासे इच्छस्वाभ्युमि
त्युक्तो गौतम आह उपैम्युपगच्छामि शिष्यत्वेनाहं भवंतमिति वाचा ह स्म एव किल पूर्वे किल ब्राह्मणाः क्षत्रियान्विद्यार्थिनः संतो वैश्या
न्वा क्षत्रिया वा वैश्या नापद्युपयंति शिष्यवृत्त्योपगच्छंति नोपनयनशुश्रूषादिभिरतः स गौतमः उपायनकीर्तनमुपगमनकीर्तनमा
त्रेणैवोवासोषितवान्नोपनयनं चकार एवं गौतमेनापदं तरत उक्ते स होवाच राजा पीडितं मन्वा क्षामयन्त्तथा नो ऽस्मान्प्रति मापराधाः
अपराधं माकार्षीरस्मदीयो ऽपराधो न ग्रहीतव्य इत्यर्थः। तव च पितामहा अस्मत्पितामहेषु यथापराधं न जगृहुः तथा पितामहानां वृ
त्तमस्माभिरपि भवता रक्षणीयमित्यर्थः। यथा इयं विद्या त्वया प्रार्थिता इतः त्वत्संप्रदानात्पूर्वं न कस्मिंश्चिदपि ब्राह्मणे उवास उषितवती

के।४

तथात्वमपि ज्ञानीषे सर्वदा क्षत्रीयपरम्परे [illegible] यं विद्यागता सास्थितिर्म्यापि रक्षणीया यदि ब्राक्यतद् त्युक्तं देवेषु वै गौतम तद्व
रेषु मानुषाणां ब्रूहीति न पुनस्त्वादेयो वर इतिनः परं नन्वाक्यतेरक्षितुं तामपि विद्यां तुभ्यं वक्ष्यामि कोऽन्योपि यस्मादेवं त
महतीति प्रत्याख्यातुं न वक्ष्यामीत्यहं पुनः कथं न वक्ष्ये तुभ्यमसौ वै लोकोऽग्निर्गौतमेत्यादि चतुर्थः प्रश्नः प्राथम्येन निर्णीयते क्रमप्र
१० गस्तु तन्निर्णयायत्तत्वादितरप्रश्ननिर्णयस्यासौ द्युलोकोऽग्निः हे गौतम द्युलोकेऽग्निदृष्टिरनग्नौ विधीयते। यथा योषित्पुरुषयोः। त
स्य द्युलोकाग्नेरादित्य एव समित् समिंधनादादित्येन [illegible]
[illegible] वसमिध्यते सो लोकः रश्मयो धूमः समिधस्त्थानसामान्यादादित्याद्धि रश्मि
यो निर्गता समिधः धूमा लोके उत्तिष्ठति। अहरर्चिः प्रकाशसामान्यात् दिशोऽङ्गाराः उपशमसामान्यादवांतरदिशो विस्फुलिंगा ११२
विस्फुलिंगवद्विक्षेपात्तस्मिन्नेवं गुणविशिष्टे द्युलोकाग्नौ देवा इंद्रादयः श्रद्धां जुह्वति द्रव्यस्थानीयां प्रक्षिपंति तस्या आहु
तेः सोमो राजा पितॄणां ब्राह्मणानां वा संभवति [illegible] के देवाः कथं जुह्वति किं वा श्रद्धाख्यं हविरित्यतः उक्तमस्माभिः संबंधे [illegible] वेनयो
स्त्वमुत्क्रांतिमित्यादि पदार्थषट्कनिर्णयार्थमग्निहोत्रे उक्ते ता एते अग्निहोत्राहुती हुते सत्यौ उत्क्रामतस्ते [illegible] अंतरिक्ष
माविशतस्ते अंतरिक्षमेवाहवनीयं कुर्वते वायुं समिधं मरीचिरेव शुक्रामाहुतिं ते अंतरिक्षं पर्ययतस्ते तत उत्क्रामतस्ते दिमा [illegible] विशतस्ते दि

व२ व व२

प३

नाम६

वमेवमेवाहवनीयं कुर्वते आदित्यं समिधमित्येवमा [illegible] क्तं द्युतत्राग्निहोत्राहुती ससाधने एवोत्क्रामतो यथा इहयैः साधनैर्विशिष्टे जायेते
रते आहवनीयाग्निः समिद्धूमांगारविस्फुलिंगाहुतिद्रव्यैस्ते तथैवोत्क्रामतोऽस्माल्लोकादमुं लोकं तत्राग्निरग्नित्वेन समित्समित्वेन धूमो धू
मत्वेनांगारोऽङ्गारत्वेन विस्फुलिंगो विस्फुलिंगत्वेनाहुतिद्रव्यमपि पय आज्यादाहुतिद्रव्यत्वेनैव सर्गादावव्याकृतावस्थायामपि परेण सूक्ष्मेणात्मनाव्य
वतिष्ठते तदिदं मानमेव ससाधनमग्निहोत्रलक्षणं कर्म पूर्वेणात्मनाव्यवस्थितं तत्पुनर्व्याकरणकाले तथैवांतरिक्षादीनाहवनीया
ग्न्यादित्वेन कुर्वद्विपरिणमते तथैवेदानीमप्यग्निहोत्राख्यं कर्म एवमग्निहोत्राहुत्य [illegible] पूर्वपरिणामात्मकं जगत्सर्वमित्याहुत्योरेव स
त्यर्थत्वान्नो उत्क्रान्त्याद्या [illegible] लोकं प्रत्युपस्थयिः षट्पदार्थाः कर्मप्रकरणेऽधस्तान्निर्णीता [illegible] हुतुकर्तुः कर्मविपाकविवक्षायां द्युलोकाग्न्याद्यारभ्य
पंचाग्निदर्शनमुत्तरमार्गप्रतिपत्तिसाधनं विशिष्टकर्मफलोपभोगाय विविक्षितं [illegible] द्युलोकाग्न्याद्येव दर्शनं प्रस्तूयते [illegible] य आध्यात्मि
काः प्राणाः इहाग्निहोत्रस्य होतारस्त एवाधिदैविकत्वेन परिणताः संत इंद्रादयो भवंति त एव तत्र होतारो द्युलोकाग्नौ ते वेहाग्निहोत्रस्य
फलभागा याग्निहोत्रं हुतवंतस्त एव फलपरिणामकालेऽपि तत्फलभोक्तृत्वात्तत्र तत्र होतृत्वं प्रतिपद्यंते तथा तथा विपरिणम [illegible] मानाः।
काः दिवस्त्वा हुवार्स्तो त्रं वयस्यायो द्रव्यमग्निहोत्रकर्माश्रयभूतमिहाहवनीये प्रक्षिप्तमग्निनाभक्षितमदृष्टेन सूक्ष्मेण रूपेण विपरिणतं स
हकर्त्रा यजमानेनामुं लोकं धूमादिक्रमेणांतरिक्षमंतरिक्षाद्द्युलोकमाविशति ता [illegible] सूक्ष्मा आप आहुतिकार्यभूताः अग्निहोत्रस

वा॥येन्यः कर्तृसहिताः श्रद्धाशब्दवाच्याः सोमलोककर्तृः शरीरारंभाय द्युलोकं प्रविशंत्योऽक्ष्यंतइत्युच्यते ता ...जकृताः द्युलोकंप्रवि
ष्य सोममंडलेकर्तृः शरीरमारभंतेहुच्यते देवाः श्रद्धां जुह्वतितस्या आहुत्येः सोमोराजा संभवतीति श्रद्धा वा आप इति श्रुतेः श्रद्धयाति
या माहुत्यौ हुतायामापः पुरुषवाचो भवंती समस्त्यायवदंतीति प्रश्नस्तस्यव निर्णयविषये सौवैलोकोऽग्निरितिप्रस्तुते तस्माद
कर्मसमवायिन्यः कर्तृः शरीरारंभिकाः श्रद्धाशब्दवाच्याः इतिनिश्चीयते नूयस्त्वादापः पुरुषवाच इतिव्यपदेशो नत्वितराणि भूता
नसंति कर्मप्रयुक्तेशरीरारंभे कर्मवाप्समवायित तश्चापांप्राधान्यं शरीरकर्तृत्वे तेनवापः पुरुषवाच इतिव्यपदेशः कर्मकृतो हि जन्म
सर्वत्र तद्यद्यप्यग्निहोत्राहुतिद्वारेणोक्तास्त्वादयः प्रस्तुताः पदार्थाः अग्निहोत्रे तथापि वैदिकानि सर्वाण्येव कर्माणि अग्नि
त्र प्रकृतीनि लक्ष्यंते अग्निहोत्राहुत्याधाराग्निसंबंद्धद्विपां क्रकर्म्मकर्मणापितृलोक इति वक्ष्यति चाथ ये यज्ञेन दानेन तपसा लो
जयंतीति पर्जन्योवाग्निर्गौतमद्वितीय आहुत्याधारः आहुत्योराद्वतिक्रमे पर्जन्यो नाम वृष्ट्युपकरणाभिमानी देवतात्मा तस्य सं ११५
र एव समित्संवत्सरेणाहि शरदादिभिर्ग्रीष्मांतैः स्वावयवैर्विपरिवर्तमानेन पर्जन्योग्निर्दीप्यते अभ्राणि धूमो धूमप्रभवत्वा
दुपलक्ष्यत्वाद्वा विद्युदर्चिः प्रकाशसामान्यादशनिरंगाराउपशांतकाठिन्यसमान्यात्वांत्सादुनयस्तनयित्नुशब्दाः विस्फुलिंगाः
क्षेपायनेकत्वसामान्यात तस्मिन्नेतस्मिन्नित्याद्युक्त्यधिकरणनिर्देशः देवाइति तएवहोतारः सोमंराजानंजुह्वतियासोद्युलोकाग्नौश्रद्धा

हुतायां अभिनिर्वृत्तः सोमः सद्वितीये पर्जन्याग्नौ हूयते। तस्याश्च सोमाहुतेर्वृष्टिः संभवति अयं वै लोकोऽग्निर्गौतम। अयं लोक इति
तत्कोगाश्रयः क्रियाकारकफलविशिष्टः सतृतीयोग्निस्तस्याग्नेः पृथिव्येव समित्पृथिव्या ह्ययं लोकोनेकप्राण्युपभोग्येन संपन्न
मिध्यते अग्निर्धूमः पृथिव्याश्रयोत्थानसामान्यात्पार्थिवंहीधनद्रव्यमाश्रित्याग्निरुत्तिष्ठति यथासमिधाश्रयेण धूमो रात्रिरर्चिः स
भवसामान्यादग्नेः समित्संबंधेन ह्यर्चिः संभवति तथा पृथिवीसमित्संबंधेन शार्वरी पृथिवीछायां हि शार्वरं तम आचक्षते चंद्रमा
अंगारास्तत्प्रभवत्वसामान्यादर्चिषो ह्यंगाराः प्रभवंति तथा रात्रौ चंद्रमा उपशांतत्वसामान्याद्वा नक्षत्राणि विस्फुलिंगाः विस्फुलिंग
क्षेपात तस्मिन्नित्यादि पूर्ववत्नूवृष्टिंजुह्वति तस्याआहुतेरन्नं संभवतिवृष्टिप्रभवत्वस्य प्रसिद्धत्वात् व्रीहियवादेरन्नस्य पुरुषो वा अ
ग्निर्गौतमप्रसिद्धः शिरः पाण्यादिमान्पुरुषः चतुर्थोग्निस्तस्य व्यात्तं विवृतं मुखं समिन्विवृतेन हि मुखेन दिप्यते पुरुषो वेदस्वाध्यायादौ
यथा समिधाग्निः प्राणो धूमस्तदुत्थानसामान्यान्मुखाद्धि प्राण उत्तिष्ठति वाक् अर्चिः व्यंजकत्वसामान्यात् अर्चिश्च व्यंजनं तथा वाक्
अभिधेयव्यंजकश्चक्षुरंगाराः उपशमसामान्यात्। प्रकाशाश्रयत्वाद्वा श्रोत्रं विस्फुलिंगाः विक्षेपसामान्यात्तस्मिन्नन्नं जुह्वतिन
देवाअन्नमिहउद्धननाद्वस्यंते नैवशेषः प्राणानां देवत्वोपपत्तेः रविदेवा मंडादयोदेवास्त एवाध्यात्मं प्राणास्ते वा अन्नस्य पुरुषे प्रक्षेप्ता
स्या आहुतेरेतः संभवत्यन्नपरिणामो हि रेतः योषा वाव अग्निर्गौतम योषेति स्त्री पंचमोह्यौधिकरणोग्निस्तस्या उपस्थ एव समिते
सासमिध्यते लोमानि धूमस्तदुत्थानसामान्याद्योनिरर्चिर्वर्णसामान्या यदंतः करोति तेंगाराः अंतः करणं मैथुनव्यापारस्तेंङ्गा

मा ६

।ःवीर्यो त्पत्तिहेतुत्वसामान्याद्वीर्योद्युत्पत्तिकारणं मैथुनं तथांगारत्वादग्नेरुत्पत्तिकारणमभिनंदाः सुखलवाः क्षुद्रत्वसा
मान्याद्विस्फुलिंगास्तस्मिन्नेतोजुह्वति तस्या आहुतेः पुरुषः संभवति एवं द्युपर्जन्यायं लोक पुरुषयोषाग्निषु क्रमेणा हूयमा
नाः श्रद्धाख्या आपः सोमवृष्ट्यन्नरेतोभावेन स्थूलतारतम्यक्रममापद्यमानाः पुरुषशरीरमारभंते तया [illegible] म्युचतुर्थी वेत्य
यतिष्यामाहुत्यांहुताय [illegible] मापः पुरुषवचो भूत्वा समुत्थाय वदंतीति स एष निर्णीतः [illegible] पंचम्यां आहुतौ योषाग्नौ हुतायां रेतोभू
ता आपः पुरुषवचो भवंतीति स पुरुषः एवं क्रमेण जातो जीवति कियंतं कालमित्युच्यते यावज्जीवति यावदस्मिं शरीरे स्थितिनि
मित्तं कर्म विद्यत इत्यर्थः अथ तत्क्षये यदा यस्मिन्काले म्रियते अथ तदा एतं मृतमग्नये ऽग्न्यर्थमेवांत्याहुत्यै हरंति ऋत्विजस्तस्या
हुतिनिमित्तस्य प्र [illegible] सिद्धोग्निरेव होमाधिकरणं न परिकल्प्यो ऽग्निः प्रसिद्धैव समित्समिद्धूमो धूम एवार्चिरंगारा अंगारा विस्फुलिंगा
विस्फुलिंगा यथाप्रसिद्धमेव सर्वमित्यर्थः तस्मिन्पुरुषमंत्याहुतिं जुह्वति तस्या आहुत्या आहुतेः पुरुषोभास्वरवर्णोतिशयदी
प्तिमान्निषेकादिभिरंत्याहुत्यंतैः कर्मभिः संस्कृतत्वात्संभवति निष्पद्यते। इदानीं प्रथमप्रश्ननिर्णयार्थमाह ते के य एवं यथोक्तं पंचाग्निदर्श
नमेतद्विदुः एवं द्युलोकादिग्निसमिद्धूमार्चिरंगारविस्फुलिंगश्रद्धादिविशिष्टाः पंचाग्नयो निर्दिश्यंते एवमेतान्पंचाग्नीन्विदुरित्यर्थः। तत्राग्नि
होत्राहुतिदर्शनविषयमेवैतद्दर्शनं। तत्रायुक्तमुक्तं त्वादिपदार्थषट्कनिर्णये दिवमेवाहवनीयं कुर्वीत इत्यादि इह प्यमुष्य लोकस्या ११८

११८

त्वमादित्यस्य च समित्त्वमित्यादि विरुद्धसामान्यं तस्मात्तच्छेषमेवैतद्दर्शनमिति। नयतिष्यामिति प्रश्नप्रतिवचनपरिग्रहाद्यतिष्यामि
त्यप्रतिवचनस्य यावदेव परिग्रहस्तावदेवैवं तद्विदुः न परामृष्टं युक्तमन्य [illegible] था प्रश्नानर्थक्यात्रिरात्रत्वाच्च संख्यायाः। अग्नय ए
रुव्याः अथ निरात्तमप्यनूद्यते यथा प्राप्तस्यैवानुवचनं युक्तं न त्वसौ लोकोग्निरित्यथोपलक्षणार्थस्तथाप्यादेनान्येन
पलक्षणं युक्तं श्रुत्यंतराच्च समाने हि प्रकरणे छांदोग्ये श्रुतेः पंचाग्नीन्वेदेति पंचसंख्याया एवोपादानान्नाग्निहोत्रशेषमेत
दाग्निदर्शनं यत्वग्निसमिदादिसामान्यमग्निहोत्रस्तुत्यर्थमित्यवोचाम। तस्मान्नोक्तांत्यादिपदार्थषट्कपरिज्ञानादर्चिरादि
तेपत्तिः एवमिति प्रकृतोपदानेनार्चिरादिप्रतिपत्तिविधानात्पुनर्नत्ये य एवं विदुर्गृहस्था एवं न तेषां यज्ञादिसाधनेन धूमादिप्रति
पत्तेर्विवक्षितानामेवं दामपि गृहस्थानां यज्ञादिसाधनोपपत्तेः भिक्षुवानप्रस्थयोश्चारण्य संबंधेन ग्रहणं। [illegible] स्थकर्मसंबंधा
दाग्निदर्शनस्यात् नापि ब्रह्मचारिणः पंच ये विदुरिति गृह्यते तेषां तूत्तरेण पथि प्रवेशः स्मृतिप्रामाण्यात् अष्टाशीतिसहस्राणि ऋषि
णमूर्ध्वरेतसामुत्तरेणार्यम्णः पंथा [illegible] ते ऽमृतत्वं हि भेजिरे इति तस्माद्येग्रे गृहस्था एवमग्निजो [illegible] हमग्न्यपत्यमित्येवं क्रमेणाग्नि
जाताग्निरूपद्रस्येवं ये विदुस्ते च। [illegible] ये चामी अरण्ये वानप्रस्थाः परिव्राजकाश्चारण्यनित्याः श्रद्धां श्रद्धायुक्ताः संतः सत्यं ब्रह्मा
रण्यगर्भात्मानमुपासते न पुनः श्रद्धां चोपासते ते चार्चिरसं भवंति यावद्गृहस्थाः पंचाग्निविदाः सत्यं वा ब्रह्म न विदुस्तावच्छ्र

वि५

द्वाद्वाहुतिक्रमेणपंचम्यामाहुतौहुतायांततोयोषाग्नेर्जाताः पुनर्लोकंप्रत्युत्थायिनोग्निहोत्रादिकर्मानुष्ठातारोभवंतितेनकर्म
णाधूमादिक्रमेणपुनः पितृलोकंपुनः पर्जन्यादिक्रमेणमामावर्त्ततेततः पुनर्योषाग्नेर्जाताः पुनः कर्मकृत्वे[…]मेवघटीयंत्रव
त्स्यागतिच्यांपुनः पुनावर्त्ततेयस्त्वेवंविदुस्ततोघटीयंत्रभ्रमणाद्विनिर्मुक्ताः संतोर्चिरभिसंभवंतिअर्चिरितिनाग्निज्वालामात्रंकिं
तर्ह्यर्चिरभिमानिन्यर्चिः शब्दवाच्यादेवताउत्तरमार्गलक्षणाव्यवस्थितैतामभिसंभवंतिन[…]हिपरिव्राजकानामग्न्यर्चिषैवसाक्षात्सं
बंधोस्तितेषांतेनदेवतैवपरिगृह्यतेर्चिः शब्दवाच्यात्ततोहर्देवतां[…]णकालनियमानुपपत्तेरहः शब्दापिदेवतैवा[…]षः क्षयेहिमर
णंनैवंविदामहन्येवमर्त्तव्यमित्यहर्मरणकालोनियंतुंशक्यतेन[…]रात्रौप्रे[…]ताः संतोहः प्रतीक्षंतेसयावत्क्षिप्येन्मनसावदा
दित्यंगच्छतीतिश्रुत्यंतरान्नअह्न आपूर्यमाणपक्षमहर्देवतायाअहर्देवतायातिवाहिताअपूर्यमाणपक्षदेवतांप्रतिपद्यंतेशुक्ल
पक्षदेवतामित्यर्थःआपूर्यमाणपक्षान्यान्षण्मासानुदङुत्तरांदिशमादित्यः समवैवतितान्मासान्प्रतिपद्यंतेशुक्लपक्षदेवतयाति १२८
वाहिताः संतोमासानितिबहुवचनात्संगवादिरूपः षडुत्तरायणदेवतास्ताभ्योमासेभ्यः षण्मासदेवताभिरतिवाहिताः देवलोकाभिमा
निनींदेवतांप्रतिपद्यंतेदेवलोकादादित्यमादित्याद्विद्युतंविद्युदभिमानिनींदेवतांप्रतिपद्यंतेविद्युद्देवताप्राप्तान्ब्रह्मलोकवासीपुरुषो
ब्रह्मणामनसासृष्टोमानसः कश्चिदेत्यागत्यब्रह्मलोकंगमयतिब्र[…]लोकनित्यधरोत्तरस्थमिंभेदेनभिन्नाद्ध्रुतिगम्यतेबहुवचन

प्रयोगा[…]सनतारतम्योपपत्तेश्चनतेनपुरुषेणागमिताः सत्रस्तेषुब्रह्मलोकेषुपराः प्रकृष्टाः संतः स्वयंपरावतः समासंवत्सरा
ननेकान्वसंतिब्रह्मणोनेकाः कल्पान्वसंतीत्यर्थः तेषांब्रह्मलोकगतानानास्तिपुनरावृत्तिरस्मिन्संसारेनपुनरनागमन[…]तिश्रौ
भा२ स्वांतरपाठादिहैकृतिमात्रग्रहणमितिवेच्छोत्कृतेपौर्णमासीमितियद्वत्स्वकेतिविशेषणानर्थक्यंतेयदिहनावर्त्ततएवेहग्रहण
मनर्थकमेवस्यात्[…]कृतेपौर्णमासीमित्यत्रतुपौर्णमास्याः स्वोत्कृतत्वमनुक्तंनज्ञायतइतियुक्तंविशेषयितुं[…]हितत्रस्वश
कृतिः शार्थ्यविद्यतइतिश्वशब्दोनिरर्थकएवप्रयुज्यते[…]तुविशेषणशब्देप्रयुक्तेअन्विष्यमानेविशेषणफलंचेन्नगम्यतेतत्रयु
क्तोनिरर्थकत्वेनोत्कृष्टविशेषणशब्दोनतुसत्याविशेषणफलावगतौ[…]मादस्मात्कल्पादूर्ध्वमावृत्तिर्गम्यते[…]पुनर्येनिवंविदु
रूढांत्याद्यग्निहोत्रसंबंधपदार्थषट्कस्यैववेदितारः केवलकर्मिणोयज्ञेनाग्निहोत्रादिनादानेनब[…]र्वेदिभिक्षमाणेषुद्रव्यसंवि
गलक्षणेनदानेनतपसावहिर्वेद्यैवदीक्षादिव्यतिरिक्तेनकृच्छ्रचंद्रायणादिनालोकाञ्जयंतिलोकानितिबहुवचनात्तत्रापिफलतारत
म्यमभिप्रेतंतेधूममभिसंभवंत्युत्तरमार्गदेवहापिदेवताएवधूमादिशब्दवाच्याः धूमदेवतांप्रतिपद्यंतइत्यर्थः आतिवाहिकंचदेवता
नोनहृदेवधूमाद्रात्रिंरात्रिदेवतांततोपक्षीयमाणपक्षदेवतांततोयान्षण्मासान्दक्षिणांदिशमादित्यएतितान्मासदेवताविशे
षान्प्रतिपद्यतेमासेभ्यः पितृलोकंपितृलोकाच्चंद्रंतेचंद्रंप्राप्यान्नंभवंतितांस्तत्रान्नभूतान्यथासोमंराजानमिहयज्ञेकृत्विजः आप्या

स्वापक्षीयस्वेति भक्षयंत्येवमेनांस्तत्र चंद्रप्राप्तान् कर्मिणो भृत्यानिव स्वामिनो भक्षयंत्युपभुंजते देवाः आप्यायस्वापक्षीयस्वेति
मंत्रः किं तर्हि आप्याय्याप्याय्य च समस्तं भक्षणेनापक्षयं च कृत्वा पुनः पुनर्भक्षयंतीत्यर्थः। एवं देवा अपि सोमलोके लब्ध[illegible]शरीरा
न्कर्मिण उपकरणभूतान्पुनः पुनर्विश्रमयंतः कर्मानुरूपं फलं प्रयच्छंति तद्धि तेषामाप्यायनमिवोपभुंजते उपकरणभूतान्देवाः स्तं
कर्मिणो यदा यस्मिन्काले तच्चंद्रदानादिलक्षणं सोमलोकं प्रापकं कर्म पर्यवैति परिगच्छति परिक्षीयत इत्यर्थः। अथ तदा इममेव प्र
सिद्धमाकाशमभिनिष्पद्यंते यास्ताः श्रद्धाशब्दवाच्याः द्युलोकाग्नौ हुताः आपः सोमाकारप[illegible]रिणता याभिः सोमलोके कर्मिणामुप
भोगाय शरीरमारब्धम[illegible]यंताः कर्मक्षयाद्धिमपिंड इवातपसंपर्कात्प्रविलीयंते प्रविलीनाः सूक्ष्मा आकाशभूता इव भवंति तदिदमु
क्तं इममेवाकाशमभिनिष्पद्यंत इति तेपि कर्मिणस्तच्छरीराः संतः पुरोवातादिना इतश्चामुतश्च नीयंते। अंतरिक्षगस्त्वदाहाकाशवद्वायु
र्भवति। वायोर्वृष्टिं प्रतिपद्यंते। तदुक्तं प[illegible]र्जन्याग्नौ सोमं राजानं जुह्वतीति ततो वृष्टिर्भूता इमां पृथिवीं पतंति ते पृथिवीं प्राप्य व्रीहियवा १८१
भवंति तदुक्तमस्मिन्लोकेग्नौ वृष्टिं जुह्वति। तस्या आहुत्या अन्नं संभवतीति तेन पुनः पुरुषाग्नौ हूयंते तेन भूता रेतःसि रेतोभूताः योषा
ग्नौ हूयंते ततो जायंते लोकं प्रत्युत्थायिनोग्निहोत्रादि कर्मानुतिष्ठंति ततो धूमादिना पुनः सोमलोकं पुनरिमं लोकमिति एवं कर्मि
णोनुपरिवर्तंते घटीयंत्रवच्चक्री[illegible]भूता भ्रमंतीत्यर्थः उत्तरमार्गाय सद्योमुक्तये वा यावद्ब्रह्मविदुरिति तु कामयमानाः संसरंतीत्यु

क्तं। अथ पुनर्य उत्तरं दक्षिणं वैतौ पंथानौ न विदुरुत्तरस्य दक्षिणस्य वा पथः प्रतिपत्तये ज्ञानं कर्म वा नानुतिष्ठंतीत्यर्थः ते किं भवंतीत्युच्य
ते कीटाः पतंगा यच्चेदं दंदशूकं दंशमशकमित्येतद्भवंति येदेही यं संसारगतिः कष्टास्यां निमग्नस्य पुनरुद्धारो दुर्लभः तथा च श्रुत्यंतरे
न तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवंति जा[illegible]यस्व म्रियस्वेति तस्मात्सर्वोत्साहेन यथाशक्ति स्वाभाविककर्मज्ञानहानेन दक्षि
णोत्तरमार्गप्रतिपत्तिसाधनं शास्त्रीयं कर्म ज्ञानं वानुतिष्ठेदिति वाक्यार्थः। तथा चोक्तं। अतो वै खलु दुर्निष्प्रपतरं तस्माज्जुगुप्सेतेति श्रुत्यं
तरान्मोक्षाय प्रयतेतेत्यर्थः अत्रापि उत्तर[illegible]मार्गप्रतिपत्तिसाधन एव महान्यत्नः कर्तव्य इति गम्यते एवमेवानु विपरिवर्तत इत्युक्त्वात्प
ंचप्रश्नाः सर्वे निर्णीताः असौ वै लोक इत्यारभ्य पुरुषः संभवतीति चतुर्थः प्रश्नो यतिथ्यामाहुत्यामित्यादि प्राथम्येन पंचमस्तु द्वितीय
श्चेन देवयानस्य वा पथः प्रतिपदं पितृयाणस्य वेति दक्षिणोत्तरमार्गप्रतिपत्तिसाधनकथनेन तेनैव च प्रथमोप्यग्नेर्वारस्य केचिदर्चिः
प्रतिपद्यंते केचिद्धूममिति विप्रतिपत्तिः पुनरावृत्तिश्च द्वितीयः प्रश्नः आकाशादिक्रमेणेमं लोकमागच्छंतीति तेनैवासौ लोको न सं
पूर्यते कीटपतंगादिप्रतिपत्तेश्च केषांचिदिति तृतीयोपि प्रश्नो निर्णीतः॥ ॥अष्टमस्य द्वितीयं ब्राह्मणं॥ स यः कामयेत ज्ञानकर्म
मार्गगतिरुक्ता तत्र ज्ञानं स्वायत्तं कर्म तु दैवमानुषवित्तद्वयायत्तं तेन कर्मार्थं वित्तमुपार्जनीयं तच्चाप्रत्यवायकारणोपायेनेति तदर्थं मन्था ३२
ख्यं कर्म आरभ्यते महत्त्वप्राप्तये महत्त्वे च सत्यर्थसिद्धं वित्तं तदुच्यते स यः कामयेत स यो वित्तार्थी कर्मण्यधिकृतो यः कामयेत किं मह

वा०

हं प्राप्नुयान्महात्म्यामि तीत्यर्थस्तत्र मंथकर्मणो विधित्सितस्य कालो विधीयते। उदगयन आदित्यस्य तत्त्वं सर्वत्र प्राप्ते आपूर्यमाण
पक्षस्य शुक्लपक्षस्य तत्रापि सर्वत्राप्राप्तौ पुण्याहे नुकूल आत्मनः कर्मसिद्धिकर इत्यर्थः। द्वादशाहं यस्मिन्पुण्येनुकूले कर्म चिकी
र्षति। ततः प्राक्पुण्याहमेवारभ्य द्वादशाहमुपसद्व्रती उपसत्सु व्रतमुपसदः प्रसिद्धा ज्योतिष्टोमे तत्र च वस्तनोपचयापचयद्वारेण प
योभक्षणं तद्वृत्तं तत्र च तत्कर्मानुपसंहारात्केवलमिति कर्तव्यमन्यं पयोभक्षणमात्रमुपादीयते। ननूपसदेव व्रतमिति यदा विग्र
हस्तदा सर्वमिति कर्तव्यतारूपं ग्राह्यं भवति तत्कस्मान्न परिगृह्यते इत्युच्यते स्मार्तत्वात्कर्मणः स्मार्तं हीदं मथनं कर्म ननु श्रुतिवि
हितं सत्कथं स्मार्तं भवितुमर्हति स्मृत्यनुवादिनी हि श्रुतिरियं श्रौतत्वे हि प्रकृतिविकारभावस्ततश्च प्राकृतधर्मग्राहित्वं विकारकर्म
णो न त्विह श्रौतत्वमत एव सभ्यावसथ्यावेव तत्कर्म विधीयते। सर्वा वा ...स्मार्तं चेति उपसद्व्रती भूत्वा यो व्रतानि सन्नित्यर्थः। उदुंबर उदुंबर
...मयं कंसं तस्यैव विशेषणं कंसाकारं चमसाकारं वा। उदुंबर एवाकारे तु विकल्पो नौदुंबरत्वे सर्वौषधं सर्वासामोषधीनां सम
हं यथासंभवं यथाशक्ति च सर्वौषधीः समाहृत्य तत्र ग्राम्याणां तु दश नियमेन ग्राह्याः व्रीहियवा... वक्ष्यमाणाः आधिक्यग्रहणे १८३
तु न दोषो ग्राम्याणां फलानीति फलानि च यथासंभवं यथाशक्ति चेति शब्दः समस्तसंचारोपचयप्रदर्शनार्थः अन्यदपि यत्संभरणी
यं तत्सर्वं संभृत्येत्यर्थः। ...स्तत्र गृह्योक्तोऽग्निः स्थाप्यः परिसमूहनं परिलेपनं भूमिसंस्कारो ऽग्निमुपसमाधायेति वचनादावसथ्योग्नावि

ने

ति गम्यते एकवचनेनाद्युपसमाधानश्रवणाद्विद्यमानस्यैवोपसमाधानं परिस्तीर्य दर्भेणाहृतास्मार्तत्वात्कर्मणः स्थालीपाका
वृत्या गृह्यते तेनाज्यं संस्कृतं पुंसा नक्षत्रेण पुंनाम्ना नक्षत्रेण पुण्याहे संयुक्ते न मंथं सर्वौषधफलपिष्टं तत्रौदुंबरे चमसे दधनि मधुनि
घृते चोपसिच्यैकयोपमंथिन्योपमंथ्य सन्नीय मध्ये संस्थाप्यौदुंबरेण स्रुवेणावापस्थाने आज्यस्य जुहोत्येतैर्मंत्रैर्यावंतो देवा इत्याद्यैः
ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यारभ्य इदं स्वं कृत्वा स्रुवावलेपमाज्यं मंथे संस्रावयति एतस्मादेव ज्येष्ठादिप्राणलिंगान्मंत्र्य ५४
ष्ठश्रेष्ठादिप्राणविदुष एवास्मिन्कर्मण्यधिकारः। ...स इत्यारभ्य एकैकामाहुतिं हुत्वा मंथे संस्रवमवनयत्य परयोपमंथन्यापु
नर्म...थ्नाति अथैनमभिमृशति। भ्रमसीत्यनेन मंत्रेणाथैनमुद्यच्छति सह पात्रेण हस्ते गृह्णाति। आमंस्यामंहि ते इत्यनेनाथैनमा नेमही ६
चामति तत्क्षयति गायत्र्याः प्रथमपादेन मधुमत्यैकया व्याहृत्या च प्रथमया प्रथमं ग्रासमाचामेति। तथा गायत्री द्वितीयपादेन मधु
मत्या द्वितीयया च व्याहृत्या द्वितीयं ग्रासं तृतीयेन गायत्री पादेन तृतीयया मधुमत्या तृतीयया च व्याहृत्या तृतीयं ग्रासं
सर्वां सावित्रीं सर्वाश्च मधुमतीरहमेवेदं सर्वं भूयासमिति चान्ते भूर्भुवः स्वः स्वाहेति समस्तं भक्षयति यथा चतुर्थो ग्रासे
न द्रव्यं सर्वं परिसमाप्यते तथा पूर्वमेव निरूपयेत्। यत्पात्रावलिप्तं तत्पात्रं सर्वं निर्णिज्य तूष्णीं पिबेत्। पाणी प्रक्षाल्याप उप
स्पृश्य जघनेनाग्निं पश्चादग्नेः प्राक्शिराः संविशति प्रातः संध्यामुपास्यादित्यमुपतिष्ठते दिशामेकपुंडरीकमित्यनेन मंत्रेणाथ

तंयथागतमेत्यागत्यजघनेनाग्निमासीनोवंशंजपतितंहैतमुद्दालकइत्यादिसत्यकामोजाबालोन्तेवासिभ्यःउक्त्वोवाचापि
यएनंशुष्केस्थाणौनिषिंचेज्जायेरन्नेवास्मिन्शाखाःप्ररोहेयुःपलाशानीत्येवमेतमेनंमंथमुद्दालकात्प्राप्त्यैकेकाचार्यक्रमागतंस
त्यकाममआचार्यो वदत्त्योतेवासिभ्यउक्तवान्किमन्यदुवाचेत्युच्यतेअपियएनंशुष्केस्थाणौगतप्राणेपिएनंमंथंलक्षणायसंस्कृ
तंनिषिंचेत्प्रक्षिपेज्जायेरन्नुत्पद्येरन्नेवास्मिन्स्थाणौशाखावृक्षस्यप्ररोहेयुश्चपलाशानिपर्णानियथाजीवतःस्थाणोःकिमुत
नेनकर्मणाकामःसिद्ध्येदितिस्तुवफलदंकर्मेतिकर्मस्तुत्यर्थमेतद्विद्याधिगमेषट्तीर्थानितेषामिदप्राणदर्शनस्यमंथविज्ञानस्याविधि
गमेद्वेएवतीर्थेअनुज्ञायेतेपुत्रश्चांतेवासीवा।चतुरौदुंबरोभवतीतिव्याख्यातंदशग्राम्याणिधान्यानिभवंतिग्राम्याणांतुधान्यानां
२ दशानियमेनग्राह्याइत्यवोचामकेतदितिनिर्दिश्यंतेव्रीहीयवास्तिलमाषाअणुप्रियंगवःअणवश्चीणकाद्वाच्याःक्वचिद्देशेप्रियंगव
प्रसिद्धाःकंगुशब्देनखल्वानिष्पावावल्लशब्दवाच्यालोकेखलकुलाकुलत्थाःएतद्व्यतिरेकेणयथाशक्तिसर्वौषधयोग्राह्याःफला १८३
निचयवोवामबयाद्धिकांबर्जयित्वा॥ ॥अष्टमस्यतृतीयंब्राह्मणं॥ ॥यावद्दृग्जन्मायथोत्पादितोयैर्वागुणैर्विनिर्दिष्टःपुत्रआत्मनः
पितुश्चलोक्योभवतीतितत्संपादनायब्राह्मणमारभ्यतेप्राणदर्शिनःश्रीमंथंकर्मकृतवतःपुत्रमंथेधिकारोयदापुत्रमंथंचिकीर्षतित
दाश्रीमंथंकृत्वाऋतुकालंपत्न्याःप्रतीक्षतइत्येतद्रेतसओषध्यादिरसतमत्वस्तुत्यावगम्यते॥एषांवैएषांचराचराणांभूतानांपृथिवीर

ब्याटिपु२

बो
सःसारभूतासर्वभूतानांमस्थितिहिश्रुतंपृथिव्याआपोरसोप्सुहिपृथिवीओताचप्रोताचअपामोषधयोकार्यत्वाद्रसत्वमोषध्यादीना
मोषधीनांपुष्पाणिपुष्पाणांफलानिफलानांपुरुषःपुरुषस्यरेतःसर्वेभ्योङ्गेभ्यस्तेजःसंभूतमितिश्रुत्यंतरात्।यतएवसर्वभूतानांसारत
मंमेतद्रेतोतःकानुखल्वस्ययोग्याप्रतिष्ठेतिसःस्रष्टाप्रजापतिरीक्षांचक्रेईक्षांकृत्वास्त्रियंससृजेतांसृष्ट्वाधउपास्तमैथुनाख्यं
कर्माधःकर्माधउपासनंनामकृतवान्तस्मात्स्त्रियमधउपासीतश्रेष्ठानुष्ठानाद्धिप्रजाःअत्रवाजपेयसामान्यक्लृप्तिमाह।
सएतंप्रात्मनोग्रावाणंग्रावाणंसोमाभिषवोपलस्थानीयंकाठिन्यसामान्यात्प्रजनेंद्रियमुदपारयत्।उत्पूरितवान्स्त्रीव्यंज
नंप्रतितेनएतांस्त्रियमभ्यसृजत्।अभिसंसर्गंकृतवान्तस्यावेदिरित्यादिसर्वंसामान्यंप्रसिद्धंसमिद्धोग्निर्मध्यतस्त्रीव्यंजनस्यतौमुष्का
वधिषवणफलकेइतिव्यवहितेनसंबध्यतेवाजपेयाग्निःयावान्लोकःप्रसिद्धस्तावान्विदुषोमैथुनकर्मणःफलमितिस्तूयते।तस्माद्वी
भत्सानकार्यतियएवंविद्वानधोपहासंचरत्यासांस्त्रीणांसुकृतंवृंक्ते।आवर्जयत्यथपुनर्योवाजपेयसंपत्तिंनजानात्यविद्वान्रेतसो
रसतमत्वंवाधोपहासंचरतिआअस्यस्त्रियःसुकृतमावृंजतेअविदुषःएतद्धस्मवैतद्विद्वानुद्दालकआरुणिराहाधोपहासाख्यंमै
थुनकर्मवाजपेयसंपन्नंविद्वानित्यर्थःतथानाकोमौद्गल्यःकुमारहारितश्चकिंचैतआहुरित्युच्यतेबहवोमर्यामरणधर्मिणो
मनुष्याःब्राह्मणायनाःब्राह्मणोअयनंयेषांतेब्राह्मणायनाःब्रह्मबंधवोजातिमात्रोपजीविनइत्येतन्निरिंद्रियाविश्लिष्टेंद्रियाविस्त

कृतोविगतसुकृतकर्माणोविद्वांसोमैथुनकर्मासक्ताइत्यर्थस्तेकिमस्माल्लोकात्प्रयंतिपरलोकात्परिभ्रष्टाइतिमैथुनकर्मणोत्यंत
पापहेतुत्वंदर्शयतियद्दमाविद्वांसोप्यपहासंचरंतितिश्रीमंयंकृत्वापत्न्यांऋतुकालंब्रह्मचर्येणप्रतीक्षतःस्कंदतिवतिवङ्कुवा
ल्पमल्पंवासुप्तस्यवाजाग्रतोवारागप्राबल्यात्तदभिमृशेदनुमंत्रयेतवाअनुजपेदित्यर्थः।यदाभिमृशतितदानामिकाल्यं
तद्रेतआददेत।आददद्दत्येवमंतेनमंत्रेणपुनर्मामित्यनेननिमृज्यादंतरेणमध्येभ्रुवौवास्तनयोर्वायदिकदाचिदुदकआत्मनआ
त्मछायायांपश्येत्तत्राप्यभिमंत्रयतानेनमंत्रेणमयितेजइतिश्रीर्हिवाएषापत्नीस्त्रीणांमध्येयामलोद्वासारजस्वलायत्रा
स्विनीवसातस्मिन्यत्रोयदृतुसंप्राप्तिस्त्रीणांतामलोद्वाससंयन्त्रास्विनींश्रीमतीमभिक्रम्याभिगत्योपमंत्रयेत्इदमद्यावाच्यां
कार्यंयत्पुत्रोत्पादनमितित्रिरात्रांतआप्लुतांसास्वेदस्मैनदद्यात्मैथुनंकर्तुकाममेनांस्वक्रीणीयादाभरणादिनापयन्त
थापिसानैवदद्यान्काममेनांयष्ट्यावापाणिनावोपहन्यादभिक्रमेन्मैथुनायतत्रास्यामिंद्रियेणगांकरिष्यामिनिप्रख्याप्यनाम १८
नेनमंत्रेणोपगच्छेदिंद्रियेणतेयशसायशआददइतिसातस्मादभिशस्तायावद्ध्यादुर्भगेतिख्यातापिसाएवभवतिसाचेदस्मै
दद्यादनुगुणाएवस्याःकुर्तुस्तदानेनमंत्रेणोपगच्छेदिंद्रियेणतेयशसायशआदधामीतितदायशस्विनावेवोजायपितवतः।
वर्त्तार्यणामिच्छेदियंमांकामयेतेतितस्यामर्थंप्रजनेंद्रियंनिष्ठायनिक्षिप्यमुखेनमुखंसंधायोपस्थमस्याअभिमृश्य

न ६ खां

मंत्रमंगादंगादंगादितिअथयामिच्छेन्नगर्भंदधीतेतनधोयीतगर्भिणीमाभूदितितस्यामर्थमितिपूर्ववद्दक्षिणाप्रण्यन्प्राणनंत्र
र्कृत्वापश्चादपाण्यादिंद्रियेणतेरेतसारेतआददइत्यनेनमंत्रेणरेताएवभवतिनगर्भिणीभवतीत्यर्थः।अथयामिच्छेद्द
गर्भमितितस्यामर्थमित्यादिपूर्ववत्पूर्वविपर्ययेणप्राण्यादभिप्राण्यादिंद्रियेणतेरेतसारेतआदधामीतिगर्भिण्येवभवति व
अथपुनर्यस्यजायायैजारउपपत्तिःस्यात्तंचेद्द्विष्याद्अभिचरिष्याम्येतमितिमन्येततस्येदंकर्मामपात्रेग्निमुपसमाधायसर्वं
लोमंकुर्यात्तृणान्यस्तर्ष्टिनोरेषीकाप्रतिलोमाःसर्पिषाक्ताजुहुयाम्ममसमिद्धेहोषीरित्याद्याःआहुतीरंतेसर्वासामसा
नामग्रहणंप्रत्येकंसएषएवंविद्ब्राह्मणःशपतिसविस्सुकृतोविगतपुण्यकर्माप्रैतितस्मादेवंविच्छ्रोत्रियस्य
दारेणनोपहासंनर्मापिनकुर्यात्।किमुताधोपहासंएवंविदपितावत्यरित्रवतिव्रात्कुर्जवतीत्यर्थः।अथयस्यजायामार्त्तवंवि
न्देतुंप्राप्नुयादित्येवमादिर्य्यैपूर्वाद्रष्टव्यःसामर्थ्यान्त्र्यहंकंसेपिबेदहतवासाचास्याः।तांस्नातामस्नातांवृषलोवृष
लोनोपहन्यान्नोपस्पृशेत्।त्रिरात्रव्रतसमाप्तावाप्लुत्यस्नात्वाअहतवासास्यादितिव्यवहितेनसंबंधस्तामाप्लुतांव्रीहीन
तयेन्व्रीहीस्त्ववघातायत्तामेवविनियुंज्यात्।सयइच्छेत्पुत्रोमेशुक्लोवर्णतोजायेतवेदमेकमनुब्रुवीत।सर्वमायुरियाद्दुर्वश्च
रोदनंपाचयित्वासर्पिष्मंतमश्नीयातामीश्वरौसमर्थौजनयितवैदध्योदनंदध्नाचरुंपाचयित्वाद्विवेदंवेदिच्छतिपुत्रंतदेवमश

शाननियमः केवलमेवस्यात्लाक्कि मोदनमुदकग्रहणं प्रसंगान्निवृत्यर्थंदुहितुपांडित्यं गृहतंत्रविषयमेव वेदेनधिकारात्रिलोदनंकृ
स्वरंविविधंगीतोविजिगीतःप्रख्यातइत्यर्थः समितिंगमः सत्भागच्छतीतिप्रगल्भइत्यर्थः।पांडित्यस्य पृथक्ग्रहणात्शुश्रूषितांश्रो
तुमिच्छारमणीयांवाचंभाषितासंस्कृतायाअर्थवत्यावाचोभाषितेत्यर्थः।मांसमि श्रमोदनंमांसोदनंतन्मांसनियमार्थमाह॥ ॥
औक्षे णवामांसेनउक्षासेचनसमर्थपुंगवस्तदीयमांसमृषभस्ततोप्यधिकवयास्तदीयमार्षभंमांसं अथात्रिप्रातरेव कालेवधा
तनिर्वृत्तांस्तंदुलानादायस्थालीपाका वृतास्थालीपाकविधिनाज्यंचेष्टित्वाज्यसंस्कारंकृत्वाचरुंश्रपयित्वास्थालिपाकस्याज्
तीर्जुहोतिउपघातमुपहत्योपहत्यअग्नयेस्वाहेत्याद्याःगाहीः सर्वविधिर्दृष्टव्योचरुंहुत्वोद्धृतंचरुंशेषंप्राश्नातिस्वयंप्राश्यैत
रस्याः पत्न्यैप्रयच्छत्युच्छिष्टंप्रक्षाल्याचम्योदपात्रंपूरयित्वातेनोदकेनैनांत्रिरभ्युक्षत्यनेनमंत्रेणउत्तिष्ठतइतिसकृन्मंत्रो
च्चारणंमथैनामत्रिपंचाते शिरोदनादियथापत्यंकामंतुक्तंतिक्रमोदृष्टव्यः संवेशनकाले सोहमस्मीत्यादिमंत्रेणाक्षिपद्या
वेथास्यात्ऊरूविहापयतिविजिहीथाद्यावापृथिवीइत्यनेनतस्यामर्थमित्यादिपूर्ववन्त्रिरे नांत्रिरःप्रच्छत्यनुलोमामनुमा
र्ष्टिविष्णुर्योनिमित्यादितिमंत्रंजंत्रेनामग्रहणात्यसावितितस्यांसोष्यन्तीमद्भिरभ्युक्षतिप्रसवकालेसुखप्रसवनार्थमनेनमंत्रेण १२४
एवातेगर्भएजतुरितिजातकर्मजातेग्नेमुपसमाधायांकआधायपुत्रंकंसेपृषदा संनी सयोप घृतेपृषदा स्योपघातंजु

१२५

बृहदारण्यभाष्यं समाप्तं

83/2



हुत्वास्मिन्सहस्रमित्याद्यावापस्थाने अथास्यदक्षिणंकर्णमभिनिधायस्वंमुखंवाग्वागितित्रिर्जपेदथदधिमधुघृतसंनीया
नंतर्हितेनाव्यवहितेनजातरूपेणहिरण्येनप्राशयत्येतैर्मंत्रैःप्रत्येकमथास्यनामधेयंकरोतिवेदोसीतितदस्यतद्गुह्यंनामभवति
देदद्वित्यथैनंमात्रेप्रदायस्वाङ्कस्थांस्तनंप्रयछतियस्तेस्तनइत्यादिमंत्रेण अथास्यमातरमभिमंत्रयतइडासीत्यनेनतवार
त्माकुरित्यनेनविधिनाजातःपुत्रःस्वपितरंपितामहंवातिन्त्रायेतेश्रियायशसाब्रह्मवर्चसेनपरमांनिष्ठांप्रापदित्येवंस्तुत्यो
भवतीत्यर्थः।यस्यचैवंविदोब्राह्मणस्यपुत्रोजायतेसचैवंस्तुत्योभवतीत्यध्याहार्यः॥ ॥अष्टमेचतुर्थंब्राह्मणं॥ ॥अ स्प४
थेदानींसमस्तप्रवचनवंशःस्त्रीप्राधान्यात् गुणवान्पुत्रोभवतीतिप्रस्तुतमतःस्त्रीविशेषणेनैवपुत्रविशेषणादाचार्यपरं
१८५ पराकीर्त्यतेतानीमानिशुक्लानीत्यव्यामिश्राणिब्राह्मणेनअध्वर्युणायानीमानीत्येतत्प्रजापतिमारभ्ययावद्यौतिमाषीपुत्र १८
स्तावदधोमुखोनियताचार्यपर्वक्रमोवंशःब्रह्मणःप्रवचनाख्यस्यतस्यैतद्ब्रह्मप्रजापतिप्रबंधपरंपरयागत्यास्मास्वने
कधाविप्रसृतमनाद्यनंतंस्वयंभुब्रह्मनित्यंतस्मैब्रह्मणेनमोस्तुतदनुवर्त्तिभ्योनमः॥ ॥नमोवंशऋषिभ्योवेदाचार्येभ्यो
नमः॥ ॥ ॥छ॥ ॥नमस्तदनुवर्त्तिभ्योगुरुभ्यः॥ ॥छ॥ ॥इतिश्रीगोविंदभगवत्पूज्यपादशिष्यस्यपरमहंसपरिव्राज
काचार्यस्यशंकरभगवतःकृतायांबृहदारण्यटीकायामष्टमोध्यायः॥समाप्तः॥ ॥काश्यांश्रीविश्वेश्वरराजधान्यां॥शुभमस्तु॥

म

श्री२